आर्थिकविकासस्य अवबोधः

दशमकक्ष्यायै सामाजिकविज्ञानस्य
पाठ्यपुस्तकम्

आर्थिकविकासस्य ज्ञानम्

दशमकक्ष्यायै सामाजिकविज्ञानस्य पाठ्यपुस्तकम्

राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद्

NATIONAL COUNCIL OF EDUCATIONL RESEARCH AND TRAINING

दिसम्बरमासः 2015 इत्यस्मात् संस्करणात्
अस्माभिः संस्कृतानुवादः कृतः ।

अनुवादकः – हरिदत्तशर्मा

आमुखम्

राष्ट्रिय-पाठ्यचर्यायाः रूपरेखा (2005) ज्ञापयति यत् बालकानां विद्यालयीयं जीवनं बाह्य-जीवनेन सह योजनीयम्। अयं सिद्धान्तः पुस्तकीय-ज्ञानस्य तस्मात् न्यासाद् विपरीतः अस्ति यस्य प्रभाववशात् अस्माकं व्यवस्था अद्यावधिपर्यन्तं विद्यालयस्य गृहस्य च मध्ये अन्तरालं विरचितवती अस्ति। नूतन-राष्ट्रिय-पाठ्यचर्याधारिताः पाठ्यक्रमाः पाठ्यपुस्तकानि च एतम् आधारभूत-विचारं क्रियान्वेतुं कश्चन प्रयासः अस्ति। एतस्मिन् प्रयासे प्रत्येकं विषयस्य एकदृढभित्त्या आवरणस्य अथ च सूचना-संस्मारणस्य प्रवृत्तेः विरोधः समाविष्टः अस्ति। आशासे यत् एते प्रयासाः अस्मान् राष्ट्रिय-शिक्षा-नीतौ (1986) वर्णितायाः बालकेन्द्रित-व्यवस्थायाः दिशि सुदूरं नेष्यन्ति।

एतस्य प्रयत्नस्य साफल्यम् अधुना एतस्मिन् तथ्ये आश्रितम् अस्ति यत् विद्यालयानाम् आचार्याः अध्यापकाः च बालकेभ्यः कल्पनाशील-गतिविधीनां प्रश्नानां च साहाय्येन शिक्षणाधिगमसमये स्वीयेषु अनुभवेषु चिन्तनं कर्तुम् अवसरान् प्रदद्युः इति। अस्माभिः एतत् मन्तव्यं यत् यदि समयं स्थानं स्वतन्त्रतां च बालकेभ्यः प्रयच्छामः तर्हि बालकाः ज्येष्ठैः समर्पितया सूचना-सामग्र्या सह युक्त्वा सङ्घर्षं च कृत्वा नूतनस्य ज्ञानस्य सर्जनं कुर्वन्ति। शिक्षायाः विविधानां साधनानाम् एवं च स्रोतसाम् अवहेलनस्य प्रमुखं कारणं पाठ्यपुस्तकस्य परीक्षायाः एकमात्रम् आधारत्वेन निर्माणस्य प्रवृत्तिः अस्ति। सर्जनस्य प्रारम्भस्य च विकासार्थम् आवश्यकम् अस्ति यत् वयं बालकान् शिक्षणस्य प्रक्रियायां पूर्ण-सहभागित्वेन अङ्गीकुर्याम तथा च तेषां सहभागितां सुनिश्चिनवाम, ते बालकाः ज्ञानस्य निर्धारित-मात्रायाः ग्राहकाः सन्ति इति चिन्तनं त्यक्तव्यम्।

एते उद्देश्याः विद्यालयस्य दैनिक-जीवने कार्यशैल्यां च भृशं परिवर्तनं याचन्ते। दैनन्दिन्यां समय-सारण्यां परिवर्तनशीलत्वं (लचीलापन) तावदेव आवश्यकम् अस्ति यावत् वार्षिक-कालन्धरस्य क्रियान्वयने जागरूकता, येन शिक्षणार्थं नियत-दिनानां सङ्ख्या वास्तविकं रूपं स्वीकुर्यात् शिक्षण-मूल्याङ्कनयोः विधयः अपि एनं विषयं निश्चेष्यन्ति यत् इदं पाठ्यपुस्तकं विद्यालये बालानां जीवनेभ्यः मानसिकोद्वेगस्य खिन्नतायाः च स्थाने हर्षं प्रदातं कियत् प्रभावि सिध्यति। भारस्य समस्यायाः समाधानार्थं पाठ्यक्रम-निर्मातृभिः विभिन्नेषु चरणेषु ज्ञानस्य पुनर्निर्धारण-समये बालानां मनोविज्ञानाय एवं च अध्यापनाय उपलब्ध-समयस्य ध्यानं दातुं पूर्वापेक्षया अधिकः सचेष्टः प्रयत्नः कृतः अस्ति। एषः प्रयासः इतोऽपि गभीरतया स्यात् इति प्रयत्ने इदं पाठ्यपुस्तकं चिन्तनाय, विस्मयाय, लघुसमूहेषु वार्तालापाय, तर्काय एवं च चर्चायै तथा च हस्ताभ्यां क्रियमाणेभ्यः गतिविधिभ्यः प्राथमिकतां प्रयच्छति ।

राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद् एतस्य पुस्तकस्य रचनायै निर्मितायाः पाठ्यपुस्तक-निर्माण-समितेः परिश्रमस्य कृते कार्तज्ञ्यं प्रकटीकरोति। परिषद् सामाजिक-विज्ञान-पाठ्यपुस्तकस्य परामर्शदातृ-समितेः अध्यक्षम् आचार्यहरि-वासुदेवन्-महोदयं प्रति तथा च एतस्याः पाठ्यपुस्तक-समितेः मुख्य-परामर्शदातारं तापसमजूमदारमहोदयं प्रति विशेषरूपेण कृतज्ञतां प्रकटयति। एतस्य पाठ्यपुस्तकस्य वर्धने बहुभिः शिक्षकैः योगदानं कृतम्। एतद् योगदानं सफलीकर्तुं वयं तेषां शिक्षकाणां प्राचार्यान् प्रति अपि कृतज्ञतां प्रकटयामः। वयं तानि सर्वाणि सङ्घटनानि संस्थाः च प्रति कृतज्ञाः स्मः यैः स्वीय-सामग्रीणाम्, संसाधनानाम् एवं च सहयोगिनां साहाय्यस्य स्वीकरणे औदार्यपूर्वकं सहयोगः कृतः।

वयं माध्यमिकोच्चशिक्षा-विभाग-मानव-संसाधन-विकास-मन्त्रालय-द्वारा नियुक्तस्य आचार्यमृणालमीरी-महोदयस्य एवम् आचार्यजी.पी.देशपाण्डे-महोदयस्य आध्यक्ष्ये निर्मितायाः निरीक्षण-समितेः तान् सदस्यान् प्रति धन्यवादवचांसि व्यवहरामः ये स्वीकीयं मूल्यवन्तं समयं सहयोगं च दत्तवन्तः । व्यवस्थागतेषु संस्करणेषु स्वीय-प्रकाशनेषु च नैरन्तर्येण परिष्काराय समर्पिता परिषद् टिप्पणीः परामर्शान् च स्वागतीकरिष्यति येन भाविसंशोधनेषु साहाय्यं स्वीकर्तुं शक्येत।

निदेशकः

राष्ट्रियशैक्षिकानुसन्धान-प्रशिक्षणपरिषद्

नवदेहली

२० नवम्बर् २००६

शिक्षकाणां कृते केचन परिचयात्मकाः विषयाः

इदं पुस्तकं भारतीयायाः अर्थव्यवस्थायाः विकास-प्रक्रियायाः सरलीकृतरूपस्य परिचयं कारयति। वयं प्रायः अर्थशास्त्रे विकासं वस्तूनाम् अथ च सेवानाम् उत्पादकत्वेन उपभोक्तृत्वेन वा जनानाम् आर्थिकजीवने परिवर्तनप्रक्रियामेव अवगच्छामः । यदा कदा विकासस्य अध्ययनं मुख्यतः केनचित् एकेन परिघटनारूपेणापि क्रियते यस्मिन् आधुनिक्याः औद्योगिकसभ्यतायाः संवृद्धेः युगपदेव तन्महत्त्वम् अपि समावेशितं वर्तते । एतादृशं चिन्तनम् एतदर्थं क्रियते यत् कस्यचिदपि देशस्य पूर्णविकासः अथवा अल्पविकासः प्रायः युद्धानाम् एवं च विजयानां परिणामेषु तथा च कस्यचित् देशस्य अपरदेशस्य औपनिवेशिकशोषणे आश्रितो वर्तते । किन्तु प्रस्तुते पुस्तके अस्माभिः बाह्यकारकाणि न उद्दीप्तानि । अत्र वयं विकासप्रक्रियायाः सुविस्तृतं परिदृश्यम् अनुसरन्तः स्मः । एतादृशी प्रक्रिया वर्तते या बाह्यकारकाणां हस्तक्षेपात् अथवा तेषां बाधनात् प्राग् एव आरब्धुं शक्यते । विकासप्रक्रिया एतादृशीनां बाधानाम् अनन्तरं पुनः पुनः आरब्धुं शक्यते एवं च पराधीनतायाः परिसमाप्तेः अनन्तरं स्वतन्त्ररूपेण प्रवर्तमाना भवितुम् अर्हति ।

अस्मिन् पुस्तके सर्वप्रथमं वयं देशे विकासस्य आरम्भम् अर्थव्यवस्थायाः कृषि-विनिर्माण- सेवानाम् इति त्रयाणां क्षेत्राणाम् उदयत्वेन अवलोकयामः । वयम् आर्थिकविकासं पृथक् रूपेण न अपितु मानवविकासस्य सामान्यावधारणा यस्यां स्वास्थ्यशिक्षा एवं च जनानां जीवनस्य गुणवत्तायाः व्यापकरूपेण परिभाषितकर्तॄन् अन्यसङ्केतकान् अङ्गरूपेण द्रष्टुं प्रयासं विहितवन्तः ।

प्रथमेऽध्याये वयम् अध्ययनं करिष्यामः यत् जनाः वस्तुतः विकासस्य अवधारणां कथम् अवगच्छन्ति तथा अस्य मापनं कथं कर्तुं शक्यते ? एतस्य उद्देशस्य पूर्त्यर्थं नैकाः मापदण्डाः समुपलब्धाः सन्ति । वयं द्रक्ष्यामः यत् विकासम् अधिगन्तुं केचन महत्त्वपूर्णाः विकाससङ्केतकाः कियन्तः सहायकाः सन्ति इयं विकासप्रक्रिया पृथक् - पृथक् जनान् कथं पृथक् - पृथग्रूपेण प्रभावीकर्तुम् अर्हति ।

कयाचित् प्रक्रियारूपेण विकासस्य आरम्भः सम्भवतः अतीतकालात् किञ्चित् पूर्वम् अभवत् । यस्मिन् अर्थे वयं विकासं स्वीकुर्मः कदाचित् तस्मिन् अर्थे कश्चिदपि देशः विकसितः नास्ति इति कथयितुं शक्यते । मानवीयावासेन सम्भवतः विकासप्रक्रियायाः समारम्भः तदानीम् अभवत् यदा मानवाः अपेक्षितशान्त्या एवं च न्यूनाधिक्येन निश्चितेषु आवासस्थानेषु महता प्रमाणेन कृषेः असम्भावनायां सत्यामपि निवासम् आरब्धवन्तः । यदा कृषेः आरम्भः अभवत् तदा कृषिगतक्रियाणां विकासारम्भोऽपि अभूत् । कदाचित् तदानीम् एव अन्येषां प्राकृतिकानाम् उत्पादानां यथा आकरजपदार्थानां निष्कर्षणस्य अपि आरम्भः अभवत् । पाषाणाम् अन्येषाम् आकरजपदार्थानां प्राप्तेः इयं प्रक्रिया 'उत्खननम्' इति कथ्यते ।

मानवः उपकरणानाम् अस्त्रशस्त्राणां पात्राणां मत्स्यपाशस्य इतोऽपि अनेकेषां वस्तूनां निर्माणाय अखाद्योत्पदानां यथा वृक्षेभ्यः काष्ठम् एवं च उत्खननात् प्राप्तानाम् अपरिष्कृताकरजानाम् उपयोगम् अधिगतवान्। इमे एव आद्याः मानवनिर्मिताः उत्पादाः आसन् ये 'शिल्पकृतयः' इति उच्यन्ते ।

अर्थशास्त्रिणः कृषितः यस्यां फलानां तण्डुलानाम् आकरजपदार्थसदृशानां शुद्धप्राकृतिकोत्पादानां सङ्ग्रहणं कृषिशस्यम् अथवा निष्कर्षणम् इत्येतानि अन्तर्भूतानि सन्ति, भेदं कर्तुं शिल्पकृतीनां निर्माणप्रक्रियां 'विनिर्माणम्' कथयन्ति । उत्खननसहितकृषिः (या प्राथमिकं क्षेत्रकम् अपि कथ्यते) एवं च विर्निमाणः (यः द्वितीयक्षेत्रकम् इति कथ्यते) एतयोः द्वयोः क्षेत्रकयोः मध्ये उत्पादनगतिविधीनां विभजनम् आर्थिकविकासस्य सम्भवतः प्रथमः दृष्टस्वरूपः आसीत् । एतद् विभजनम् 'श्रमविभजनम्' इति प्रक्रियया अभूत् । 'एडम स्मिथः' इति अर्थशास्त्रस्य जनकः एतत् नाम प्रादात् । अधः अस्याः प्रक्रियायाः सङ्क्षिप्तव्याख्या ।

सर्वप्रथमं काचित् एका व्यक्तिः अथवा न्यूनातिन्यूनं कस्यचित् परिवारस्य सदस्याः सम्भवतः सर्वाणि अपि कार्याणि स्वयमेव कुर्वन्ति स्म। तदुत्तरमेव क्वचित् क्वचित् श्रमविभजनस्य लाभः अनुभूतः।

मानवः अनुभवेन ज्ञातवान् यत् यदा केचन जनाः मत्स्यनिग्रहणो केचन अन्ये क्षेत्राकर्षणे मृत्पात्रनिर्माणे वा पशुपक्षिणां च निग्रहणे अवधानकेन्द्रितं कृतवन्तः तदा उत्पादनं दक्षतारूपेण जायमानम् आसीत्। अयं विकासस्य कश्चन प्रकारः एव आसीत्। एतत् परं विशेषज्ञानाम् उदयः अभवत् ये स्वयम् उत्पादानि न निर्मान्ति स्म अपितु अन्येषां कथम् उत्तमरीत्या उत्पादनं कर्तुं शक्यते इति निर्दिशन्ति स्म। ये चिकित्सिकाः आसन् ते आहतान् रुग्णान् च जनान् उपचरन्ति स्म। स्वभावतः अनेन श्रमविभजनेन जनानाम् उत्पादकतावृद्धिः अभवत् अन्यच्च अर्थव्यवस्थायाः विकासः अपि जातः।

द्वितीयेऽध्याये वयं तं विधिम् अध्येष्यामहे यस्मिन् आधुनिकार्थव्यवस्थायाम् आर्थिकगतिविधीनां वर्गीकरणं तथा च प्राथमिक – द्वितीयक – तृतीयकक्षेत्राणां स्वरूपम् अवगन्तुं शक्यते। अस्मिन् पुस्तके चर्चा त्रिषु क्षेत्रेषु जातानां परिवर्तनानाम् आधारेण भारतीयार्थव्यवस्थायाः परिवर्तनमानस्वरूपे केन्द्रिता वर्तते। एदततिरिच्य आर्थिकगतिविधीनां वर्गीकरणस्य सङ्घटितं अथ च असङ्घटितं सार्वजनिकं निजिक्षेत्रकानां चेति अन्यविधयोः द्वयोः रूपयोः चर्चा अपि वर्तते। पुस्तके आधुनिक–भारतीयार्थव्यवस्थयायाः समाह्वानानि अवगन्तुं वर्गीकरणस्य अन्यरूपाणां प्रासङ्गिकतायाः विस्तृतव्याख्या वास्तविकजीवनस्य उदाहरणैः सन्दर्भाध्ययनैश्च कृता वर्तते।

तृतीयः अध्यायः पाठकान् मुद्रासंसारं नयति यत्र आधुनिकार्थव्यवस्थायाम् अस्याः भूमिका अस्याः प्रकाराः एवं च अनेकाः संस्थाः यथा वित्तकोषाणां सम्बधिनी चर्चा अस्ति। अस्मिन् अध्याये जनान् विश्वसनीयताप्रापयित्रीणाम् अन्यसंस्थानां तथा च वित्तकोषाणां भूमिका चर्चिता।



चर्चायां विश्वसनीयतायाः ये बिन्दवः केन्द्रिताः सन्ति ते (अ) जनसङ्ख्यायाः बृहति भागे विश्वसनीयतायाः उपलब्धता (ब) भारते अनौपचारिकविश्वसनीयतायाः बहुलता (स) उत्पादकनिवेशः उच्चतरः आयप्रवाहः उत्पादकनिवेशे सहायकोच्चजीवनस्तरस्य स्वपोषितम् 'सुचक्रम्' अथवा ऋणग्रस्तता, निर्धनता एवं च निर्धनतावृद्धौ सहायकः ऋणपाशः 'दुश्चक्रम्' इत्यस्य निर्माणे विश्वसनीयतायाः भूमिका। इमाः सर्वाः अपि अवधारणाः सन्दर्भाध्ययनानां माध्यमेन प्रस्तुताः वर्तन्ते।

वैश्वीकरणं काचिद् एका महत्वपूर्णा परिघटना वर्तते या विकासप्रक्रियां विश्वस्य च जनान् बहुभिः प्रकारैः प्रभावितं करोति। चतुर्थेऽध्याये वैश्वीकरणस्य कश्चन एकः विशेषार्थिकः आयामः, उत्पादनस्य जटिलव्यवस्थायां केन्द्रितं वर्तते। अस्मिन् व्याख्यायितं वर्तते यत् कथं बहुराष्ट्रियाः उद्योगाः व्यापारनिवेशमाध्यमेन वैश्वीकरणे साहाय्यं प्रददति। अस्मिन् अध्याये वैश्वीकरणस्य सहायकानि कानिचन अन्यानि महत्त्वपूर्णकारकाणि संस्थाः च स्थानम् अवाप्नुवन्। अध्यायस्य अन्ते भारतीयार्थव्यवस्थां प्रभावकर्तृणां प्रभावाणां (सकारात्मकानां नकारात्मकानां च) मूल्याङ्कनम् अपि कृतम् अस्ति।

विकासप्रक्रिया अर्थव्यवस्थायाः विभिन्नक्षेत्रकेषु न केवलम् उत्पादनस्तरस्य वृद्धौ एव साहाय्यं करोति अपितु अस्याः केचन नकारात्कपक्षाः अपि सन्ति। अस्मिन् अध्याये प्रदत्तानि उदाहरणानि सन्दर्भाध्ययनानि च एतत् परीक्षणं कर्तुं प्रयतन्ते यत् विकासस्य लाभं सर्वे जनाः (लघूत्पादकाः गुरूत्पादकाः, सङ्घटिताः अथवा असङ्घटिताः क्षेत्रश्रमिकाः सर्वविधायवर्गीयाः उपभोक्तारः पुरुषाः महिलाः च) लभमानाः सन्ति अथवा केचन प्राप्तसौविध्याः जनाः एव एतं लभमानाः सन्ति।

अन्तिमः अध्यायः प्रासङ्गिकम् अध्ययनं प्रस्तौति यत् कथं कां सीमां यावत् च उपभोक्तृणां रूपेषु नागरिकाणाम् अधिकाराणां सुरक्षा कर्तुं शक्यते। तीव्रविकासस्य प्रक्रिया एवं नूतनब्राण्डानाम् उदयः

अनैतिकोत्पादकानां विज्ञापनानि अभियानानां युगे प्रायः उपभोक्तारः एव भ्रष्टव्यवसायिनाम् आहाराः भवन्ति। उपभोक्ता आन्दोलनानां ऐतिहासिकतायाः परिचयेन सह वास्तविकजीवनस्य अनेकदृष्टान्तानां माध्यमेन अयम् अध्यायः वर्षेभ्यः विकसितानां विभिन्नानां किफायती-उपभोक्तृणां संरक्षणक्रियाविधीनां चर्चां करोति। अध्यायोऽयं विस्तृतं विवरणं ददाति यत् कष्टप्रद-व्ययात्मिका एवम् अधिकसमयस्वीकर्तृभ्यः न्यायिकप्रक्रियाभ्यः पृथक् भूत्वा संचालितैः विशेषोपभोक्तृन्यायालयैः कथं जनाः अत्यल्पव्यये स्वस्य अधिकारस्य स्वामत्यं कर्तुं शक्नुवन्ति।

पाठ्यपुस्तकस्य विशिष्टताः

अस्य पुस्तकस्य उद्देश्यं स्वस्य समीपवर्तिनः आर्थिकजीवनस्य अवबोधः अस्ति एवम् एतस्मिन् विषये विषये अपि विचारकरणम् अस्ति यत् जनानाम् आर्थिकविकासेन वयं किम् अवगच्छामः। अवधारणात्मकस्पष्टताम् एवं च एताः अवधारणाः वास्तिविकजीवनेन सह संयोजयितुम् अस्माभिः अत्र अनेकेषाम् उदाहरणानाम् एवं च सन्दर्भाध्ययनानाम् उपयोगः कृतः। सम्पूर्णम् उद्देश्यं मनसि निधाय एतेषां पठनं कृत्वा उपयोगः करणीयः।

अध्यायः **शिक्षकाणां कृते निर्देशः** इत्यस्मात् आरभ्यते कस्यचित् अपि अध्यायस्य पाठनात् पूर्वं शिक्षकेण एतत् पृष्ठं पठनीयम्। अस्मिन् (क) अध्यायस्य विषयवस्तु एवं च व्यापकदृष्टिः (ख) अध्यायस्य विषयवस्तुनः पाठनार्थं केचन निर्देशाः तथा च (ग) विभिन्नशीर्षकैः सम्बद्धानाम् अतिरिक्तसूचनानां स्रोतसां विवरणानि दत्तानि सन्ति।

सर्वेषु अध्यायेषु प्रत्येकं खण्डस्य अनन्तरम् **'आगच्छन्तु एतेषु विचारं कुर्याम्'** इति एतदन्तर्गतम् अनेके अध्यायाः दत्ताः सन्ति। अस्मिन् खण्डस्य पुनरीक्षणाय अनेके प्रश्नाः सन्ति एवं च केचन मुक्तपरिणामयुक्ताः प्रश्नाः अपि च कार्यविधयः सन्ति। ये कक्षासु अथवा कक्षायाः बहिः कर्तुं शक्यन्ते। केचन अभ्यासा परिचर्चायाः माध्यमेन क्रियेरन्। छात्राः एतेषु समूहरूपेण चर्चां कर्तुं शक्नुवन्ति। तेषां निष्कर्षाः एवं च उत्तराणि सम्पूर्णकक्षायां वादविवादार्थम् उपस्थातुं शक्यन्ते। एतदर्थम् अतिरिक्तसमयस्य आवश्यकता भविष्यति। परन्तु एतद् अनिवार्यम् अस्ति यतो हि छात्राः निरीक्षणे एवं च अन्योऽन्यस्मात् अधिगन्तुं साहाय्यं प्राप्नुवन्ति। अस्याभिप्रायः अयम् अस्ति यत् छात्राणां पूर्वापेक्षया अधिकपारस्परिकसहयोगे साहाय्यकरणम् अस्ति। परन्तु अस्य कोऽपि नियतविधिः नास्ति। प्रत्येकं शिक्षकेण स्वीयशिक्षणविधेः विकासः करणीयः भविष्यति। वयं तेषां क्षमतायां विश्वसिमः।

अस्य पुस्तकस्य सज्जीकरणावधौ अस्माभिः अनेकासां सन्दर्भसामग्रीणाम् उपयोगः कृतः अस्ति। एतद् अतिरिक्तं वार्तापत्राणाम् अनेककर्तनानाम् एवं च शासनशासनेतर-सङ्घटनानां वृत्तानि अपि प्रयुक्तानि। एतेषु केषाञ्चन उल्लेखः **शिक्षकाणां कृते निर्देशः** इत्यत्र कृतः अस्ति। कानिचन पुस्तकस्य अन्ते परामृष्टपाठ्यसामग्रीषु दत्तानि सन्ति।

अतिरिक्तसूचनानां पाठ्यसामग्रीणां च कक्षासु चर्चा अत्यन्तम् आवश्यकी अस्ति। इयं चर्चा संक्षिप्तसर्वेक्षणरूपेण निकटवर्तिजनानां साक्षात्काररूपेण सन्दर्भपुस्तकानां रूपेण अथवा वार्तापत्राणां कर्तनरूपेण भवितुं शक्नोति। अतः एतेषाम् उपयोगः छात्रैः स्वतः आरेखनिर्माणं भित्तिपत्रप्रदर्शनं प्रदर्शनम् एवं च वादविवादः इत्यादीनां रूपेण प्रत्युत्तरार्थम् एवं च रचनात्मिक्याः अभिव्यक्तेः कृते करणीयः।

मूल्याङ्कनम्

शिक्षायां परिष्कारस्य आवश्कताम् उद्दिश्य राष्ट्रियपाठ्यचर्यारूपरेखा २००५ इति अनेन एवं च परीक्षापरिष्कारान् उद्दिश्य राष्ट्रियफोकससमूहस्य स्थितिपत्रेण परीक्षासु क्रियमाणेषु प्रश्नेषु विधिषु परिवर्तनाय

निवेदनं कृतम् अस्ति। अस्मिन् पुस्तके पृष्टाः प्रश्नाः कण्ठीस्थकरणस्य पोषिकायाः मूल्याङ्कनप्रक्रियायाः स्थाने पाठकानां रचनात्मकचिन्तनं कल्पनाशीलता प्रत्युत्तरम् एवं च विश्लेषणक्षमता इति एतेषां सबलकर्त्री प्रणाली अङ्गीकृता अस्ति। अत्र दत्तानाम् उदाहरणानाम् आधारेण शिक्षकाः अतिरिक्तान् प्रश्नान् अपि सज्जीकर्तुं शक्नुवन्ति।

केन्द्रीयावधारणायाः अवबोधस्य परीक्षणाय प्रश्नाः

(अ) सकलगृहोत्पादः कस्मिन् विशेषवर्षे उत्पादितस्य ..... समस्तमूल्यम् अस्ति।

(क) सर्वेषां वस्तूनां सेवानां च

(ख) सर्वेषाम् अन्तिमानां वस्तूनां सेवानां च

(ग) सर्वेषां मध्यवर्तिनाम् एवं च अन्तिमानां वस्तूनां सेवानां च।

(घ) सर्वेषां मध्यवर्तिनां तथा अन्तिमवस्तूनां सेवानां च

(ब) विकासार्थं साखस्य भूमिकायाः विश्लेषणं कुर्वन्तु।

(स) भारते फोर्डसमवायद्वारा कारयानानाम् उत्पादनं केन प्रकारेण उत्पादानां परस्परं सम्बद्धीकरणे सहायकं भविष्यति ?

(द) श्रमाधिनियमेषु नमनीयता समवायानां केन प्रकारेण साहाय्यं करिष्यति ?

विश्लेषणात्मकयोग्यतायाः व्याख्यायाः एवं च सुसंगतप्रस्तुतीकरणस्य मूल्याङ्कनाय प्रश्नाः

(अ) अधः दत्तायां सारण्यां त्रयाणां क्षेत्रकाणां द्वारा सकलगृहोत्पादे कृतं योगदानं दर्शितम् अस्ति (कोटिरूप्यकैः)

वर्षम्	प्राथमिकम्	द्वितीयकम्	तृतीयकम्
१९५०	८००००	१९०००	३९०००
२०००	३१४०००	२८००००	५५५०००

(क) १९५०तमे वर्षे २०००तमे वर्षे च त्रयाणां क्षेत्रकाणां सकलगृहोत्पादे सहभागितायाः गणनां कुर्वन्तु

(ख) आङ्किकविवरणानि द्वितीयाध्यायस्य द्वितीयारेखम् इव दण्डारेखे प्रदर्शयन्तु।

(ग) दण्डारेखात् वयं कं निष्कर्षं प्राप्तुं शक्नुमः ?

(ब) भारते प्रतिशतम् अशीतिमिताः कृषकाः लघुकृषकाः सन्ति येषां कृते कृषिनिमित्तं साखस्य आवश्यकता अस्ति।

(क) वित्तकोषाः लघुकृषकेभ्यः ऋणप्रदानस्य अनिच्छां किमर्थं प्रकटयन्ति ?

(ख) अन्यानि स्रोतांसि कानि सन्ति यतः लघुकृषकाः ऋणं स्वीकर्तुं शक्नुवन्ति ?

(ग) लघुकृषकाणां कृते ऋणस्य उपबन्धाः कथं प्रतिकूलाः भवितुं शक्नुवन्ति ? उदाहरणेन सह व्याख्यां कुर्वन्तु।

(घ) केषाञ्चन एतादृशानां विधीनां परामर्शं यच्छन्तु येन लघुकृषकाः अल्पार्धम् ऋणं प्राप्तुं शक्नुवन्ति।

प्रतिबिम्बितचिन्तनस्य परीक्षणाय प्रश्नाः

(अ) चित्रं पश्यन्तु (कुटीराणां मध्ये उच्चभवनानि)। एतादृशानां क्षेत्राणां विकासलक्ष्याणि कानि भवेयुः ?

(ब) "पृथ्व्याम् अस्माकं सर्वेषाम् आवश्यकतानां पूर्तये पर्याप्तानि संसाधनानि सन्ति। परन्तु कस्यचित् अपि जनस्य लोभपूर्तये पर्याप्तानि न सन्ति।" विकासस्य सन्दर्भे एतत् कथनं केन प्रकारेण प्रासङ्गिकम् अस्ति? चर्चां कुर्वन्तु।

(स) "तृतीयकक्षेत्रकं भारतीयार्थव्यवस्थायाः कृते "

(द) जनाः दुर्मार्गाः, जलं, स्वास्थ्यसौविध्यम् इति एतेषाम् अभावे उपालम्भनं कुर्वन्ति परं कोऽपि न शृणोति। अधुना सूचनायाः अधिकारस्य अधिनियमः प्रश्नकरणस्य अधिकारं भवते ददाति। किं भवान् अनुमतः अस्ति ? चर्चां करोतु।

वास्तविकजीवनस्य समस्यानां विषये अवधारणानां विचाराणां च उपयोगविषये योग्यतायाः परीक्षकाः प्रश्नाः

(अ) भवतः ग्रामस्य नगरस्य क्षेत्रस्य विकासलक्ष्याणि कानि भवितुम् अर्हन्ति ?

(ब) विद्यालये छात्राणां वर्गीकरणं प्राथमिके द्वितीयके अथवा कनिष्ठे वरिष्ठे च समूहे क्रियते तदर्थं प्रयुक्ता परीक्षा का ? भवताम् अनुगुणम् एतद् वर्गीकरणम् उपयोगि अस्ति ?

(स) नगरप्रदेशेषु उद्योगेषु कथं वृद्धिः कर्तुं शक्यते ?

(द) प्रच्छन्नस्य अनुद्योगस्य विषये भवान् किं चिन्तयति ? नगराणां ग्रामाणां च उदाहरणम् अधिकृत्य व्याख्यां करोतु।

(घ) यदि भवान् भवतः प्रदेशस्य हाटकं गच्छति चेत् उपभोक्तृरूपेण भवतः कर्तव्यानां वर्णनं करोतु।

अस्य पुस्तकस्य विभिन्नाध्यायानां विषयाः अन्तःसम्बन्धिताः सन्ति। एतेषु तादृशप्रश्नानां निर्माणम् आवश्यकं येन छात्राणाम् अवधानं पाठ्यक्रमस्य एकस्य अथवा अधिकानां विषयाणां सार्थकसम्बन्धं प्रति आकर्षितं भवेत्। उदाहरणार्थं चतुर्थाध्यायस्य एकः प्रश्नः द्वितीयाध्यायेन सम्बद्धः अस्ति। चतुर्थे अध्याये वयं दृष्टवन्तः यत् एकस्य विकासः अपरस्य विनाशस्य कारणं भवति। भारते विशिष्टाणाम् आर्थिकक्षेत्राणां स्थापनस्य केचन जनाः विरोधं कुर्वन्तः सन्ति। अवगच्छन्तु एते के किमर्थं च विरोधं कुर्वन्ति ?

वयम् आशास्महे यत् भवन्तः छात्रैः सह अस्य पुस्तकस्य समालोचनात्मकम् अध्ययनं करिष्यन्ति तथा भवताम् आलोचनाः प्रश्नान् अनुमतानि च अधः निर्दिष्टं सङ्केतं प्रेषयिष्यन्ति तथा तेन इमां चर्चां वयम् अग्रे अनुवर्तयितुं शक्नुमः।

कार्यक्रमसमन्वयकः
अर्थशास्त्रपाठ्यपुस्तकम्, कक्ष्या -१०
सामाजिकविज्ञानं मानविकीशिक्षाविभागः च
राष्ट्रियशैक्षिकानुसन्धानम् एवं प्रशिक्षणपरिषद्
श्री अरविन्दोमार्गः
नवदेहली ११००१६

भारतीय-संविधानम्

उद्देशिका

वयं भारतीयाः, भारतदेशम् एकं [1]**[सम्पूर्ण-प्रभुत्व-सम्पन्नम्, समाजवादि, पन्थ-निरपेक्षम्, लोकतन्त्रात्मक-गणराज्यं]** निर्मातुं तथा च तस्य समस्तनागरिकाणां कृते;

सामाजिकम् आर्थिकं राजनैतिकं च **न्यायम्,** विचारस्य, अभिव्यक्तेः, विश्वासस्य, धर्मस्य,

उपासनायाः **च स्वतन्त्रताम्,**

प्रतिष्ठायाः अवसरस्य च **समतां**

प्रापयितुं

तथा च तेषु **सर्वेषु** मानवीयगौरवस्य तथा च [2]**[राष्ट्रियैकतायाः अखण्डतायाश्च]** सुनिश्चयकर्त्रीं **बन्धुतां** संवर्धयितुं.....

दृढसंकल्पाः भूत्वा **अस्यां स्वसंविधानसभायाम्** अद्य नवम्बरमासस्य 26 तमे दिनाङ्के 1949 तमे ख्रीस्ताब्दे (मार्गशीर्षे शुक्लसप्तम्यां 2006 तमे विक्रमसंवत्सरे) **एतत् संविधानम् अङ्गीकुर्मः अधिनियमितम् आत्मार्पितं च कुर्मः ।**

---

1. संविधानाधिनियमः (द्वाचत्वारिंशं संशोधनम्) 1976 इत्यस्य द्वितीय-धारायाः द्वारा (3.1.1977 तः) "प्रभुत्व-सम्पन्नलोकतन्त्रात्मक-गणराज्यम्" इत्यस्य स्थाने प्रतिस्थापितम् ।
2. संविधानाधिनियमः (द्वाचत्वारिंशं संशोधनम्) 1976 इत्यस्य द्वितीय-धारायाः द्वारा (3.1.1977 तः) "राष्ट्रस्य एकताः" इत्यस्य स्थाने प्रतिस्थापितम् ।

पाठ्यपुस्तकनिर्माणसमितिः

अध्यक्षः, सामाजिकविज्ञानपाठ्यपुस्तकपरामर्शदातृसमितिः

आचार्यः हरिवासुदेवनः, आचार्यः, इतिहासविभागः, कलकत्ताविश्वविद्यालयः, कोलकाता

मुख्यपरामर्शदाता

तापसमजूमदारः, अवकाशप्राप्तः आचार्यः, अर्थशास्त्रम्, जवाहरलालनेहरूविश्वविद्यालयः, नवदिल्ली

परामर्शदाता

सतीशकुमारः जैनः, आचार्यः, आर्थिकाध्ययनम् एवं योजनाकेन्द्रम्, जवाहरलालनेहरूविश्वविद्यालयः, नवदिल्ली

सदस्याः

अरविन्दसरदाना, एकलव्यः, इण्स्टीट्यूट फॉर एजूकेशनल रिसर्च एण्ड इनोवेटिव एक्शन, मध्यप्रदेशः

नीरजारश्मिः, प्रवाचिका, पाठ्यचर्यासमूहः, राष्ट्रियशैक्षणिकानुसन्धानप्रशिक्षणपरिषद्, नवदिल्ली

नीरजानौटियालः, प्रशिक्षितस्नातकशिक्षकः (सामाजिकविज्ञानम्), केन्द्रीयविद्यालयः, बी.ई.जी. सेण्टर, दक्कनकालेजमार्गः, यर्वदा, पुणे

रजिन्दरचौधरी, प्रवाचकः, अर्थशास्त्रविभागः, महर्षिदयानन्दविश्वविद्यालयः, रोहतक, हरियाणा रामगोपालः, आचार्यः, अर्थशास्त्रविभागः, अन्नामलायीविश्वविद्यालयः, अन्नामलायीनगरम्, तमिलनाडुः सुकन्याबोसः, एकलव्यः, फेलो, नवदिल्ली

विजयशङ्करः, समाजप्रगतिसहयोगः, बागलीब्लॉक, जिल्ला देवासः, मध्यप्रदेशः

अनुवादकमण्डलम्

पी. के. तिवारी शोधच्छात्रः जवाहरलालनेहरूः विश्वविद्यालयः, नवदेहली

शिखा गर्गः सेठी, सी-४९ पम्पोस इन्कलेव, नवदेहली

शिवानन्द उपाध्यायः, ५२०, लाडोसरायः, महरौली, नवदेहली

सदस्यसमन्वयकः

एम. वी. श्रीनिवासन, प्रवक्ता, डी.ई.एस.एस.एच., एन.सी.ई.आर.टी., नयी दिल्ली

कृतज्ञता-ज्ञापनम्

इदं पुस्तकं विदुषां विद्यालीयशिक्षकाणां छात्राणां शैक्षिक-कार्यकर्तृणाम् अस्माकं बालानां च शिक्षायैः प्रयासरतानां जनानां विचाराणां टिप्पणीनां परामर्शानां च परिणामरूपम् अस्ति । राष्ट्रिय-शैक्षिक-अनुसन्धान-प्रशिक्षण-परिषद् जीन-द्रेजः, विजिटिङ्ग-प्रोफेसरः, गो.ब.पन्त-सामाजिक-विज्ञान-संस्थानम्, इलाहाबादम्; आर.नागराजः,प्रोफेसरः, इन्दिरा-गान्धि-विकास-अनुसन्धान-संस्थानम्, मुम्बयी; राममनोहररेड्डी, एडीटर,इकोनॉमिक-एण्ड-पॉलिटिकल-वीकली अचि च सूजनकृष्णमूर्तिः, स्वतन्त्र-शोधकर्ता, मुम्बयी; एस.कृष्णकुमार.श्री.वेङ्कटेश्वर-कॉलेज, दिल्ली-विश्वविद्यालयः, दिल्ली; तारानायरः, ग्रामीण-प्रबन्धन-संस्थानम्, आनन्दकेशवदासः, गुजरात-विकास-अनुसन्धान-संस्थानम्, अहमदाबादम्; जॉर्ज-चेरियनः, कञ्ज्यूमर-यूनिटी-ट्रस्ट-इण्टरनेशनल, जयपुरम्; निर्मल्यबसुः, भारतीय-विज्ञान-संस्थानम्, बैङ्गलुरुः; मनीषजैनः,शोधार्थी, दिल्लीविश्वविद्यालयः देहली, उपर्युक्तानां सर्वेषां पुस्तक-निर्माणाय प्रदत्तानां परामर्शानां कृते कृतज्ञतां विज्ञापयति। वयम् आत्मीयसहकर्मिणां के.चन्द्रशेखरः, शैक्षिकमापदण्ड-मूल्याङ्कन-विभागः, आर.मेघनाथनः, भाषाविभागः, अशिता-रवीन्द्रनः जयासिंहः च, सामाजिक-विज्ञान-मानविकी-शिक्षा-विभागः, एन.सी.ई.आर.टी. इत्यस्य तैः प्रदत्तसामग्रीणां परामर्शानां च कृते हार्दिककृतज्ञतां प्रकटयामः ।

वयं (स्व.) दीपकबनर्जी, प्रोफेसरः (प्राप्तावकाशः), प्रेसीडेन्सी-कॉलेज,कोलकाता इत्यनेन प्रदत्तानां परामर्शानां कृते तं प्रति कृतज्ञभावं प्रकटयामः ।

नैके शिक्षकाः विभिन्नप्रकारेण एतस्मिन् पुस्तके योगदानं कृतवन्तः । कान्ताबन्सलः, उप-प्राचार्या, केन्द्रीय-विद्यालयः न.2. मिल्टिरी-हॉस्पीटल-रोड, बेलगाम-छावनी, बेलगामः, कर्णाटक; रेनू-देशमना,टी.जी.टी. (सामाजिक-विज्ञानम्) केन्द्रीय-विद्यालयः न.2, दिल्लीछावनी, गुरुग्राममार्गः, दिल्ली; नलिनी-पद्मनाभनः, पी.जी.टी.(अर्थशास्त्रम्) डी.टी.ई.ए. वरिष्ठमाध्यमिकविद्यालयः, जनकपुरी, नवदेहली इत्येतैः उपर्युक्तैः यत् साहाय्यं कृतं तदर्थं तेषां कृते कृतज्ञभावं प्रकटयामः । केन्द्रीयविद्यालयः, सेक्टर-47,चण्डीगढम् इत्यस्य छात्राणां शिक्षकाणां च द्वारा प्रदत्ताः प्रतिपुष्टि-प्रतिक्रियादयः एतस्य पुस्तकस्य संशोधनाय महत्त्वपूर्णाः आसन् ।

एच.के.गुप्ता,सी-78,सूजमल-विहारः, दिल्ली; ओ.पी.अग्रवालः डी-12 द्वितीयतलम्, कालकाजी, नवदेहली; लीनासिंहः, पी.जी.टी.(अर्थशास्त्रम्), केन्द्रीयविद्यालयः, ए.जी.सी.आर.दिल्ली तथा च रमेशचन्द्रः, ए-56,डीडी.ए.फ्लैट,कटवारिया-सरायः, नवदेहली इत्येतेषां समीक्षासमितेः उपर्यक्तसदस्यानां कृते वयं कृतज्ञताभावं प्रकटयामः ये अनुवादस्य पुनरीक्षणाय आयोजितकार्यशालासु भागं गृहीतवन्तः अपि च बहुमूल्यसाहाय्यं कृतवन्तः । परिषद् तेषां निम्नलिखित-जनानां सङ्घटनानां पुस्तकलेखकानाम् अभिगाराणां च कृते अपि कृतज्ञताभावं प्रकटयति ये अस्मभ्यः अनुमतिं प्रदत्तवन्तः यतः वयं चित्राणि तेभ्यः तेभ्यः स्थानेभ्यः प्राप्तवन्तः अपि च तेषाम् उपयोगम् अपि कृतवन्तः - जॉन-ब्रेमेनः पार्थिवशाह इत्यनयोः वर्किंग इन द मिल नो मोर, ऑक्सफोर्ड यूनिवर्सिटी प्रेस, दिल्ली-सेण्टर-फॉर-एजुकेशन-एण्ड-कम्युनिकेशन, दिल्ली-फोरम; निरन्तरम्, दिल्ली अनन्तिः च, गुजरातः; शुभलक्ष्मी, दिल्ली, अम्बुजसोनी, देवासः, मध्यप्रदेशः; करेन-हेडॉक, चण्डीगढम्; अपि च एम.वी.श्रीनिवासनः, डी.ई.एस.एस.एच., प्रेस-सूचना-ब्यूरो.सूचना-प्रसारण-मन्त्रालयः; विस्तारनिदेशालयः, कृषिमन्त्रालयः ; भारी-उद्योग-सार्वजनिक-उद्यम-मन्त्रालयः मद्रासपोर्ट-ट्रस्ट, चैन्नै-सीताराम-भरतिया-विज्ञान-अनुसन्धान-संस्थानम्, नवदेहली ।

वयम् एतस्मिन् प्रयुक्तानां वार्तापत्र-कर्तित-अंशानां कृते "द हिन्दु, एवं च टाइम्स-ऑफ-इण्डिया" इत्यस्य ऋणिनः स्मः । सवितासिन्हा, प्रोफेसरः अध्यक्षश्च, सामाजिक-विज्ञान-मानविकी-शिक्षा-विभागस्य तेन प्रदत्ताय सहयोगाय च वयं तस्मै धन्यवादं

विज्ञापयामः। पाण्डुलिपीनां निरीक्षणाय अपि च तत्र आवश्यकपरिवर्तनाय परामर्शदानाय वन्दना आर.सिंहाय, परामर्श-सम्पादकाय विशेषरूपेण धन्यवादं विज्ञापयामः ।

एतस्य पुस्तकस्य सज्जीकरणाय परिषद् डी.टी.पी.ऑपरेटर, मुकदद्स-आजमः, मोहमम्द-हारून-रशिदः, ऋतुशर्मा; दिनेशकुमारसिंहः कम्प्यूटर-कक्ष-प्रभारी ; प्रशासनिक-कर्मचारी डी.ई.एस.एस.एच; कॉपी-एडीटर, विनयशंकरपाण्डेयः, सतीशझा यः संपादकीययोगदानं कृतवान् इत्येतेषाम् उपर्युक्तानां सर्वेषां कृते धन्यवादं विज्ञापयति । अन्ततः प्रकाशनविभागः, एन.सी.ई.आर.टी इत्यनेन कृतानां प्रयासानां कृते तस्यै कृतज्ञताभावं विज्ञापयति ।

विषय-सूची

आमुखम् – iii

शिक्षकाणां कृते केचन परिचयात्मकाः विषयाः v

अध्यायः 1

विकासः 2

अध्यायः 2

भारतीयार्थव्यवस्थायाः क्षेत्रकाणि 18

अध्यायः 3

मुद्रा अथ च ऋणोद्-ग्रहण-प्रमाणपत्रम् (साख) 38

अध्यायः 4

वैश्वीकरणम् एवं च भारतीया अर्थव्यवस्था 54

अध्यायः 5

उपभोक्तृणाम् अधिकाराः 74

परामर्शात्मकाः पाठाः 92

शिक्षकाणां कृते निर्देशाः

प्रथमः अध्यायः - विकासः

विकासस्य अनेके पक्षाः सन्ति इति एतम् एव विचारं विद्यार्थिनः अवगच्छेयुः इति अस्य अध्यायस्य उद्देश्यम् अस्ति। जनानां विकासस्य विषये पृथक् पृथक् धारणाः सन्ति एवं च एतादृशाः उपायाः सन्ति यैः वयं विकासस्य सामूहिकसूचकाङ्कान् ज्ञातुं शक्नुमः इति अवबोधनं तेषां कृते आवश्यकम् अस्ति । एतत्कृते अस्माभिः एतादृशीनां स्थितीनां प्रयोगः कृतः अस्ति यासु ते सहजबुद्ध्या प्रतिक्रियां दर्शयितुं शक्नुवन्ति। अस्माभिः एतादृशानि विश्लेषणानि अपि दत्तानि सन्ति येषां प्रकृतिः अधिका जटिला एवं च बृहती अस्ति।

द्वितीयः प्रश्नः अस्ति यत् देशानां राज्यानां च तुलना केषाञ्चन चितानां विकाससूचकाङ्कानाम् आधारेण कथं कर्तुं शक्यते इति अस्य अध्ययनं विद्यार्थिनः अस्मिन् अध्याये करिष्यन्ति। आर्थिकविकासस्य मापनं कर्तुं शक्यते एवं च आयः अस्य मापनस्य कश्चन विधिः अस्ति । यद्यपि आयद्वारा विकासमापनस्य विधिः उपयोगी अस्ति परन्तु अस्य केचन दोषाः अपि सन्ति। अतः वयं जीवनस्य गुणवत्तया एवं च धारणीयतया सदृशानां नूतनानां सूचकाङ्कानां प्रयोगं कुर्याम इति आवश्यकम् अस्ति।

भवतां कृते इयम् अपेक्षा आवश्यकी अस्ति यत् विद्यार्थिनः उपर्युक्तविषयम् अधिकृत्य सक्रियप्रतिक्रियां प्रदर्शयेयुःइति।अस्मिन्विषयेविद्यार्थिनांमतेषुपर्याप्तभेदः भवितुं शक्नोति । अस्मिन् विवादः अपि सम्भवितुं शक्नोति। विद्यार्थिनः स्वस्वमतं प्रस्तोतुम् अनुज्ञापयन्तु। प्रत्येकं खण्डस्य अन्ते केचन प्रश्नाः क्रियाविधयः च दत्ताः सन्ति । एतेषाम् उद्देश्यद्वयम् अस्ति । प्रथमम् - ते अस्मिन् भागे चर्चितविचारान् संक्षेपेण बोधयन्ति ।

द्वितीयम् - ते विद्यार्थिनः वास्तविकजीवनपरिस्थितीनां निकटे आनीय एतान् विचारान् समीचीनतररीत्या अवबोद्धुक्षमान् कुर्वन्ति।

अस्मिन् अध्याये केषाञ्चन शब्दानां प्रयोगः कृतः अस्ति येषां स्पष्टीकरणम् आवश्यकम् अस्ति । यथा प्रतिव्यक्ति आयः, साक्षरतामितिः, शिशुमृत्युमितिः, उपस्थितिमितिः, जीवनप्रत्याशा, सकलनामाङ्कनानुपातः एवं च मानवविकाससूचकाङ्कः । एतैः शब्दैः सम्बद्धानि विवरणानि दत्तानि सन्ति । एतानि पूर्णतः अवगन्तुम् एतेषां विस्तरेण अध्ययनम् आवश्यकम् अस्ति। भवद्भिः क्रयशक्तिसमतायाः अवधारणा अपि स्पष्टीकरणीया भविष्यति यस्याः १.६तालिकायां प्रतिव्यक्ति आयस्य गणनायै प्रयोगः कृतः अस्ति। एतद् आवश्यकम् अस्ति यत् एतेषां शब्दानां प्रयोगः चर्चायां साहाय्यार्थं भवेत् न हि कण्ठस्थीकरणाय।

सूचनायाः स्रोतांसि

अस्य अध्यायस्य कृते विवरणानि भारतशासनद्वारा प्रकाशितात् आर्थिकसर्वेक्षणात्, संयुक्तराष्ट्रसंघ-विकासकार्यक्रमस्य मानवविकासप्रतिवेदनात् अथ च विश्वबैङ्कद्वारा (विश्ववाकाससूचकाङ्कः) प्रकाशितप्रतिवेदनात् गृहीतानि सन्ति । एतेषां प्रतिवेदनानां प्रकाशनं प्रतिवर्षं क्रियते । यदि भवतां विद्यालयस्य पुस्तकालये एतानि प्रतिवेदनानि सन्ति तर्हि एतेषाम् अवलोकनं वरं भविष्यति। नास्ति चेत् भवन्तः एतेषां संस्थानानां जालपुटानि द्रष्टुं शक्नुवन्ति -- (www.budgetindia.nic.in, www.undp.org, www.worldbank.org)। विवरणानि भारतीयरिजर्वबैङ्कस्य हैण्डबुक ऑफ स्टेटिसटिक्स ऑन इण्यन इकानॉमी इति नामके पुस्तके अपि उपलब्धानि सन्ति। एतदर्थं भवन्तः www.rbi.org इति एतत् जालपुटम् अपि गन्तुं शक्नुवन्ति।

अध्यायः - 1

विकासः

विकासस्य अथवा प्रगतेः धारणा सदारभ्यः अस्माभिः सह विद्यते। अस्माकम् आकाङ्क्षाः एवं च इच्छाः सन्ति यत् वयं किं कर्तुम् इच्छामः एवं च स्वजीवनं केन प्रकारेण जीवितुम् इच्छामः ? अनेन एव प्रकारेण वयं विचारयामः यत् कश्चन देशः कीदृशः भवेत् ? अस्माकं कृते केषाम् अनिवार्यवस्तूनाम् आवश्यकता अस्ति ? किं सर्वेषां जीवनं भद्रतरं भवितुं शक्नोति? जनाः सहृदयतया कथं वसितुं शक्नुवन्ति ? किम् इतोऽपि आर्थिकसमानता भवितुं शक्नोति ? विकासः एतेषु सर्वेषु प्रश्नेषु विचारणेन एवं च एतेषां लक्ष्याणां प्राप्त्युपायैः सह सम्बद्धः अस्ति। एतत् कार्यं जटिलम् अस्ति।

अस्मिन् अध्याये वयं विकासावबोधनस्य प्रक्रियायाः आरम्भं करिष्यामः। भवन्तः उच्चकक्ष्यासु एतान् विषयान् अधिकगहनतया शिक्षिष्यन्ते। तदतिरिक्तम् एतादृशानां बहूनां प्रश्नानाम् उत्तराणि भवन्तः अर्थशास्त्रे एव न प्रत्युत इतिहासस्य एवं च राजनीतिविज्ञानस्य पाठ्यक्रमे अपि प्राप्स्यन्ति। यतो हि वयम् अद्य अतीतेन प्रभावितं जीवनं जीवन्तः स्मः इति कारणात् एवम् अस्ति। एतस्य ज्ञानेन विना वयं परिवर्तनस्य इच्छां न कर्तुं शक्नुमः। अनेन एव प्रकारेण वयं केवलं लोकतान्त्रिक-राजनैतिकप्रक्रियायाः द्वारा एव आशाः सम्भावनाः च वास्तविकजीवने प्राप्तुं शक्नुमः।

मां विना ते विकासं कर्तुं न शक्नुवन्ति...अस्यां व्यवस्थायां मम विकासः न भवितुं न शक्नोति।

विकासः किं वचनं करोति - विभिन्नव्यक्तयः विभिन्नलक्ष्याणि

वयम् एतां कल्पनां कर्तुं प्रयासं कुर्याम यत् १.१तालिकायां दत्तायाः सूच्याः अनुसारं जनानां कृते विकासस्य कः अर्थः भवितुं शक्नोति? तेषां काः आकाङ्क्षाः सन्ति ? भवन्तः द्रक्ष्यन्ति यत् केचन स्तम्भाः अपूर्णतया पूरिताः सन्ति । एतां तालिकां पूरयितुं प्रयत्नं कुर्वन्तु। भवन्तः इच्छन्ति चेत् कासाञ्चन अन्यासां श्रेणीनां व्यक्तीः संयोजयितुं शक्नुवन्ति।

तालिका १.१ विभिन्नश्रेणीनां जनानां विकासस्य लक्ष्याणि

व्यक्तेः श्रेणी	**विकासस्य लक्ष्याणि / आकाङ्क्षाः**
भूमिहीनग्रामीणश्रमिकाः	कार्यकरणस्य अधिकानि दिनानि एवं च उत्तमपारिश्रमिकम्, स्थानीयविद्यालयाः तेषां बालेभ्यः उत्तमशिक्षाप्रदाने सक्षमाः, नास्ति कश्चन सामाजिकभेदभावः, ग्रामे अपि ते नेतारः भवितुं शक्नुवन्ति।
पञ्जाबस्य समृद्धकृषकाः	कृषकेभ्यः तेषाम् उत्पादनार्थम् अधिकसमर्थनमूल्यानां परिश्रमिणाम् अल्पमूल्यवतां च श्रमिकाणां द्वारा उच्चपारिवारिकायस्य सुनिश्चयनं येन ते स्वीयान् बालान् विदेशेषु स्थापयितुं शक्नुयुः।
ते कृषकाः ये कृषिनिमित्तं केवलं वृष्टिम् आश्रयन्ति	
भूस्वामिकुटुम्बस्य काचित् ग्रामीणमहिला	
नगरस्य अवृत्तिकः युवकः	
नगरस्य धनिककुटुम्बस्य कश्चन युवकः	
नगरस्य धनिककुटुम्बस्य काचित् युवतिः	सा स्वीयभ्रातुः सदृशीं स्वतन्त्रतां लभते अपि च सा स्वयं निर्णयं कर्तुं शक्नोति। सा स्वीयशिक्षां विदेशे कर्तुं शक्नोति।
नर्मदोपत्यकायाः कश्चन आदिवासी	

१.१ तालिकायाः पूर्त्यनन्तरं भवन्तः अस्याः निरीक्षणं कुर्वन्ति। किम् एतेषां जनानां विकासस्य अथवा प्रगतेः विषये समानविचारः अस्ति ? सम्भवतः न। एतेषु एकैकः पृथक् पृथक् वस्तु प्राप्तुम् इच्छति। ते तादृशानि वस्तूनि इच्छन्ति यानि तेषां कृते सर्वाधिकं महत्त्वपूर्णानि सन्ति अर्थात् तानि वस्तूनि यानि तेषाम् आकाङ्क्षाः इच्छाः च पूर्णाः कर्तुं शक्नुवन्ति। वस्तुतः बहुधा द्वौ जनौ अथवा द्वे दलम् एतादृशानि वस्तूनि एष्टुं शक्नुतः येषु परस्परं विरोधः भवितुं शक्नोति। काचित् बाला आशां करोति यत् सा स्वीयभ्रातुः सदृशीं स्वतन्त्रतां प्राप्नुयात् अपि च

अवसरान् प्राप्नुयात् एवं च भ्राता गृहस्य कार्येषु साहाय्यं कुर्यात् इति। भवितुं शक्नोति यत् भ्रात्रे एतत् न रोचेत। अनेन एव प्रकारेण अधिकविद्युत्प्राप्त्यर्थम् उद्योगपतयः अधिकान् जलबन्धान् इच्छन्ति। परन्तु अस्मात् भूमिः जलमग्ना भवितुं शक्नोति एवं च तेषां जनानां जीवनम् अव्यवस्थितं भवितुं शक्नोति ये अगृहाः स्युः यथा आदिवासिनः। ते अस्य विरोधं कर्तुं शक्नुवन्ति। भवितुं शक्नोति यत् तेभ्यः स्वीयक्षेत्राणां सेचनार्थं लघवः चैकबन्धाः अथवा तडागाः रोचेरन्।

आयः एवं च अन्यानि लक्ष्याणि

यदि भवन्तः पुनः एकवारं १.१तालिकां द्रक्ष्यन्ति तर्हि एकं विषयं समानरूपेण प्राप्स्यन्ति। जनाः इच्छन्ति यत् ते नियमितकार्यं समीचीनतरं पारिश्रमिकम् एवं च स्वीयोत्पादनस्य अथवा अन्येषाम् उत्पादानां कृते समीचीनमूल्यानि प्राप्नुयुः। अन्यशब्देषु ते अधिकम् आयम् इच्छन्ति। केनापि प्रकारेण अधिकायस्य कामनायाः अतिरिक्तं जनाः समानव्यवहारं स्वतन्त्रतां सुरक्षाम् एवं च अन्येभ्यः सम्मानम् अपि इच्छन्ति। ते भेदभावात् अप्रसन्नाः भवन्ति। एतानि सर्वाणि महत्त्वपूर्णलक्ष्याणि सन्ति। अपरतः केषुचित् प्रकरणेषु एतानि अधिकायात् एवं च अधिकोपभोगात् अधिकमहत्त्वपूर्णानि भवितुं शक्नुवन्ति। यतो हि जीवनाय केवलं भौतिकवस्तूनि एव पर्याप्तानि न भवन्ति। अनेन प्रकारेण तथ्यद्वयं स्पष्टम् अस्ति। तत्र प्रथमम् अस्ति यत् पृथक् पृथक् जनानां कृते विकासस्य लक्ष्याणि भिन्नानि भवितुं शक्नुवन्ति। द्वितीयम् अस्ति यत् कस्मैचित् यत् विकासरूपेण अस्ति तद् अन्यस्य कृते विकासरूपेण व स्यात्। अपि च तद् अन्यस्य कृते विनाशकारि अपि भवितुं शक्नोति।

द्रव्यम् अथवा तद्द्वारा क्रेतव्यानि भौतिकवस्तूनि किञ्चन कारकं सन्ति यस्मिन् अस्माकं जीवनम् आश्रितम् अस्ति। परन्तु अस्माकं भद्रतरं जीवनम् उपरि लिखितानि अभौतिकवस्तूनि अपि आश्रयति। यदि भवन्तः एतं विषयं स्पष्टतया न अवगच्छन्ति तर्हि निजजीवने निजमित्राणां भूमिकायाः विषये विचारं कुर्वन्तु। भवन्तः तेषां मित्रताम् एष्टुं शक्नुवन्ति। अनेन एव प्रकारेण इतोऽपि बहूनि वस्तूनि सन्ति येषां सरलतया मापनं न कर्तुं शक्यते परन्तु तेषाम् अस्माकं जीवने बहुमहत्त्वम् अस्ति। एतेषां प्रायः उपेक्षा क्रियते। परन्तु अयं निष्कर्षः असमीचीनः भविष्यति यत् यस्य मापनं न कर्तुं शक्यते तस्य महत्त्वं नास्ति इति।

नर्मदानद्यां सरदारसरोवरस्य जलबन्धस्य औन्नत्यवर्धनस्य वरुद्धं प्रदर्शनम्।

एकम् अन्यद् उदाहरणं पश्यन्तु । यदि भवन्तः कुत्रचित् दूरस्थक्षेत्रे वृत्तिं प्राप्नुवन्ति तर्हि तस्याः वृत्तेः स्वीकरणात् पूर्वं भवन्तः आयम् अतिरिच्य अन्येषां बहूनां कारकाणां विषये विचारं करिष्यन्ति ।

यथा भवतां कुटुम्बस्य कृते कानि सौविध्यानि उपलब्धानि भविष्यन्ति ? कार्यस्य वातावरणं कीदृशं भविष्यति ? अधिगमस्य के अवसराः सन्ति ? अपरस्यां वृत्तौ भवन्तः यद्यपि न्यूनं वेतनं प्राप्नुवन्ति परन्तु सा नियमितवृत्तिः भवितुं शक्नोति । येन भवतां सुरक्षाभावना वर्धते । काचित् अन्या वृत्तिः अधिकवेतनं दातुं शक्नोति परन्तु कार्यस्य सुरक्षां न ।

अपि च भवितुं शक्नोति यत् भवन्तः कुटुम्बस्य कृते पर्याप्तसमयम् अपि न प्राप्नुयुः । अस्मात् भवतां सुरक्षायाः स्वतन्त्रतायाः भावना न्यूनीभविष्यति ।

अनेन एव प्रकारेण विकासार्थं जनाः सम्मिश्रितानि लक्ष्याणि पश्यन्ति । एतत् सत्यम् अस्ति यत् यदि महिलाः वेतनभोगिकार्यं कुर्वन्ति तर्हि गृहे समाजे च तासां सम्मानः वर्धते । तथापि एतत् अपि सत्यम् अस्ति यत् यदि महिलानां सम्मानः अस्ति तर्हि गृहे तासां कार्येषु अधिकं साहाय्यं करिष्यते अपि च गृहात् बहिः कार्याणि कुर्वत्यः महिलाः अधिकतया स्वीकरिष्यन्ते । सुरक्षितसंरक्षितवातावरणस्य कारणात् अधिकतरमहिलाः विविधवृत्तीः व्यापारान् वा कर्तुं शक्नुवन्ति । अतः जनानां विकासलक्ष्याणि केवलं समीचीनतरायस्य एव न भवन्ति अपि तु जीवने अन्येषां महत्त्वपूर्णवस्तूनां विषये अपि भवन्ति ।

आगच्छन्तु एतेषु विचारं कुर्याम -

१. पृथक् पृथक् जनानां विकासस्य विषये अवधारणाः भिन्नाः भिन्नाः किमर्थं सन्ति ? अधः दत्तासु व्याख्यासु कतमा व्याख्या अधिकमहत्त्वपूर्णा अस्ति किमर्थं च ?
   (क) यतो हि जनाः भिन्नाः भवन्ति ।
   (ख) यतो हि जनानां जीवनस्य परिस्थितयः भिन्नाः सन्ति ।
२. किम् अधः दत्तयोः द्वयोः कथनयोः अर्थः समानः अस्ति । कारणसहितम् उत्तरं यच्छन्तु ।
   (क) जनानां विकासलक्ष्याणि भिन्नानि भवन्ति ।
   (ख) जनानां विकासलक्ष्येषु परस्परं विरोधः भवति ।
३. कतिपयानि एतादृशानि उदाहरणानि यच्छन्तु यत्र आयस्य अतिरिक्तम् अन्यानि कारकाणि अस्माकं जीवनस्य महत्त्वपूर्णपक्षाः सन्ति ।
४. उपरि दत्तस्य खण्डस्य कांश्चन विषयान् निजभाषया बोधयन्तु ।

राष्ट्रियविकासः

यथा अस्माभिः उपरि दृष्टं यत् यदि जनानां लक्ष्याणि भिन्नानि सन्ति तर्हि तेषां राष्ट्रियविकासस्य विषये धारणा अपि भिन्ना भविष्यति । भारतस्य विकासाय किं करणीयम् इति अस्मिन् विषये परस्परं चर्चां कुर्वन्तु ।

सम्भवम् अस्ति यत् कक्ष्यायाः विभिन्नविद्यार्थिनः उपर्युक्तप्रश्नानां भिन्नानि भिन्नानि उत्तराणि दत्तवन्तः स्युः। सम्भवम् अस्ति यत् भवन्तः अपि एतेषां प्रश्नानां बहूनि उत्तराणि चिन्तितवन्तः स्युः तेषु अपि कस्यचित् एकस्य विषये भवन्तः स्वयम् अपि निश्चितमताः न स्युः एतत् अवगमनम् अतीव आवश्यकम् अस्ति यत् देशस्य विकासस्य विषये विभिन्नजनानां धारणाः भिन्नाः अथवा परस्परं विरोधिन्यः भवितुं शक्नुवन्ति ।

परन्तु किं सर्वेभ्यः विचारेभ्यः समानं महत्त्वं दातुं शक्यते ? अथवा यदि परस्परं विरोधिनः सन्ति तर्हि निर्णयः कथं क्रियेत ? सर्वेषां कृते न्यायपूर्णः एवं च उचितः पन्थाः कः भविष्यति ? अस्माभिः एतत् अपि चिन्तनीयं भविष्यति यत् कार्यकरणस्य कश्चन उत्तमः विधिः अस्ति ? किम् अनेन विचारेण बहूनां जनानां लाभः भविष्यति अथवा केषाञ्चन एव ? राष्ट्रियविकासस्य अभिप्रायः एतेषु सर्वेषु प्रश्नेषु विचारणम् अस्ति ।

आगच्छन्तु एतेषु विचारं कुर्याम --

निम्नलिखितस्थितिषु विचारं कुर्वन्तु --

१. दक्षिणतः दत्तं चित्रं पश्यन्तु। एतादृशक्षेत्रस्य विकासात्मकलक्ष्याणि कानि भवेयुः ?

२. अस्य वार्तापत्रस्य वृत्तं पठित्वा प्रदत्तानां प्रश्नानाम् उत्तराणि यच्छन्तु।

कश्चन जलपो ५००टनपरिमितान् विषाक्तान् द्रवावशेषान् कस्यचित् नगरस्य मुक्तावकरगृहे एवं च निकटवर्तिसमुद्रे क्षिप्तवान्। एतत् दक्षिणाफ्रीकादेशस्य आयिवरीकोस्टे अबिदजाननगरे अभवत्। एतेभ्यः सङ्कटकरेभ्यः विषाक्तावशेषेभ्यः निर्गतधूमात् जातानां कुस्वदनं (जी मितलाना) चर्मणि स्फोटनं मूर्च्छनम् एवं च अतिसारः इत्यादेः दूषणानि कृतानि। एकमासानन्तरं सप्त जनाः मृत्युं प्राप्ताः विंशतिः जनाः चिकित्सालये प्रवेशिताः एवं च विषाक्ततायाः कारणात् २६,०००जनानाम् उपचारः कृतः।

शिलातैलैन धातुभिः च सम्बद्धेन केनचित् बहुराष्ट्रियसमवायेन आयिवरीकोस्टस्य कस्मैचित् स्थानीयसमवायाय स्वीयजलपोतात् विषाक्तपदार्थान् क्षेप्तुं निविदा दत्ता आसीत्।



(क) केषां जनानां लाभः अभवत् केषां जनानां च लाभः न अभवत् ?

(ख) अस्य देशस्य विकासात्मकलक्ष्याणि कानि भवेयुः ?

३. भवतां ग्रामस्य अथवा नगरस्य अथवा स्थानीयक्षेत्रस्य विकासात्मकलक्ष्याणि कानि भवेयुः ?

क्रियाविधिः1

यदि विकासस्य धारणायाम् एव भिन्नता एवं च परस्परं विरोधः भवितुं शक्नोति तर्हि निश्चितरूपेण विकासस्य विधिषु अपि भिन्नता भवितुं शक्नोति। यदि भवन्तः एतादृशेन केनचित् विवादेन परिचिताः सन्ति

तर्हि भवन्तः विभिन्नव्यक्तीनां तर्कान् ज्ञातुं प्रयासं कुर्वन्तु। भवन्तः जनैः सह सम्भाषणं कृत्वा अथवा वार्तापत्राणां दूरदर्शनस्य च माध्यमेन भवन्तः एतत् ज्ञातुं शक्नुवन्ति।

विभिन्न देशानाम् अथवा राज्यानां तुलना कथं क्रियेत ?

भवन्तः प्रष्टुं शक्नुवन्ति यत् यदि विकासस्य अर्थः भिन्नः भिन्नः भवितुं शक्नोति तर्हि केचन देशाः विकसिताः सन्ति केचन देशाः च अविकसिताः सन्ति इति कथं कथयितुं शक्यते ? अस्य विषयस्य प्रारम्भात् पूर्वं वयम् अन्यप्रश्नस्य विषये चिन्तनं कुर्मः।

यदा वयं भिन्नभिन्नवस्तूनां तुलनां कुर्मः तर्हि तेषु समानता विषमता इति उभे भवितुं शक्नुतः । वयम् एतेषां मध्ये तुलनां कर्तुं केषां पक्षाणां प्रयोगं कुर्मः ? कक्ष्यायां विद्यार्थिनः एव पश्यामः । वयं विभिन्नविद्यार्थिनां तुलनां कथं कुर्मः ? तेषु औन्नत्यं स्वास्थ्यं प्रतिभा एवं च रुचिः इति एतेषाम् अनुसारं भेदः अस्ति। सम्भवम् अस्ति यत् सर्वाधिकस्वस्थाः विद्यार्थिनः उत्तमाः पठनशीलाः न स्युः । सम्भवम् अस्ति यत् सर्वाधिकबुद्धिमान् विद्यार्थी मित्रतायाः व्यवहारेण युक्तः न स्यात् । तेन वयं विद्यार्थिनां तुलनां कथं कुर्मः ? वयं यस्य मापदण्डस्य प्रयोगं करिष्यामः स तुलनायाः उद्देश्ये आश्रितः भविष्यति । क्रीडादलं वादविवाददलं सङ्गीतदलम् अथवा भ्रमणदलम् इति एतेषां सर्वेषां कृते भिन्नाः भिन्नाः मापदण्डाः भविष्यन्ति। तथापि यदि वयं केनचित् उद्देश्येन कक्ष्यायाः विद्यार्थिनां सर्वाङ्गीणप्रगत्याः विषये मानकानि इच्छामः तर्हि वयं तदीयचयनं कथं करिष्यामः ?

सामान्यतः वयं व्यक्तीनाम् एकां महत्त्वपूर्णां विशिष्टताम् अथवा द्वे महत्त्वपूर्णे विशिष्टते आदाय तदाधारेण तुलनां कुर्मः । तुलनार्थं कासां महत्त्वपूर्णविशिष्टतानां चयनं करणीयम् इति अस्मिन् विषये विवादाः भवितुं शक्नुवन्ति । विद्यार्थिनां मित्रतापूर्णव्यवहारः सहयोगभावना तेषां रचनात्मकता अथवा तैः प्राप्ताः अङ्काः ?

अयम् एव विषयः विकाससन्दर्भे अपि प्रसक्तः भवति । **देशानां तुलनां कर्तुं तेषाम् आयः सर्वाधिका महत्त्वपूर्णा विशिष्टता मन्यते । येषां देशानाम् आयः अधिकः** अस्ति ते देशाः अल्पायदेशानाम् तुलनायाम् अधिकविकसिताः सन्ति इति मन्यते। एतत् अस्मिन् अवबोधे अश्रितम् अस्ति यत् अधिकायस्य अर्थः मानवीयावश्यकतानां सर्वेषां वस्तूनाम् अधिकता । यद् अपि जनेभ्यः रोचते अपि च यद् अपि तेषां पार्श्वे भवेत् तत् सर्वं ते अधिकायस्य द्वारा प्राप्तुं शक्ष्यन्ति । अतः अधिकः आयः आत्मना महत्त्वपूर्णं लक्ष्यं मन्यते अधुना कस्यचित् देशस्य आयः कः अस्ति ?

अन्तर्दृष्ट्या कस्यचित् देशस्य आयः तद्देशस्य सर्वेषां निवासिनाम् आयः अस्ति । अनेन वयं देशस्य समग्रम् आयं जानीमः परन्तु देशानां मध्ये तुलनां कर्तुं समग्रः आयः तावान् उपयुक्तः मापः नास्ति । यतो हि देशानां जनसंख्या भिन्ना भिन्ना भवति । समग्रायस्य तुलनया वयम् एतत् न ज्ञास्यामः यत् मध्यमानः जनः किम् अर्जयितुं शक्नोति ? किं कस्यचित् देशस्य जनाः अपरदेशस्य जनेभ्यः कुशलतराः सन्ति ? अतः वयं मध्यमानस्य आयस्य तुलनां कुर्मः यो हि देशस्य समग्रम् आयं समस्तजनसंख्यया विभक्तं कृत्वा प्राप्यते । मध्यमानः आयः **प्रतिव्यक्ति आयः** इत्यपि कथ्यते।

विश्वबैङ्कस्य विश्वविकासप्रतिवेदनस्य अनुसारं देशानां वर्गीकरणे अस्य मापदण्डस्य प्रयोगः कृतः अस्ति। ते देशाः येषां २०१३तमे वर्षे प्रतिव्यक्ति आयः यूएस् $१२७३६मितः प्रतिवर्षम् अथवा ततः अपि अधिकः अस्ति, समृद्धदेशाः कथिताः एवं च ते देशाः येषां प्रतिव्यक्ति आयः यूएस् $ १०४५मितः प्रतिवर्षम् अथवा ततः न्यूनः अस्ति, निम्नायदेशाः कथिताः । भारतं मध्यायवर्गीयदेशानां श्रेण्याम् अस्ति। यतो हि तस्य प्रतिव्यक्ति आयः २०१३तमे वर्षे केवलं यूएस् $ १५७०मितः प्रतिवर्षम् आसीत् । समृद्धदेशाः येषु मध्यपूर्ववर्तिदेशाः एवं च केचन अन्ये लघुदेशाः सम्मिलिताः न सन्ति, सामान्यतः विकसितदेशाः कथ्यन्ते ।

मध्यमानः आयः

यद्यपि मध्यमानः आयः तुलनार्थम् उपयोगी अस्ति तथापि एते असमानताः गोपयन्ति।

उदाहरणाय क ख इति देशद्वयस्य विषये विचारं कुर्मः। सरलतायै वयं मन्यामहे यत् प्रत्येकस्मिन् देशे पञ्च निवासिनः सन्ति। **१.२तालिकायां दत्तानां विवरणानाम् अनुसारम् उभयोः देशयोः मध्यमानम् आयं बोधयन्तु**

तालिका १.२ द्वयोः देशयोः तुलना

देशः	२०१२तमे वर्षे जनानां मासिकः आयः (रूप्यकेषु)					
	१	२	३	४	५	मध्यमानः
देशः क	९,५००	१०५००	९८००	१००००	१०२००	
देशः ख	५००	५००	५००	५००	४८०००	

किं भवन्तः एतयोः उभयोः देशयोः निवासं कृत्वा समानरूपेण सुखिनः भविष्यन्ति? किम् उभौ देशौ समानरूपेण विकसितौ स्तः? यदि एतद् अस्माकम् आश्वासनं भवेत् यत् वयं तद्देशस्य पञ्चमाः जनाः भविष्यामः तर्हि कदाचित् अस्मासु केचन जनाः ख-देशे निवासं कर्तुम् एषिष्यन्ति। परन्तु यदि अस्माकं नागरिकतासंख्या लॉटरीद्वारा निश्चिता भविष्यति तर्हि कदाचित् अस्मासु अधिकतरजनाः क-देशे निवासं कर्तुम् एषिष्यन्ति। यतो हि यद्यपि उभयोः देशयोः मध्यमानः आयः समानः अस्ति, क-देशस्य जनाः न तु बहुधनिकाः सन्ति नैव च बहुनिर्धनाः सन्ति। अपरतः ख-देशस्य अधिकतरजनाः निर्धनाः सन्ति एवं च एकः जनः बहुधनिकः अस्ति। अतः यद्यपि मध्यमानः आयः तुलनार्थम् उपयोगी अस्ति तथापि अनेन एतत् न ज्ञायते यत् अस्य आयस्य जनेषु केन प्रकारेण वितरणं कृतम् अस्ति?

निर्धनविहीनानां धनिकविहीनानां व्यक्तीनां देशः

निर्धनानां धनिकानां च व्यक्तीनां देशः

आगच्छन्तु एतेषु विचारं कुर्याम --

१. त्रीणि उदाहरणानि यच्छन्तु यत्र स्थितीनां तुलनार्थं मध्यमानस्य प्रयोगः क्रियते।

२. भवन्तः किमर्थं चिन्तयन्ति यत् मध्यमानः आयः विकासावगमनार्थं महत्त्वपूर्णमापदण्डः अस्ति? व्याख्यां कुर्वन्तु।

३. प्रतिव्यक्ति आयस्य मापस्य अतिरिक्तम् आयस्य कानि अन्यानि लक्ष्याणि सन्ति येषां द्वयोः देशयोः अथवा द्व्यधिकदेशानां तुलनार्थं महत्त्वम् अस्ति?

४. मन्यतां यत् अभिलेखैः एतत् प्रदर्श्यते यत् कस्यचित् देशस्य आयः समयेन सह वर्धमानः अस्ति। किम् अनेन वयम् एतं निष्कर्षं प्राप्तुं शक्नुमः यत् अर्थव्यवस्थायाः सर्वे भागाः समीचीनतराः जाताः सन्ति? स्वीयम् उत्तरम् उदाहरणेन सह यच्छन्तु।

५. विश्वविकासप्रतिवेदनम् २०१२ इत्यस्य अनुसारं निम्नायदेशानां प्रतिव्यक्ति आयं ज्ञातुं प्रयासं कुर्वन्तु।

६. एकम् अनुच्छेदं लिखन्तु यत् भारतं विकसितदेशः भवेत् इति एतदर्थं तेन (भारतेन) करणीयम् अथवा किं प्राप्तव्यम्?

आयः एवं च अन्ये मापदण्डाः

यदा वयं व्यक्तिगताकाङ्क्षाः व्यक्तिगतलक्ष्याणि चदृष्टवन्तः तदा प्राप्तं यत् जनाः केवलं समीचीनतरायस्य विषये एव न विचारयन्ति अपि तु ते निजसुरक्षायाः अन्येभ्यः सम्मानस्य एवं च समानतायाः व्यवहारस्य प्राप्तेः अथ च स्वतन्त्रतायाः सदृशानां लक्ष्याणां विषये अपि चिन्तयन्ति । अनेन एव प्रकारेण यदा वयं कस्यचित् देशस्य अथवा क्षेत्रस्य विषये चिन्तनं कुर्मः तदा मध्यमानस्य आयस्य अतिरिक्तम् अन्येषां महत्त्वपूर्णलक्षणानां विषये अपि चिन्तनं कुर्मः ।

एताः विशेषताः किं भवितुं शक्नुवन्ति ? अस्य निरीक्षणं वयम् एकेन उदाहरणेन कुर्मः । १.३तालिका केरल-महाराष्ट्र-बिहारस्य प्रतिव्यक्ति आयं दर्शयति । वस्तुतः एतानि विवरणानि २०१२-२०१३तमवर्षस्य वर्तमानमूल्येषु प्रतिव्यक्ति निवलराज्यगृहोत्पादस्य महाराष्ट्रं सर्वाधिकं विकसितं राज्यम् एवं च बिहारः न्यूनतमं विकसितं राज्यं मंस्यते । अधुना वयम् एतेषां त्रयाणां राज्यानाम् कानिचन अन्यानि १.४तालिकायां दत्तानि विवरणानि पश्यामः ।

तालिका 1.3 चयनितानां राज्यानां प्रतिव्यक्ति आयः

राज्यम्	2015-16 प्रतिव्यक्ति आयः (रूप्यकेषु)
महाराष्ट्रम्	1,62,034
केरलम्	1,55,516
बिहारम्	34,168

सन्ति अस्य जटिलशब्दस्य वास्तविकः अर्थः कः अस्ति इति इदानीं वयं त्यजामः । स्थूलदृष्ट्या वयम् एतं राज्यस्य प्रतिव्यक्ति आयरूपेण स्वीकर्तुं शक्नुमः । वयं पश्यामः यत् एतेषु त्रिषु राज्येषु महाराष्ट्रस्य प्रतिव्यक्ति आयः सर्वाधिकः अस्ति एवं बिहारस्य न्यूनतमः अस्ति ।

अस्य अर्थः अस्ति यत् मध्यमानेन महाराष्ट्रे एकः जनः एकस्मिन् वर्षे १,०७,६७०रूप्यकाणि अर्जयति अपरतः बिहारे मध्यमानेन सः केवलं २८,७७४रूप्यकाणि अर्जयितुं समर्थः भवति । अतः यदि विकासस्य मापनार्थं प्रतिव्यक्ति आयस्य प्रयोगः क्रियते तर्हि त्रीषु राज्येषु

तालिका १.४ महाराष्ट्रं केरलम् एवं च बिहारः इति त्रयाणां राज्यनां कानिचन तुलनात्मकविवरणानि

राज्यम्	**शिशुमृत्युमितिः प्रतिसहस्रजनम् (२०१२)**	**साक्षरतामितिः प्रतिशतम् (२०११)**	**निवलोपस्थितेःअनुपातः(प्रति १००जनाः)उच्चतरः(आयुः१४वर्षमितः एवं च १५वर्षमितः**
महाराष्ट्रम्	२५	८२	६४
केरलम्	१२	९४	७८
बिहारम्	४३	६२	३५

स्रोतः आर्थिकसर्वेक्षणम् २०१३-२०१४

(अ) अनन्तिमम्

अस्यां तालिकायां प्रयुक्तानां केषाञ्चन शब्दानां व्याख्या --

शिशुमृत्युमितिः -- कस्मिंश्चित् वर्षे जातेषु एकसहस्रसंख्याकेषु जीवितबालकेषु एकवर्षमितात् आयुषः पूर्वं मृत्युं प्राप्तानां बालानाम् अनुपातं दर्शयति ।

साक्षरतामितिः -- सप्तवर्षवयोमितेषु एवं च सप्ततः अधिकवयोमितेषु जनेषु साक्षरजनसंख्यायाः अनुपातः ।

निवलोपस्थितेः अनुपातः -- चतुर्दशवयोमिताम् अथवा पञ्चदशवर्षवयोमितां समस्तानां विद्यालयीयच्छात्राणां तस्य आयुर्वर्गस्य समस्तबालकैः सह प्रतिशतम् ।

इयं तालिका किं दर्शयति ? तालिकायाः प्रथमः स्तम्भः दर्शयति यत् केरले एकसहस्रसंख्याकेषु जीवितोत्पन्नेषु बालेषु द्वादश बालाः एकवर्षमितात् आयुषः पूर्वम् एव मृत्युं प्राप्नुवन्ति। परन्तु महाराष्ट्रे अयम् अनुपातः २५मितः अस्ति। अयं च अनुपातः केरलस्य तुलनायां द्विगुणाधिकः अस्ति। अपरतःमहाराष्ट्रस्यप्रतिव्यक्तिआयःकेरलात्अधिकःअस्ति। यथा १.३तालिकायां दर्शितम् अस्ति । चिन्तयन्तु तावत् यत् भवन्तः स्वीयमातापितृभ्यः कियन्तः प्रियाः सन्ति । चिन्तयन्तु यत् यदा कश्चन बालः जन्म लभते तदा जनाः कियन्तः प्रसन्नाः भवन्ति । अधुना एतादृशानां मातापितॄणां विषये चिन्तयन्तु येषां बालाः स्वीयप्रथमजन्मदिनात् पूर्वम् एव म्रियन्ते। एतादृशानां मातापितॄणां महद् दुःखं भवति एव। अपि च एतत् पश्यन्तु यत् एतानि विवरणानि कस्य वर्षस्य सन्ति ? यदि २०१२तमवर्षस्य सन्ति तर्हि वयं बहुपुरातनसमयस्य विषये चर्चांनकुर्वन्तःस्मः।एतत्अस्माकंस्वतन्त्रतायाः६५वर्षाणाम् अनन्तरं वार्ता अस्ति। यदा अस्माकं देशस्य विशालनगराणि उच्चैः भवनैः एवं च क्रयणार्थं मॉलापणैः पूर्णानि सन्ति ।

बहवः शिशवः प्राथमिकस्वास्थ्यस्य सुविधाः अपि प्राप्तुं न शक्नुवन्ति।

समस्यायाः समाप्तिः शिशुमृत्युमितौ एव न भवति । तालिकायाः अन्तिमस्तम्भः दर्शयति यत् बिहारस्य प्रायः २/३मिताः बालकाः नवमदशमकक्ष्ययोः न पठन्तः सन्ति अर्थात् यदि भवद्भिः बिहारस्य कस्मिंश्चित् विद्यालये अध्ययनं क्रियमाणम् अभविष्यत् तर्हि भवतां कक्षायाः २/३तः अधिकाः बालकाः लुप्ताः अभविष्यन्। यैः बालैः विद्यालये भवितव्यम् आसीत् ते तत्र न अभविष्यन्। यदि एतत् भवता सह अभविष्यत् तर्हि भवन्तः एतत् सर्वं न पठितुम् अशक्ष्यन् यत् इदानीं पठन्तः सन्ति।

सार्वजनिकसौविध्यानि

एवं किमर्थम् अस्ति यत् महाराष्ट्रे मध्यमानस्य जनस्य आयः केरलस्य मध्यमानस्य जनस्य आयात् अधिकः अस्ति परन्तु एतेषु महत्त्वपूर्णक्षेत्रेषु तत् केरलात् पृष्ठे अस्ति ? अस्य कारणम् एतत् अस्ति यत् एतद् आवश्यकं नास्ति यत् धनस्यूते स्थापितेन रूप्यकेण तानि सर्वाणि वस्तूनि एवं च सेवाः क्रेतुं शक्यन्ते येषां भद्रतरजीवनार्थम् आवश्यकता भवितुं शक्नोति जनाः कति भौतिकवस्तूनि सेवाः च प्रयोक्तुं शक्नुवन्ति इति एतदर्थं भवन्तः स्वयं सम्पूर्णतया पर्याप्तसूचकत्वेन न सन्ति । उदाहरणार्थं सामान्यरूपेण भवतां धनेन प्रदूषणमुक्तवातावरणं न क्रेतुं शक्यते अथवा मिश्रणरहितानि औषधानि न दापयितुं शक्यन्ते । यावत्पर्यन्तं भवन्तः एतादृशे समुदाये एव निवासं कर्तुं न आरभन्ते यत्र एतानि सौविध्यानि पूर्वम् एव उपलब्धानि सन्ति। धनेन भवतां सङ्क्रामकरोगेभ्यः रक्षा न कर्तुं शक्यते। यावत् पर्यन्तं भवतां समस्तः समुदायः एतेभ्यः रक्षितुं प्रयासं न करोति।

वस्तुतः जीवने बहूनां महत्त्वपूर्णवस्तूनां कृते सर्वोत्तमः एवं च सर्वतः अल्पमूल्यवान् विधिः एतेषां वस्तूनां सेवानां च सामूहिकरूपेण सुलभायनम् अस्ति । चिन्तयन्तु तावत् यत् कस्यचित् स्थानीयक्षेत्रस्य कृते सामूहिकसुरक्षाप्रदानम् अधिकम् अल्पमूल्यवत् अस्ति अथवा प्रत्येकं गृहस्य कृते पृथक् पृथक् सुरक्षापुरुषस्य स्थापनम् ? भवन्तः किम् अकरिष्यन् यदि भवतां ग्रामे अथवा क्षेत्रे भवताम् अतिरिक्तं कोऽपि पठने रुचिमान् न अभविष्यत् ? किं भवन्तः पठितुं शक्ष्यन्ति ? कदाचित् तावत् पर्यन्तं न यावत् पर्यन्तं भवतां मातापितरः भवतः कस्मिंश्चित् नैजविद्यालये प्रेषयितुं समर्थाः न स्युः इति। यतो हि बहवः बालकाः पठितुम् इच्छन्ति एवं च बहवः जनाः मन्यन्ते यत् सर्वकारेण विद्यालयाः उद्घाटनीयाः एवं च अन्यविधसौविध्यानि सुलभायितव्यानि येन सर्वे बालाः पठनस्य अवसरान् प्राप्नुयुः इति अस्मात् कारणात् भवन्तः पठितुं समर्थाः सन्ति । अधुना अपि बहुषु क्षेत्रेषु बालाः मुख्यतया बालिकाः माध्यमिकस्तरीयां शिक्षाम् अपि सम्पूर्णतः प्राप्तुं विफलीभवन्ति यतो हि सर्वकारेण अथवा समाजेन एतेषां कृते पर्याप्तसौविध्यानि न सुलभायितानि सन्ति

केरले मृत्युमितिः न्यूना अस्ति यतो हि अत्र स्वास्थ्यस्य शिक्षायाः च मौलिकसौविध्यानि पर्याप्तमात्रायाम् उपलब्धानि सन्ति अनेन एव प्रकारेण केषुचित् राज्येषु सार्वजनिकवितरणप्रणाली सम्यक्तया कार्यं करोति। एतादृशेषु राज्येषु जनानां स्वास्थ्यम् एवं च पोषणस्तरः निश्चितरूपेण भद्रतरौ भविष्यतः इति सम्भावना अस्ति।

आगच्छन्तु एतेषु विचारं कुर्याम --

१. १.३ तालिकायाः एवं च १.४ तालिकायाः विवरणानि पश्यन्तु। किं महाराष्ट्रं बिहारात् साक्षरतामित्यादेः विषये तावत् एव अग्रे अस्ति यावत् प्रतिव्यक्ति आयस्य विषये ?

२. एतादृशानि अन्यानि उदाहरणानि चिन्तयन्तु यत्र वस्तूनां सेवानां च सुलभायनं व्यक्तिगतस्तरस्य अपेक्षया सामूहिकस्तरे अधिकम् अल्पमूल्यम् अस्ति।

३. किम् उत्तमस्वास्थ्यस्य एवं च शिक्षासौविध्यानाम् उपलब्धता केवलं सर्वकारद्वारा एतेषां सौविध्यानां कृते कृतं व्ययम् एव आश्रयति ? अन्यानि कानि कारकाणि प्रासङ्गिकानि भवितुं शक्नुवन्ति ?

४. तमिलनाडौ ग्रामीणक्षेत्राणां प्रतिशतं ७५मिताः जनाः अन्नवितरणापणानां प्रयोगं कुर्वन्ति। अपरतः झारखण्डे केवलं प्रतिशतं ८मिताः ग्रामीणनिवासिनः अस्य प्रयोगं कुर्वन्ति। कुत्रत्यजनानां जीवनं भद्रतरं भविष्यति किमर्थं च ?

क्रियाविधिः २

१.५तालिकायाः अवधानपूर्वकम् अध्ययनं कृत्वा अधः दत्तेषु अनुच्छेदेषु रिक्तस्थानानि पूरयन्तु। भवितुं शक्नोति यत् एतदर्थं भवद्भिः तालिकायाः आधारेण काचित् गणना करणीया भवेत्

तालिका १.५ उत्तरप्रदेशस्य ग्रामीणजनसंख्यायाः शैक्षिकोपलब्धेः श्रेणी

श्रेणी	पुरुषः	महिला
ग्रामीणजनसङ्ख्यायाः साक्षरतामितिः	70%	54%
10-14 वर्षाणां ग्रामीणबालानां साक्षरतामितिः	90%	87%
10-14 वर्षाणां विद्यालयं गन्तॄणां ग्रामीणबालानां प्रतिशतम्	85%	82%

(क) सर्वेषाम् आयुर्वर्गाणां साक्षरतामितिः यस्यां युवकाः एवं च वृद्धाः इति उभौ सम्मिलितौ स्तः, ग्रामीणपुरुषाणां कृते .....मिता आसीत् एवं च ग्रामीणमहिलानां कृते .....मिता आसीत्। बहवः वयस्काः विद्यालयम् एव न गन्तुम् अशक्तवन्तः इत्येतद् एव न अपि तु ..... अस्मिन् समये विद्यालये एव न सन्ति।

(ख) अनया तालिकया स्पष्टम् अस्ति यत् प्रतिशतं.....मिताः ग्रामीणबालिकाः एवं च प्रतिशतं .....मिताः ग्रामीणबालकाः विद्यालयं न गच्छन्ति। अतः दशतः चतुर्दशवयोमितेषु बालकेषु प्रतिशतं .....मिताः ग्रामीणबालिकाः एवं च प्रतिशतं ..... मिताः ग्रामीणबालकाः निरक्षराः सन्ति।

(ग) अस्माकं स्वतन्त्रतायाः षष्टिवर्षाणाम् अनन्तरम् अपि ..... आयुर्वर्गे इयम् उच्चस्तरीया निरक्षरता बहुचिन्ताकरी अस्ति। बहुषु अन्यराज्येषु अपि आ चतुर्दशवयोमितानां बालकानां निःशुल्कायाः अनिवार्यायाः च शिक्षायाः प्रदानस्य संवैधानिकलक्ष्यस्य समीपे अपि न सम्प्राप्ताः स्मः। अपरतः एतत् लक्ष्यं १९६०तमवर्षं यावत् पूरणीयम् आसीत्।

क्रियाविधिः ३

किं वयस्कः अल्पपोषितः इति ज्ञातुम् एकः विधिः अस्ति। अयं विधिः पोषणवैज्ञानिकःशरीरद्रव्यमत्सूचकाङ्कः(वी.एम.आई.)इति कथ्यते। अस्य गणना सरला अस्ति। कस्यचित् जनस्य भारं किलोग्राममानेन स्वीकुर्वन्तु। ततः परं तस्य दीर्घतां मीटरमानेन स्वीकुर्वन्तु। ततः परं भारं दीर्घतायाः वर्गेण विभक्तं कुर्वन्तु। यदि इयं संख्या १८.५तः न्यूना अस्ति तर्हि सः जनः अल्पपोषितः कथयिष्यते। परन्तु यदि इयं संख्या २५तः अधिका अस्ति तर्हि सः जनः अतिभारितः अस्ति। परन्तु स्मरणं भवेत् यत् अयं मापदण्डः वर्धमानानां बालकानां विषये प्रसक्तः न भवति। कक्षायां प्रत्येकं विद्यार्थिनः एवं च त्रयाणां व्यस्कानां भारस्य एवं च औन्नत्यस्य मापनं कुर्वन्तु। एतदर्थं पृथक् पृथक् आर्थिकपृष्ठभूमेः वयस्कानां चयनं कुर्वन्तु यथा निर्माणकार्येषु निरताः श्रमिकाः गृहेषु कार्याणि कुर्वन्तः सेवकाः कार्यालयेषु कार्यं कुर्वन्तः जनाः एवं च व्यापारिणः इत्यादयः।

सर्वेभ्यः विद्यार्थिभ्यः एतानि विवरणानि एकत्रीकृत्य एकां संयुक्ततालिकां निर्मान्तु ततः परं तेषां शरीरद्रव्यमत्सूचकाङ्कस्य गणनां कुर्वन्तु। किं भवन्तः जनस्य आर्थिकपृष्ठभूमेः एवं च तस्य पोषणस्तरस्य मध्ये कञ्चन सम्बन्धं प्राप्नुवन्ति ?

मानवविकासप्रतिवेदनम्

यद्यपि आयस्य स्तरः महत्त्वपूर्णः अस्ति परन्तु अयं विकासस्तरस्य मापनाय पर्याप्तमापदण्डः नास्ति इति एतत् तथ्यं यदि बुद्धिस्थं भवति तर्हि वयम् अन्येषां मापदण्डानां विषये चिन्तयितुम् आरप्स्यामहे। एतादृशानां मापदण्डानां सूची दीर्घा भवितुं शक्नोति। परन्तु सा तावती उपयोगिनी न भविष्यति। अस्माकं कृते अधिकमहत्त्वपूर्णवस्तूनाम् अल्पसंख्यायाम् आवश्यकता अस्ति। स्वास्थ्यस्य शिक्षायाः च सूचकानि यथा अस्माभिः केरलमहाराष्ट्रयोः तुलनार्थं प्रयुक्तानि आसन्। एतादृशेषु एव सूचकेषु सम्मिलितानि सन्ति। विगते प्रायः आयेन सह व्यापकस्तरे विकासस्य मापनार्थं प्रयोगः कर्तुम् आरब्धः। उदाहरणार्थं यू.एन.डी.पी. द्वारा प्रकाशितं मानवविकासप्रतिवेदनं देशानां तुलनां जनानां शैक्षिकस्तरं तेषां स्वास्थ्यस्थितिम् एवं च प्रतिव्यक्ति आयम् आधारीकृत्य करोति।भारतस्य तस्य च प्रतिवेशिदेशस्य २०१४तस्य मानवविकासप्रतिवेदनस्य केषाञ्चन सम्बद्धविवरणानाम् अवलोकनं रुचिकरं भविष्यति।

तालिका १.६ २०१३ तमवर्षस्य कृते भारतस्य तस्य च प्रतिवेशिदेशानां कानिचन आङ्किकविवरणानि

देशाः	सकलराष्ट्रिय आयः प्रतिव्यक्ति अमेरिकीयडॉलरमानेन (२०११क्रयशक्तिक्षमता)	जन्मसमये सम्भावितम् आयुः (२०१३)	साक्षरतामितिः पञ्चदशाधिकवर्षवयोमितायाः जनसंख्यायाः कृते २००५-२०१२	विश्वे मानवविकाससूचकाङ्कस्य क्रमाङ्कः (HDI) (२०१३)
श्रीलङ्का	९२५०	७४.३	९१.२	७३
भारतम्	५१५०	६६.४	६२.८	१३५
म्याम्मारः	३९९८	६५.२	९२.७	१५०
पाकिस्तानम्	४६५२	६६.६	५४.९	१४६
नेपालः	२१९४	६८.४	५७.४	१४५
बङ्गलादेशः	२७१३	७०.७	५७.७	१४२

टिप्पणी स्रोतः मानवविकासप्रतिवेदनम्

१. HDI इत्युक्ते मानवविकाससूचकाङ्कः इति भवति। उपरि दत्तायां तालिकायां मानवविकाससूचकाङ्कस्य क्रमाङ्कः समग्रेषु १७७ देशेषु अस्ति।

२. जन्मनः समये सम्भावितम् आयुः इति नाम्ना एव स्पष्टम् अस्ति यत् व्यक्तेः जन्मसमये मध्यमानसय आयुषः सम्भावनां दर्शयति।

३. प्रतिव्यक्ति आयस्य गणना सर्वेषां देशानां डॉलरमानेन क्रियते येन तस्य गणना कर्तुं शक्येत। अयम् अनेन विधिना अपि क्रियते यत् एकडॉलरमुद्रया कस्मिंश्चिद् अपि देशे समानमात्रायां वस्तूनां सेवानां च क्रयणं कर्तुं शक्येत।

किम् एतत् आश्चर्यजनकं नास्ति यत् अस्माकं प्रतिवेशस्य लघुः देशः श्रीलङ्का सर्वस्मिन् क्षेत्रे भारतस्य अग्रे अस्ति एवं च अस्य विशालदेशस्य भारतस्य विश्वे एतावान् निम्नक्रमः अस्ति ? इयं तालिका एतत् अपि दर्शयति यत् यद्यपि नेपालस्य प्रतिव्यक्ति यः भारतस्य तुलनायाम् अर्धात् न्यूनः अस्ति तथापि सः भारतात् आयुष्सम्भावितायाः एव साक्षरतास्तरस्य विषये बहुपृष्ठे नास्ति। मानवविकाससूचकाङ्कस्य परिकलनाय अनेके परिष्काराः अनुशंसिताः सन्ति । मानवविकासप्रतिवेदने बहवः नूतनाः घटकाः योजिताः सन्ति। परन्तु मानवस्य विकासात् पूर्वम् अयं विषयः स्पष्टीकृतः अस्ति यत् विकासः महत्त्वपूर्णः अस्ति । कस्यचित् देशस्य नागरिकैः सह किं जायमानम् अस्ति। जनानां स्वास्थ्यम् एवं च तेषां कल्याणं सर्वाधिकम् आवश्यकम् अस्ति किं भवन्तः चिन्तयन्ति यत् मानवविकासस्य मापनार्थं केचन इतोऽपि पक्षाः विचारणीयाः ?

विकासस्य धारणीयता

वयम् अस्य विकासस्य परिभाषां केनापि रूपेण कुर्याम परन्तु अधुना स्वीकुर्याम यत् कश्चन विशेषदेशः पर्याप्तरूपेण विकसितः अस्ति। वयं निश्चितरूपेण एषिष्यामः यत् विकासस्य अयं स्तरः इतोऽपि उन्नतः भवेत् अथवा भाविवंशस्य कृते अयं स्तरः यथावत् भवेत् । अयं स्पष्टरूपेण वाञ्छनीयः अस्ति । परन्तु विंशशताब्द्याः आ उत्तरार्द्धात् बहवः वैज्ञानिकाः एतत् पूर्वज्ञापनं कुर्वन्तः सन्ति यत् विकासस्य वर्तमानप्रकारः एवं च स्तरः धारणीयः नास्ति।

अस्माभिः विश्वम् अस्माकं पूर्वजेभ्यः उत्तराधिकाररूपेण न प्राप्तम् अस्ति । एतत् अस्माभिः निजबालेभ्यः ऋणरूपेण स्वीकृतम् अस्ति ।

अधुना वयम् एतस्य निम्नोदाहरणैः अधिगन्तुं प्रयासं करिष्यामः

प्रथमम् उदाहरणम् -- भारते भूमिगतं जलम्

सद्यस्तनैः प्रमाणैः स्पष्टं भवति यत् देशस्य अनेकभागेषु भूमिगतजलस्य अत्युपयोगात् गम्भीरसंकटम् अस्ति। ३००जनपदेभ्यः सूचना प्राप्ता अस्ति यत् तत्र विगतेषु विंशतिवर्षेषु जलस्य स्तरे चतुर्मीटरतः अधिका अपचितिः जाता अस्ति । देशस्य प्रायः १/३मितः भागः भूमिगतजलभण्डाराणाम् अत्युपयोगं कुर्वन् अस्ति। यदि अस्य साधनस्य प्रयोगस्य वर्तमानः विधिः प्रवर्तमानः भवति तर्हि आगामिषु पञ्चविंशतिवर्षेषु देशस्य प्रतिशतं षष्टिमितः भागः अस्य साधनस्य अत्युपयोगं करिष्यति । "भूमिगतजलस्य अत्युपयोगः विशेषरूपेण पञ्जाबस्य एवं च उत्तरप्रदेशस्य कृषिदृष्ट्या समृद्धक्षेत्रेषु मध्यदक्षिणभारतस्य शैलक्षेत्रेषु अथ च अधित्यकाक्षेत्रेषु केषुचित् तटवर्तिक्षेत्रेषु एवं च द्रुतगत्या विकसत्सु निवासेषु दृश्यते।"



१. भवन्तः एवं किमर्थं चिन्तयन्ति यत् जलस्य अत्युपयोगः जायमानः अस्ति ?

२. किम् अत्युपयोगं विना विकासः भवितुं शक्नोति ?

भूमिगतजलं नवीकरणीयसाधनस्य उदाहरणम् अस्ति।

सस्यपादपानाम् इव एतेषां साधनानां पुनः पूर्तिं प्रकृतिः करोति। परन्तु अत्र अपि वयम् एतेषां साधनानाम् अत्युपयोगं कर्तुं शक्नुमः। उदाहरणार्थं यदि वयं भूमिगतजलस्य वृष्टिद्वारा जायमानायाः पुनःपूर्तेः अधिकप्रयोगं कुर्मः तर्हि वयम् अस्य साधनस्य अत्युपयोगं कुर्मः।

अनवीकरणीयसाधनानि तानि सन्ति यानि वर्षाणि यावत् कृतस्य प्रयोगस्य अनन्तरं समाप्तिं गच्छन्ति। एतेषां संसाधनानां भूमौ निश्चितः संग्रहः अस्ति अपि च एतेषां पुनःपूर्तिः न भवितुं शक्नोति। यदा कदा वयम् एतादृशानि नूतनानि साधनानि प्राप्नुमः येषां विषये अस्माकं किमपि पूर्वज्ञानं न आसीत्। नूतनस्रोतांसि संग्रहे वृद्धिं कुर्वन्ति। परन्तु समयेन सह एतानि अपि समाप्तिं गमिष्यन्ति।

उदाहरणार्थं वयं भूमितः यस्य असंशोधिततैलस्य निष्कासनं कुर्मः तत् अनवीकरणीयसंसाधनम् अस्ति। परन्तु वयं तैलस्य एतादृशं स्रोतः प्राप्तुं शक्नुमः यस्य विषये अस्माकं पूर्वज्ञानं न अस्ति। एतदर्थं सततम् अनुसन्धानं प्रवर्तमानं भवति। अधः दत्तां तालिकां पश्यन्तु।

द्वितीयम् उदाहरणम् -- प्राकृतिक संसाधनानां दोहनम्

असंशोधित तैलस्य कृते निम्न विवरणानि पश्यन्तु।

तालिका १.७ असंशोधिततैलस्य अतिरिक्तं संग्रहाः

क्षेत्राणि / देशाः	संग्रहाः (२०१३) (सहस्रमिलियनबैटलमानेन)	संग्रहाणां चलनावधिः (वर्षेषु)
मध्यपूर्वक्षेत्राणि	८०८.५	७८.१
संयुक्तराज्यामेरिका	४४.२	१२.१
विश्वम्	१६८७.९	५३.३

स्रोतः बी.पी. स्टैटिस्टीकल रिव्यू ऑफ वर्ल्ड एनर्जी, जूनमासः २०१४

इयं तालिका असंशोधिततैलस्य संचयानाम् अनुमानं (प्रथमः स्तम्भः) दर्शयति। अधिकं महत्त्वपूर्णम् एतत् अस्ति यत् इयं तालिका बोधयति यत् यदि असंशोधिततैलस्य प्रयोगः वर्तमानमितौ प्रवर्तमानः भवेत् तर्हि एते संचयाः कति वर्षाणि चलिष्यन्ति। एतत् समस्तविश्वस्य कृते अस्ति। परन्तु पृथक् पृथक् देशानां पृथक् पृथक् स्थितयः सन्ति। एते संचयाः केवलं ४६ वर्षेषु समाप्ताः भविष्यन्ति। भारतसदृशाः येषां तैलस्य पर्याप्तसंचयाः न सन्ति, अस्य आयातम् आश्रिताः सन्ति। तैलस्य मूल्यानि वर्धन्ति तर्हि प्रत्येकं मनुष्ये प्रभावितः भवति।

संयुक्तराज्यामेरिकासदृशाः केचन देशाः सन्ति येषां पार्श्वे संचयाः तु न्यूनाः सन्ति परन्तु ते एतत् सैन्यबलेन एवं च आर्थिकशक्त्या प्राप्तुम् इच्छन्ति। विकासस्य धारणीयतया सह सम्बद्धः प्रश्नः अस्य प्रकृतेः एवं च प्रक्रियायाः विषये अनेकान् अन्यान् नूतनान् मौलिकान् प्रश्नान् उत्थापयति।

१. किं कस्यचित् देशस्य विकासप्रक्रियायाः कृते असंशोधिततैलम् अनिवार्यम् अस्ति ? चर्चां कुर्वन्तु।

२. भारतेन असंशोधिततैलस्य आयातः करणीयः भवति। उपर्युक्तस्थितौ सन्दर्भे भवन्तः भारतस्य कृते भाविसमये कासां समस्यानां पूर्वानुमानं कुर्वन्ति ?



पर्यावरणे अपचितेः परिणामाः राष्ट्रियसीमानां राज्यसीमानां च अवधानं न कुर्वन्ति। एतत् किञ्चन क्षेत्रम् अथवा देशगतविषयः न अस्ति। अस्माकं सर्वेषां भविष्यं परस्परं सम्बद्धम् अस्ति विकासस्य धारणीयता तुलनात्मकस्तरे ज्ञानस्य नूतनक्षेत्रम् अस्ति यस्मिन् वैज्ञानिकाः अर्थशास्त्रिणः दार्शनिकाः एवं च अन्ये सामाजिकवैज्ञानिकाः मिलित्वा कार्यं कुर्वन्तः सन्ति। विकासस्य अथवा प्रगतेः प्रश्नः सर्वस्मिन् काले क्रियमाणः प्रश्नः अस्ति। यतो हि वयं समाजस्य सदस्याः स्मः अतः सर्वस्मिन् समये व्यक्तिस्तरे अयं प्रश्नः आवश्यकः अस्ति यत् वयं कुत्र गन्तुम् इच्छामः वयं किं भवितुम् इच्छामः अपि च अस्माकं लक्ष्याणि कानि सन्ति ? अतः विकासम् उद्दिश्य वादप्रतिवादः सततं वर्तते

अभ्यासः

१. सामान्यतः कस्यचित् देशस्य विकासस्य निर्धारणं केन आधारेण कर्तुं शक्यते --
   (क) प्रतिव्यक्ति आयः
   (ख) मध्यमानः साक्षरतास्तरः
   (ग) जनानां स्वास्थ्यस्थितिः
   (घ) उपर्युक्ताः सर्वे

२. निम्नलिखितेषु प्रतिवेशिदेशेषु मानवविकासस्य दृष्ट्या कस्य देशस्य स्थितिः भारतात् भद्रतरा अस्ति ?
   (क) बाङ्ग्लादेशः
   (ख) श्रीलङ्का
   (ग) नेपालः
   (घ) पाकिस्तानम्

३. मन्यन्तां यत् कस्मिंश्चित् देशे चत्वारः कुटुम्बाः सन्ति। एतेषां कुटुम्बानां प्रतिव्यक्ति आयः ५०००रूप्यकमितः अस्ति। यदि त्रयाणां कुटुम्बानाम् आयः क्रमशः ४०००, ७००० एवं च ३००० अस्ति तर्हि चतुर्थस्य कुटुम्बस्य आयः कियान् अस्ति ?
   (क) ७,५००
   (ख) ३,०००
   (ग) २,०००
   (घ) ६,०००

४. विश्ववित्तकोषः विभिन्नवर्गाणां वर्गीकरणार्थं कस्य प्रमुखमापदण्डस्य प्रयोगं करोति ? किम् अस्य मापदण्डस्य काश्चन सीमाः सन्तियदि सन्ति तर्हि ताः ज्ञापयन्तु।

५. विकासमापनस्य यू.एन.डी.पी. इति नामकः मापदण्डः केषु पक्षेषु विश्ववित्तकोषस्य मापदण्डात् भिन्नः अस्ति ?

६. वयं मध्यगतस्य मानस्य प्रयोगं किमर्थं कुर्मः? एतेषां प्रयोगस्य किं कापि सीमा अस्ति ? विकासेन सम्बद्धानि उदाहरणानि दत्त्वा स्पष्टं कुर्वन्तु।

७. यद्यपि प्रतिव्यक्ति आयः न्यूनः भवति तथापि केरलस्य मानवविकासक्रमाङ्कः महाराष्ट्रात् उन्नतः अस्ति। अतः प्रतिव्यक्ति आयः कश्चन उपयोगी मापदण्डः अस्ति एव न एवं च राज्यानां तुलनायै अस्य उपयोगः न करणीयः। किं भवन्तः सहमताः सन्ति ? चर्चां कुर्वन्तु।

८. भारतस्य जनानां द्वारा ऊर्जायाः केषां स्रोतसां प्रयोगः क्रियते ? ज्ञातुं प्रयासं कुर्वन्तु। इतः ५०वर्षाणां पश्चात् काः सम्भावनाः भवितुं शक्नुवन्ति ?

९. धारणीयतायाः विषयः विकासाय किमर्थं महत्त्वपूर्णः अस्ति ?

१०. भूमौ सर्वेषां जनानाम् आवश्यकतानां पूर्तये पर्याप्तसंसाधनानि सन्ति परन्तु एकस्य अपि जनस्य लोभं पूरयितुं पर्याप्तसं साधनं नास्ति। एतत् कथनं विकासस्य चर्चासन्दर्भे कथं प्रासङ्गिकम् अस्ति ? चर्चां कुर्वन्तु।

११. पर्यावरणे अपचितेः केषाञ्चन एतादृशानाम् उदाहरणानां सूचीं निर्मान्तु यानि भवद्भिः स्वनिकटे दृष्टानि स्युः।

१२. १.६तालिकायां प्रदत्ताय प्रत्येकं मानाय ज्ञातं कुर्वन्तु यत् कः देशः सर्वोपरि अस्ति एवं च कः देशः सर्वतः अधः अस्ति ?

१३. अधः दत्तायां तालिकायां भारते अल्पपोषितवयस्कानाम् अनुपातः दर्शितः अस्ति । अयं २००१तमे वर्षे देशस्य विभिन्नराज्यानां देशस्य विभिन्नराज्यानाम् एकस्मिन् सर्वेक्षणे आधारितः अस्ति । तालिकायाः अध्ययनं कृत्वा निम्नलिखितानां प्रश्नानाम् उत्तराणि यच्छन्तु ।

राज्यानि	**पुरुषाः (%)**	**महिलाः (%)**
केरलम्	२२	१८
कर्णाटकम्	३४	३६
मध्यप्रदेशः	४२	३८
सर्वाणि राज्यानि	**३४**	**३३**

स्रोतः आई.एच.आर.डी., २०११ पृष्ठम्२६९

(क) केरलस्य अथ च मध्यप्रदेशस्य जनानां पोषणस्तरस्य तुलनां कुर्वन्तु ।

(ख) किं भवन्तः अनुमानं कर्तुं शक्नुवन्ति यत् देशस्य प्रायः १/३ मिताः जनाः अल्पपोषिताः किमर्थं सन्ति यद्यपि अयं तर्कः दीयते यत्देशे पर्याप्तं खाद्यम् अस्ति ? स्वशब्दैः विवरणं यच्छन्तु ।

अतिरिक्तपरियोजना अथवा क्रियाविधिः

स्वक्षेत्रस्य विकासस्य विषये चर्चायै त्रीन् भिन्नवक्तॄन् आमन्त्रयन्ताम् । स्वमस्तिष्के जायमानान् सर्वान् प्रश्नान् तान् पृच्छन्तु । एतेषां विचाराणां समूहेषु चर्चां कुर्वन्तु । प्रत्येकं समूहः एकस्य भित्त्यारेखस्य निर्माणं कुर्यात् यस्मिन् कारणसहितं तेषां विचाराणाम् उल्लेखं करणीयः यैः विचारैः भवन्तः सहमताः अथवा असहमताः सन्ति ।

शिक्षकाणां कृते निर्देशाः

द्वितीयः अध्यायः भारतीयार्थव्यवस्थायाः क्षेत्रकाणि

वयं कामपि अर्थव्यवस्थाम् उत्तमरीत्या तदैव अवगन्तुं शक्नुमः यदा अस्याः घटकानाम् अथवा क्षेत्रकाणाम् अध्ययनं कुर्मः । क्षेत्रकाणां वर्गीकरणम् अनेकमापदण्डानाम् आधारेण कर्तुं शक्यते । अस्मिन् अध्याये त्रिविधानि वर्गीकरणानि चर्चितानि सन्ति-- प्राथमिक-द्वितीयक-तृतीयकवर्गीकरणानि, संघटितासंघटितवर्गीकरणानि एवं च नैजसार्वजनिकवर्गीकरणानि । भवन्तः दैनिकजीवने छात्रैः परिचितैः उदाहरणानां द्वारा एतेषां वर्गीकृतक्षेत्राणां विषये चर्चां कर्तुं शक्नुवन्ति । क्षेत्रकाणां परिवर्तमानायाः भूमिकायाः विशेषेण प्रतिपादनम् आवश्यकम् अस्ति । सेवाक्षेत्रकाणां तीव्रसंवृद्धिं प्रति छात्राणाम् अवधानाकर्षणं कुर्वन्तः पुनः एतेषाम् अवलोकनं कर्तुं शक्यते । अस्मिन् अध्याये प्रस्तुतधारणानां
विस्तारेण व्याख्यासमये राष्ट्रियः आयः एवं च वृत्तिः इत्यादीनां कासाञ्चन मौलिकावधारणानाम् अवगमनं भवेत् इति आवश्यकता भवितुं शक्नोति । यतो हि छात्राः एतत् अवगन्तुं समस्याम् अनुभवितुं शक्नुवन्ति । अतः उदाहरणैः एतेषां स्पष्टीकरणम् आवश्यकम् अस्ति । छात्राणां सुगमबोधाय सहायकाः अनेके क्रियाविधयः एवं च अभ्यासाः अस्मिन् अध्याये दत्ताः सन्ति । कस्याश्चिद् व्यक्तेः कार्यं कथं प्राथमिक-द्वितीयक-तृतीयकक्षेत्रकेषु अथवा संघटितासंघटितक्षेत्रकेषु अथवा नैजसार्वजनिकक्षेत्रकेषु स्थापयितुं शक्यते । छात्राणां निकटवर्तिजनैः (आपणानां स्वामिनः, अनियतश्रमिकाः, शाकविक्रेतारः, कार्यशालायान्त्रिकः, गृहसेवकाः इत्यादिभिः) सह वार्तालापं कर्तुं ते कथं निवसन्ति कथं च कार्यं कुर्वन्ति इत्यस्य विषये अपि च इतः अपि अधिकस्य विषये सूचनां प्राप्तुं प्रोत्साहितं कर्तुं शक्नुवन्ति । एतासां सूचनानाम् आधारेण आर्थिकगतिविधीनां स्वयं वर्गीकरणं कर्तुं छात्राः प्रोत्साहितव्याः ।

क्षेत्रकाणां भूमिकायां परिवर्तनात् जायमानाः समस्याः किञ्चन अन्यं प्रकरणम् अस्ति यस्य विषये अवधानम् आवश्यकम् अस्ति । अस्मिन् अध्याये अनाजीविका एवं च तस्याः निवारणार्थं शासनं किं कर्तुं शक्नोति इति अस्य उदाहरणानि दत्तानि सन्ति । कृषेः न्यूनीभूयमानं महत्त्वम् एवं च उद्योगानाम् अथ च सेवानां वर्धमानं महत्त्वं छात्राणां दैनिकजीवनस्य अनुभवेभ्यः गृहीतैः अधिकाधिकैः उदाहरणैः सह योजनीयम् । एतदर्थं संचारमाध्यमानां द्वारा प्राप्तानां सूचनानां प्रयोगः कर्तुं शक्यते । भवन्तः छात्रान् वार्तापत्राणां महत्त्वपूर्णानि कर्तनानि विवरणानि च आनेतुं प्रोत्साहयितुं शक्नुवन्ति । येषां कथापटलेषु प्रदर्शनं कर्तुं शक्येत एवं च येषां विषये चर्चा कर्तुं शक्येत असंघटितक्षेत्रकस्य विषये चर्चासमये कार्यरतश्रमिकाणां संरक्षणसदृशं महत्त्वपूर्णं प्रकरणं विशेषेण प्रतिपादनीयम् । भवन्तः छात्रान् असंघटितक्षेत्रकाणां जनानाम् उद्योगानां च समीपं गत्वा तेषां वास्तविकजीवनपरिस्थितीनां साक्षात् अनुभवं प्राप्तुं प्रोत्साहयितुं शक्नुवन्ति ।

सूचनायाः स्रोतांसि

अस्मिन् अध्याये सकलगृहोत्पादस्य आङ्किकविवरणानि औद्योगिकोत्पादनमूल्यविनियोगे सकलगृहोत्पादेन सम्बद्धस्य २००४-२००५ तमवर्षस्य मूल्यस्य आधारे आर्थिकसर्वेक्षणात् गृहीतानि सन्ति । एतत् सकलगृहोत्पादेन एवं च भारतीयार्थव्यवस्थया सह सम्बद्धानाम् अन्यासां सूचनानां कृते महत्त्वपूर्णं स्रोतः अस्ति । मूल्याङ्कनं कर्तुं विशेषेण पाठकानां विश्लेषणक्षमतायाः विकासः भवेत् इति उद्देशेन शिक्षकाः अनेकवर्षाणाम् आङ्किकविवरणानि प्राप्तुम् आर्थिकसर्वेक्षणस्य उल्लेखं कर्तुं शक्नुवन्ति ।

आजीविकासम्बद्धानि आङ्किकविवरणानि राष्ट्रिय-प्रतिदर्शसर्वेक्षणसंघटनद्वारा आजीविकाम् अथ च अनाजीविकाम् अधिकृत्य कृतानां पञ्चवार्षिकसर्वेक्षणानाम् आङ्किकविवरणेषु आधारितानि सन्ति । राष्ट्रिय-प्रतिदर्शसर्वेक्षणसंघटनं भारतशासनस्य साङ्ख्यिकी योजनाकार्यक्रमकार्यान्वयन-मन्त्रालयान्तर्गतम् एकं संघटनम् अस्ति । अस्य जालपुटम् http:/mospi.nic.in द्रष्टुं शक्नुवन्ति । आजीविकासम्बद्धानि आङ्किकविवरणानि भारतस्य जनगणना इति एवम्प्रकारकेषु अन्यस्रोतसु अपि उपलब्धानि सन्ति ।

द्वितीयः अध्यायः

भारतीयार्थव्यवस्थायाः क्षेत्रकाणि

आर्थिककार्याणां क्षेत्रकाणि

अधः दत्तानि चित्राणि पश्यन्तु। भवन्तः द्रक्ष्यन्ति यत् जनाः विभिन्नेषु आर्थिकगतिविधिषु कार्यरताः सन्ति। एतेषु केचन गतिविधयः वस्तूनाम् उत्पादनं कुर्वन्ति। केचन अन्यासां सेवानां सर्जनं कुर्वन्ति। एते गतिविधयः अस्मान् परितः सर्वस्मिन् समये सम्पादिताः भवन्ति। अस्माकं भाषणे अपि सम्पादिताः भवन्ति। वयम् एतान् गतिविधीन् कथम् अवगन्तुं शक्नुमः ? एतेषाम् अवगमनस्य एकः विधिः अयम् अस्ति यत् केषाञ्चन महत्त्वपूर्णमानदण्डानाम् आधारेण एतेषां विभिन्नसमूहेषु वर्गीकरणं करणीयम्। एते समूहाः क्षेत्रकनाम्ना अपि ज्ञायन्ते। उद्देश्यस्य एवं च कस्यचित् महत्त्वपूर्णमानदण्डस्य आधारेण एतेषाम् अनेकप्रकारेण वर्गीकरणं कर्तुं शक्यते।

प्राथमिक क्षेत्रकम् (कृषिः)

प्राकृतिकवस्तूनि उत्पादयति

द्वितीयक क्षेत्रकम् (औद्योगिकम्)

विनिर्मितानि वस्तूनि उत्पादयति

प्राकृतिकसंसाधनानां प्रत्यक्षोपयोगे आधारिताः अनेके गतिविधयः सन्ति। यथा कार्पासस्य कृषिः। इयम् ऋतुकालिकं सस्यम् अस्ति। कार्पासस्य पादपानां वृद्धये

वयं विविधैः आर्थिकगतिविधिभिः प्रारम्भं कुर्मः

प्राकृतिककारकेषु आश्रिताः स्मः । अतः कार्पासः प्राकृतिकः उत्पादः अस्ति । अनेन एव प्रकारेण दुग्धोत्पादने वयं पशूनां जैविकप्रक्रियाम् अथ च पश्वाहारदेः उपलब्धताम् आश्रयामः । अतः अस्य उत्पादः दुग्धम् अपि प्राकृतिकः उत्पादः अस्ति। अनेन एव प्रकारेण खनिजानि अयस्कानि च अपि प्राकृतिकोत्पादाः सन्ति।

तृतीयकं क्षेत्रकम्



अन्यक्षेत्रकाणां विकासे साहाय्यं करोति

यदा वयं प्राकृतिकसंसाधनानाम् उपयोगं कृत्वा कस्यचित् वस्तुनः उत्पादनं कुर्मः तर्हि एतत् **प्राथमिकक्षेत्रकस्य** गतिविधिः इति कथ्यते। प्राथमिकं किमर्थम् ? यतो हि एतत् तेषां सर्वेषाम् उत्पादानाम् आधारः अस्ति येषां वयं क्रमशः निर्माणं कुर्मः। यतो हि वयम् अधिकतरान् प्राकृतिकोत्पादान् कृषिः दुग्धोत्पादनं मत्स्यनम् अथ च वनम् एति एतेभ्यः प्राप्नुमः । अतः एतत् क्षेत्रकं **कृषिसहायकक्षेत्रकम्** इति अपि कथ्यते।

द्वितीयक क्षेत्रकस्य गतिविधीनाम् अन्तर्गतं प्राकृतिकोत्पादानां विनिर्माणप्रणाल्याः माध्यमेन अन्यरूपेषु परिवर्तनं क्रियते । प्राथमिकक्षेत्रकस्य अनन्तरम् अयम् अग्रिमः पदक्षेपः अस्ति । अत्र वस्तूनि साक्षात् प्रकृतिः उत्पादितानि न भवन्ति । अपितु निर्मीयन्ते । अतः विनिर्माणस्य प्रक्रिया अपरिहार्या अस्ति । इयं प्रक्रिया कस्याञ्चित् शिल्पशालायां कस्याञ्चित् कार्यशालायाम् अथवा गृहे भवितुं शक्नोति । यथा कार्पासस्य पादपात् तन्तोः उपयोगं कृत्वा वयं कौशेयस्य कर्तनम् एवं च वस्त्रस्य निर्माणं कुर्मः । इक्षुदण्डस्य असंशोधितवस्तुनः रूपेण उपयोगं वयं **मुख्यतः न हि पूर्णतया** वृष्टिः सूर्यप्रकाशः एवं च जलवायुः इति एतेषु

कृत्वा वयं शर्करां गुडं च सज्जीकुर्मः । वयं मृत्तिकया इष्टिकानिर्माणं कुर्मः । इष्टिकाभिः गृहाणां भवनानां च निर्माणं कुर्मः। यतो हि एतत् क्षेत्रकं क्रमशः संवर्धितैः विभिन्नप्रकारैः उद्योगैः सह सम्बद्धम् अस्ति अतः एतत् **औद्योगिकक्षेत्रकम्** इति अपि कथ्यते।

प्राथमिक-द्वितीयकक्षेत्रकयो अतिरिक्तम् आर्थिकगतिविधीनां काचित् तृतीया श्रेणी अपि अस्ति। या **तृतीयकक्षेत्रकान्तर्गता** अस्ति एवं च उपर्युक्ताभ्यां द्वाभ्यां क्षेत्रकाभ्यां भिन्ना अस्ति । एते गतिविधयः प्राथमिक-द्वितीयकक्षेत्रकयोः विकासे साहाय्यं कुर्वन्ति। एते गतिविधयः स्वतः वस्तूनाम् उत्पादनं न कुर्वन्ति अपि तु उत्पादनप्रक्रियायां सहयोगम् अथवा साहाय्यं कुर्वन्ति । यथा प्राथमिक-द्वितीयकक्षेत्रकद्वारा उत्पादितवस्तूनि थोकखुदराविक्रेतृभ्यः विक्रेतुं ट्रकयानानां रेलयानानां च द्वारा परिवहनस्य आवश्यकता भवति। अस्माकं कृते उत्पादने एवं च व्यापारे सौविध्यं भवेत् इति एतदर्थं दूरभाषेण अपरैः जनैः सह वार्तालापं कर्तुम् अथवा पत्राचारमाध्यमेन अथवा वित्तकोषेभ्यः ऋणस्वीकरणस्य आवश्यकता भवति । परिवहनं संग्रहणं संचारः वित्तकोषसेवाः एवं च व्यापारः तृतीयकगतिविधीनां कानिचन उदाहरणानि सन्ति । यतो हि एते गतिविधयः वस्तूनां स्थाने सेवानां सर्जनं कुर्वन्ति अतः तृतीयकक्षेत्रकं **सेवाक्षेत्रकम्** इति अपि कथ्यते।

सेवाक्षेत्रके काश्चन एतादृश्यः अपरिहार्यसेवाः अपि सम्मिलिताः सन्ति याः प्रत्यक्षरूपेण वस्तूनाम् उत्पादने साहाय्यं न कुर्वन्ति। यथा अस्माकं कृते शिक्षकः चिकित्सकः रजकः नापितः चर्मकारः एवं च अधिवक्ता इति एवम्प्रकाराः व्यक्तिगतसेवासुलभायितृणाम् अथ च प्राशासनिक-लेखाकरणकार्यकर्तृजनानाम् आवश्यकता भवति । वर्तमानसमये सूचनाप्रौद्योगिकाधारिताः काश्चन नवीनाः सेवाः सन्ति यथा अन्तर्जालकेन्द्राणि एटीएमस्थानकानि वार्तालापकेन्द्राणि एवं च सॉफ्टवेयरसमवायाः इत्यादयः महत्त्वपूर्णाः जाताः सन्ति ।

यद्यपि आर्थिकगतिविधयः त्रिषु विभिन्नवर्गेषु विभाजिताः सन्ति तथापि एते बह्वधिकं परस्परम् आश्रिताः सन्ति। अस्माभिः कानिचन उदाहरणानि दीयमानानि सन्ति।

तालिका २.१ आर्थिकगतिविधीनाम् उदाहरणानि

उदाहरणम्	एतत् किं प्रदर्शितं करोति
कल्पनां कुर्वन्तु यत् यदि कस्मैचित् इक्षुदण्डसंयन्त्राय इक्षुदण्डं विक्रेतुं निषेधः क्रियेत तर्हि किं भविष्यति। इक्षुदण्डसंयन्त्रं पिहितं भविष्यति	एतत् द्वितीयकक्षेत्रकस्य अथवा औद्योगिकक्षेत्रकस्य उदाहरणम् अस्ति
कल्पनां कुर्वन्ति यत् यदि समवायाः भारतीयविपणिभ्यः कार्पासस्य विक्रयणं न कुर्युः एवं च अन्यदेशेभ्यः कार्पासायातस्य निर्णयं कुर्युः तर्हि कार्पासस्य कृषेः किं भविष्यति ? भारते कार्पासस्य कृषिः न्यूनलाभकारिणी भविष्यति एवं च यदि कृषकाः अन्यानि सस्यानि प्रति उन्मुखाः न भवन्ति तर्हि ते क्षीणसर्वस्वाः भवितुं शक्नुवन्ति तथा च कार्पासस्य मूल्यम् अपचितिं गमिष्यति।	
कृषकाःट्रैक्टर-पम्पसैट-विद्युत्-कीटमाशक-उर्वरकसदृशानि अनेकानि वस्तूनि क्रीणन्ति। कल्पनां कुर्वन्तु यत् यदि पम्पसैटानाम् उर्वरकाणां च मूल्यानि वर्धन्ते तर्हि किं भविष्यति ? कृषौ मूल्यविनियोगः वर्धिष्यते एवं च कृषकाणां लाभः न्यूनः भविष्यति।	
औद्योगिकक्षेत्रेषु सेवाक्षेत्रकेषु च कार्याणि कुर्वतां जनानां कृते भोजनम् आवश्यकं भवति । कल्पनां कुर्वन्तु यत् यदि परिवहनकर्मिणः कार्यबहिष्कारं कुर्वन्ति एवं च ग्रामीणक्षेत्रेभ्यः शाक-दुग्धादीनि नेतुं निषेधं कुर्वन्ति तर्हि किं भविष्यति ? नगरीयक्षेत्रेषु भोजनस्य न्यूनता भविष्यति एवं च कृषकाः स्वोत्पादान् विक्रेतुम् असमर्थाः भविष्यन्ति।	

आगच्छन्तु एतेषां विषये विचारं कुर्यामः --

१. विभिन्नक्षेत्रकाणां मिथः आश्रयतां दर्शयन्तः उपर्युक्तसारणीं पूरयन्तु।

२. पुस्तके वर्णितानाम् उदाहरणानाम् आधारेण प्राथमिक-द्वितीय-तृतीयकक्षेत्रकाणां मध्ये विद्यमानस्य भेदस्य व्याख्यां कुर्वन्तु।

३. निम्नलिखितव्यवसायानां प्राथमिक-द्वितीय-तृतीयकक्षेत्रकेषु विभाजनं कुर्वन्तु।

- सौचिकः
- कण्डोलवायः
- पुष्पकृषकः
- दुग्धविक्रेता
- धीवरः
- अर्चकः
- कॉरियरप्रापकः
- अग्निशलाकाशिल्पशालायां कार्यं कुर्वन् श्रमिकः
- महाजनः
- मालाकारः
- कुम्भकारः
- मधुमक्षिकापालकः
- अन्तरिक्षयात्री
- सम्पर्ककेन्द्रकर्मचारी

४. विद्यालयेषु छात्राणां प्रायः प्राथमिक-द्वितीयकवर्गयोः अथवा वरिष्ठकनिष्ठवर्गयोः विभाजनं क्रियते। अस्य विभाजनस्य निकषः कः अस्ति ? किं भवन्तः मन्यन्ते यत् एतद् विभाजनम् उपयुक्तम् अस्ति ? चर्चां कुर्वन्तु।

त्रयाणां क्षेत्रकाणां तुलना

प्राथमिक-द्वितीयक-तृतीयकक्षेत्रकाणां विविधोत्पादनकार्यैः बह्वधिकमात्रायां वस्तूनां सेवानां च उत्पादनं क्रियते। सममेव एतेषु क्षेत्रकेषु पर्याप्तसंख्यायां जनाः वस्तूनां सेवानां च उत्पादनाय कार्यं कुर्वन्ति। अतः अग्रिमे चरणे एतद् द्रष्टव्यम् अस्ति यत् प्रत्येकस्मिन् क्षेत्रके कतीनां वस्तूनां सेवानां च उत्पादनं भवति एवं च कति जनाः तस्मिन् क्षेत्रके कार्यं कुर्वन्ति ? कस्याञ्चित् अर्थव्यवस्थायां समस्तोत्पादनस्य आजीविकायाः च दृष्ट्या एकम् अथवा एकाधिकानि क्षेत्रकाणि प्रधानानि भवन्ति। अपरतः अन्यानि क्षेत्रकाणि अपेक्षाकृतं लघ्वाकाराणि भवन्ति।

प्रत्येकं क्षेत्रकस्य विविधवस्तूनां सेवानां च गणनां वयं केन प्रकारेण कुर्मः एवं च समस्तोत्पादनं कथं जानीमः ?

भवतां चिन्तनं स्यात् यत् सहस्रसंख्यायाम् उत्पादितानां वस्तूनां सेवानां च गणना असम्भवकार्यम् अस्ति। एतद् न केवलं बृहत् कार्यम् अस्ति अपि तु भवन्तः विस्मिताः अपि भविष्यन्ति यत् वयं कारयानानां संगणकानां कीलानाम् एवं च उपस्कराणां संख्यायाः योगफलं कथं कर्तुं शक्नुमः। एतद् अतीव विचित्रविषयः अस्ति।

भवन्तः सम्यक् चिन्तयन्ति । अस्याः समस्यायाः समाधानाय अर्थशास्त्रिणां परामर्शः अस्ति यत् वस्तूनां सेवानां च वास्तविकसंख्यानां योगकरणस्य स्थाने तासां मूल्यस्य उपयोगः करणीयः इति । यथा १०,०००किलोग्राममितः गोधूमः प्रतिकिलोग्रामम् अष्टरूप्यकमित्या विक्रीयते चेत् गोधूमस्य मूल्यं ८०,०००रूप्यकमितं भविष्यति । एकस्य नारिकेलस्य

मूल्यं दश रूप्यकाणि अस्ति चेत् ५०००नारिकेलानां मूल्यं ५०,०००रूप्यकमितं भविष्यति। अनेन एव प्रकारेण त्रयाणां क्षेत्रकाणां वस्तूनां सेवानां च मूल्यस्य गणना क्रियते तस्य अनन्तरं तस्य योगफलं प्राप्नुमः।

अवधानं भवेत् यत् अत्र काचित् सावधानता आवश्यकी अस्ति । उत्पादितस्य अथवा विक्रीतस्य प्रत्येकं वस्तुनः (अथवा सेवायाः) गणनायाः आवश्यकता नास्ति । केवलम् **अन्तिमवस्तूनां सेवानां** च गणनायाः एव औचित्यम् अस्ति । यथा कश्चन कृषकः कस्मैचित् गोधूमचूर्णसंयन्त्राय अष्टरूप्यकप्रतिकिलोग्रामस्य मानेन गोधूमं विक्रीणीते । संयन्त्रे गोधूमस्य पेषणं भवति एवं च सुपिष्टकसमवायाय गोधूमचूर्णं दशरूप्यकप्रतिकिलोग्रामस्य मानेन विक्रीयते सुपिष्टकसमवायः गोधूमचूर्णेन सह शर्करातैलसदृशानां वस्तूनाम् उपयोगं करोति एवं च सुपिष्टकस्य पैकेटचतुष्टयं निर्माति। तेन विपणौ उपभोक्तृभ्यः षष्टिरूप्यकैः (पञ्चदशरूप्यकप्रतिपैकेटस्य मानेन) विक्रीयते। अतः सुपिष्टकम् एव अन्तिमः उत्पादः अस्ति अर्थात् तद् वस्तु यत् उपभोक्तृन् यावत् प्राप्नोति।

केवलम् अन्तिमवस्तूनाम् एवं च सेवानाम् एव गणना किमर्थं क्रियते ? प्रदत्ते उदाहरणे अन्तिमवस्तुनः विपरीतं गोधूमः गोधूमचूर्णं च इति एवम्प्रकाराणि वस्तूनि मध्यवर्तिवस्तूनि सन्ति । मध्यवर्तिवस्तूनि अन्तिमवस्तूनां सेवानां च निर्माणाय प्रयुज्यन्ते । अन्तिमवस्तूनां मूल्ये मध्यवर्तिवस्तूनां मूल्यं पूर्वमेव सम्मिलितं भवति । सुपिष्टकस्य (अन्तिमवस्तुनः) ६०रूप्यकमिते मूल्ये पूर्वमेव

कस्मिंश्चित् विशेषवर्षे एकैकस्य क्षेत्रकस्य द्वारा उत्पादितानाम् अन्तिमवस्तूनां सेवानां च मूल्यं तस्मिन् वर्षे क्षेत्रकस्य समस्तोत्पादनस्य सूचनां प्रददाति । त्रयाणां क्षेत्रकाणाम् उत्पादनानां योगफलं देशस्य **सकलगृहोत्पादः** इति उच्यते । अयं **कस्यचित् देशस्य अन्तः** कस्मिंश्चित् विशेषवर्षे उत्पादितानां सर्वेषाम् अन्तिमवस्तूनां सेवानां च मूल्यम् अस्ति । सकलगृहोत्पादः अर्थव्यवस्थायाः विशालतां प्रदर्शयति ।

भारते सकलगृहोत्पादमापनस्य सदृशं कठिनं कार्यं केन्द्रशासनस्य मन्त्रालयेन क्रियते । अयं मन्त्रालयः राज्यानां केन्द्रशासितक्षेत्राणां च विभिन्नशासनिकविभागानां सहायतया वस्तूनां सेवानां च समस्तसंख्यया तासां च मूल्येन सम्बद्धाः सूचनाः एकत्रीकरोति । तत्पश्चात् सकलगृहोत्पादस्य अनुमानं करोति ।

क्षेत्रकेषु ऐतिहासिकं परिवर्तनम्

सामान्यतया अधिकतरविकसितदेशानाम् इतिहासे एतद् दृष्टम् अस्ति यत् विकासस्य प्रारम्भिकावस्थासु प्राथमिकक्षेत्रकाणि एव आर्थिकसक्रियतायाः सर्वाधिकं महत्त्वपूर्णं क्षेत्रकम् अस्ति ।

यथा यथा कृषिप्रणाल्यां परिवर्तनम् अभवत् एवं च कृषिक्षेत्रकं समृद्धम् अभवत् तथा तथा पूर्वापेक्षया अपेक्षाकृतम् अधिकोत्पादनम् आरब्धम् । अधुना अनेके जनाः अन्यानि कार्याणि कर्तुम् आरब्धवन्तः । शिल्पिनां व्यापारिणां च संख्या वर्धिता । क्रयविक्रयस्य गतिविधिषु बहुगुणिता वृद्धिः जाता । एतदतिरिक्तम् अनेकजनाः परिवहनं प्रशासनं सैन्यम् इति एतैः कार्यैः सह संयुक्ताः आसन् । तथापि अस्याम् अवस्थायाम् उत्पादितानि वस्तूनि प्राकृतिकोत्पादः आसन् । एते च उत्पादाः प्राथमिकक्षेत्रकान्तर्गताः आसन् अपि च अधिकतरजनाः अस्मिन् एव क्षेत्रके कार्यं कुर्वन्ति स्म ।

दीर्घकालस्य (शतवर्षाधिकस्य) अनन्तरं विशेषेण विनिर्माणस्य नवीनप्रणाल्याः प्रचलनात् शिल्पशालाः अस्तित्वम् आगताः तासां च प्रसारः भवितुम् आरब्धः । ये जनाः पूर्वं कृषिक्षेत्रेषु कार्यं कुर्वन्ति स्म तेषु बहवः जनाः अधुना शिल्पशालासु कार्यं कर्तुम् आरब्धवन्तः । शिल्पशालासु अल्पमूल्यमितिषु उत्पादितवस्तूनां जनाः उपयोगं कर्तुम् आरब्धवन्तः । समस्तोत्पादनस्य आजीविकायाः च दृष्ट्या द्वितीयकक्षेत्रकं सर्वाधिकं महत्त्वपूर्णम् अभवत् । अस्मात् कारणात् अतिरिक्तसमये अपि कार्यं कर्तुम् आरब्धम् । अस्य अर्थः अस्ति यत् क्षेत्रकाणां महत्त्वं परिवर्तितम् अभवत् ।

विगतेषु शतवर्षेषु विकसितदेशेषु द्वितीयकक्षेत्रकात् तृतीयकक्षेत्रकं प्रति पुनः परिवर्तनं जातम् अस्ति । समस्तोत्पादनस्य दृष्ट्या सेवाक्षेत्रकस्य महत्त्वं वर्धितम् अस्ति । अधिकतराः श्रमजीविजनाः सेवाक्षेत्रके एव नियोजिताः सन्ति । विकसितदेशेषु एतद् एव सामान्यलक्षणं दृष्टम् अस्ति ।

भारते त्रयाणां क्षेत्रकाणां समस्तोत्पादनम् आजीविका च कियत् अस्ति ? विगतवर्षेषु विकसितदेशेषु दृष्टस्य प्रारूपस्य समरूपं किं भारते अपि परिवर्तनं जातम् अस्ति ? अस्मिन् विषये वयम् अग्रिमे खण्डे द्रक्ष्यामः

आगच्छन्तु एतेषां विषये विचारं कुर्याम --

१. विकसितदेशानाम् इतिहासः क्षेत्रकेषु जातानां परिवर्तनानां विषये किं संकेतयति ?

२. अव्यवस्थितवाक्यांशात् सकलगृहोत्पादस्य गणनार्थं महत्त्वपूर्णपक्षान् व्यवस्थितान् एवं च सम्यक् कुर्वन्तु ।
उत्पादितवस्तूनां सेवानां च गणनां कर्तुं वयं तेषां संख्याः योजयामः । वयं विगतेषु पञ्चवर्षेषु उत्पादितानां सर्वेषां वस्तूनां गणनां कुर्मः । यतो हि अस्माभिः किमपि वस्तु न त्यक्तव्यम् अतः वयम् एतेषां वस्तूनां सेवानां मूल्यस्य योगफलं प्राप्नुमः ।

भारते प्राथमिक -द्वितीयक-तृतीयकक्षेत्रकाणि -

प्रथमः आलेखः --त्रयाणां क्षेत्रकाणां द्वारा उत्पादितानि वस्तूनि सेवाः च दर्शयति । अयं १९७१-१९७२तमे अथ च २०११-२०१२तमे द्वे वर्षे दर्शयति । भवन्तः द्रष्टुं शक्नुवन्ति यत् चत्वारिंशद्-वर्षेषु समस्तोत्पादने कियती संवृद्धिः जाता अस्ति ।

आलेखः 1 - प्राथमिक-द्वितीयक-तृतीयकक्षेत्रद्वारा स.घ.उ.



आगच्छन्तु एतेषां विषये विचारं कुर्याम –

आरेखस्य अवलोकनं कुर्वन्तः निम्नलिखितस्य उत्तरं यच्छन्तु --

१. १९७१-१९७२तमवर्षयोः विशालतमम् उत्पादकक्षेत्रकं किम् आसीत् ?
२. २०११-२०१२तमिवर्षयोः विशालतमम् उत्पादकक्षेत्रकं किम् आसीत् ?
३. किं भवन्तः ज्ञापयितुं शक्नुवन्ति यत् त्रिंशद्-वर्षैः कस्मिन् क्षेत्रके सर्वाधिका संवृद्धिः जाता ?
४. २०११-२०१२तमवर्षयोः भारतस्य सकलगृहोत्पादः कियान् अस्ति ?

१९७१-१९७२तमवर्षयोः अथ च २०११-२०१२तमवर्षयोः मध्ये तुलना किं प्रदर्शयति ? अनया भवन्तः कं निष्कर्षं प्राप्तुं शक्नुवन्ति ? विचारं कुर्वन्तु ।

उत्पादने तृतीयकक्षेत्रकस्य वर्धामानं महत्त्वम् --

१९७१-१९७२तमवर्षयोः अथ च २०११-२०१२ तमवर्षयोः मध्ये चत्वारिंशद्-वर्षैः यद्यपि सर्वेषां क्षेत्रकाणाम् उत्पादने वृद्धिः अभवत् परन्तु सर्वाधिका वृद्धिः तृतीयकक्षेत्रकस्य उत्पादने अभवत् परिणामतः २०११-२०१२तमवर्षे भारते प्राथमिकक्षेत्रकस्य प्रस्थापनं कृत्वा तृतीयकक्षेत्रकं विशालतमोत्पादकक्षेत्रकस्य रूपेण उदितम् । भारते तृतीयकक्षेत्रकम् एतावत् महत्त्वपूर्णं कथम् अभवत् ? अस्यअनेकानि कारणानि भवितुम् अर्हन्ति ।

प्रथमं कस्मिंश्चित् अपि देशे चिकित्सालयः शैक्षणिकसंस्थाः डाकतारसेवाः आरक्षकालयाः न्यायालयाः ग्रामीणप्राशासनिककार्यालयाः नगरनिगमाः रक्षा परिवहनं वित्तकोषाः जीवनगोपसमवायाः इति एवंविधसेवानाम् आवश्यकता भवति । एताः सेवाः आधारभूतसेवाः मन्यन्ते । कस्मिंश्चित् विकासशीलदेशे एतासां सेवानाम् उत्तरदायित्वं शासनस्य द्वारा ऊह्यते ।

द्वितीयं कृषिक्षेत्रे उद्योगक्षेत्रे च विकासः भवति चेत् परिवहन-व्यापार-संग्रहणसदृशीनां सेवानां विकासः भवति । प्राथमिक-द्वितीयकक्षेत्रकाणां विकासः यावान् अधिकः भविष्यति एतादृशीनां सेवानां याचना तावती एव अधिका भविष्यति ।

तृतीयम् आयस्य वर्धनेन सह केचन जनाः, भोजनालयः पर्यटनं क्रयणं नैजचिकित्सालयः नैजविद्यालयः व्यावसायिकप्रशिक्षणम् इत्यादीनाम् अन्यासाम् अनेकसेवानां याचनां कर्तुम् आरभन्ते

भवन्तः नगरेषु विशेषेण विशालनगरेषु एतत् द्रुतपरिवर्तनं द्रष्टुम् अर्हन्ति।

चतुर्थं विगतदशकेषु सूचनासंचारप्रौद्योगिकीम् आश्रिताः काश्चन नवीनसेवाः महत्त्वपूर्णाः अपरिहार्याः च संजाताः सन्ति। एतासां सेवानाम् उत्पादने वृद्धिः जायमाना अस्ति। चतुर्थे अध्याये वयम् एतासां नवीनसेवानाम् एतासां प्रसारस्य कारणानां विषये चर्चां करिष्यामः।

अन्ततः भवतां स्मरणं भवेत् यत् सेवाक्षेत्रकस्य सर्वासु सेवासु समानरूपेण संवृद्धिः न जायमाना अस्ति। भारते सेवाक्षेत्रकाणां द्वारा बहुविधानां जनानां नियोजनं क्रियते। एकतः तासां सेवानां संख्या सीमिता अस्ति यासु अत्यन्तकुशलशिक्षितश्रमिकाः वृत्तिं प्राप्नुवन्ति। अपरतः प्रभूतसंख्यायां जनाः लघवः आपणाः परिष्कारकार्याणि परिवहनम् इति एवंविधसेवासु निरताः सन्ति। ते जनाः अतिकठिनतया जीविकायाः निर्वाहं कर्तुं समर्थाः भवन्ति अपि च यतो हि तेषां पार्श्वे कश्चन अन्यः वैकल्पिकः अवसरः उपलब्धः नास्ति इति अस्मात् कारणात् ते एतासु सेवासु निरताः सन्ति। अनेन कारणेन सेवाक्षेत्रकस्य केवलं केषाञ्चन भागानाम् एव महत्त्वं वर्धमानम् अस्ति। भवन्तः एतेषां विषये अग्रिमे खण्डे विस्तरेण पठिष्यन्ति।

अधिकतरजनाः कुत्र नियोजिताः सन्ति ?

द्वितीयः आलेखः सकलगृहोत्पादे त्रयाणां क्षेत्रकाणां प्रतिशतं सहभागितां प्रस्तौति। अधुना भवन्तः चत्वारिंशद्-वर्षैः क्षेत्रकाणां परिवर्तमानं महत्त्वं प्रत्यक्षं द्रष्टुं शक्नुवन्ति।

आलेखः 2 - स.घ.उ. क्षेत्रकाणां च सहभागः (%)



भारतस्य सन्दर्भे किञ्चन उल्लेखनीयं तथ्यम् अस्ति यत् यद्यपि सकलगृहोत्पादे त्रयाणां क्षेत्रकाणां सहभागितायां परिवर्तनं जातम् अस्ति तथापि आजीविकायाम् एतादृशम् एव परिवर्तनं न अभवत्। तृतीयः आरेखः १९७२-१९७३ २०११-२०१२ एवं च २००३ इति एतेषु वर्षेषु त्रिषु क्षेत्रकेषु आजीविकायाः सहभागितां दर्शयति। अद्यापि प्राथमिकक्षेत्रे विशालतमः नियोक्ता अस्ति।

आलेखः 3 - उद्योगेषु क्षेत्रकाणां सहभागः (%)



प्राथमिकक्षेत्रकात् आजीविकायाः एतादृशम् एव क्षेत्रकस्थानान्तरणं किमर्थं न अभवत् ? अस्य कारणम् एतद् अस्ति यत् तृतीयक-द्वितीयकक्षेत्रकेषु आजीविकायाः पर्याप्तावसराणां सर्जन न अभवत् यद्यपि अस्मिन्

अवधौ वस्तूनाम् औद्योगिकोत्पादने त्रिगुणाधिका वृद्धिः अभवत् परन्तु औद्योगिकवृत्तिषु प्रायः त्रिगुणात्मिका एव वृद्धिः अभवत् । तृतीयकक्षेत्रकविषये एतत् एव तथ्यम् अस्ति । सेवाक्षेत्रके उत्पादने चतुर्दशगुणाधिका वृद्धिः अभवत् परन्तु आजीविकायां पञ्चगुणात् अपि न्यूना वृद्धिः अभवत् ।

परिणामतः देशे अर्धाधिकाः श्रमिकाः प्राथमिकक्षेत्रके मुख्यतया कृषिक्षेत्रे कार्यं कुर्वन्तः सन्ति यस्य सकलगृहोत्पादे योगदानं केवलं १/४मितम् अस्ति । अस्य तुलनायां द्वितीयक-तृतीयकक्षेत्रकयोः सकलगृहोत्पादे योगदानं ३/४मितम् अस्ति । परन्तु एते क्षेत्रे अर्धाद् अपि न्यूनसंख्याकेभ्यः जनेभ्यः वृत्तिं यच्छतः । किम् अस्य अयम् अर्थः अस्ति यत् कृषिक्षेत्रे निरताः श्रमिकाः स्वीयक्षमतातः न्यूनम् उत्पादनं कुर्वन्तः सन्ति ?

किम् अस्य अयम् अर्थः अस्ति यत् कृषौ आवश्यकतातः अधिकाः जनाः संरताः सन्ति ? अत एव भवन्तः कांश्चन जनान् कृषिक्षेत्रात् अपसारयन्ति तर्हि अपि उत्पादनं प्रभावितं न भविष्यति । अन्यशब्देषु कृषिक्षेत्रकस्य श्रमिकेषु **अल्पा अनाजीविका** अस्ति ।

कस्याश्चित्लघुकृषिकायाः लक्ष्म्याःउदाहरणं स्वीकुर्मः ।लक्ष्म्याः पार्श्वे द्विहेक्टेयरपरिमितम् असिक्ता भूमिः अस्ति ।सा कृषेः कृते केवलं वर्षाजलम् आश्रयति एवं च आढकीप्रियङ्गुसदृशानि सस्यानि उत्पादयति । तस्याः कुटुम्बस्य सर्वे पञ्च सदस्याः तस्यां भूमौ आवर्षं कार्यं कुर्वन्ति । किमर्थम् ? यतो हि तेषां कृते अन्यत्र कुत्रापि आजीविका उपलब्धा नास्ति भवन्तः द्रक्ष्यन्ति यत् प्रत्येकं जनः कार्यं कुर्वन् अस्ति कोऽपि जनः अवृत्तिकः नास्ति । परन्तु वस्तुतः तेषां **श्रमप्रयासः** विभाजितः अस्ति प्रत्येकं जनः किमपि कार्यं कुर्वन् अस्ति परन्तु कस्मैचित् अपि पूर्णाजीविका प्राप्ता नास्ति ।एतत् अल्पाजीविकायाः स्थितिः अस्ति यत्र जनाः प्रत्यक्षरूपेण कार्यं कुर्वन्तः सन्ति परन्तु सर्वे स्वीयक्षमतातः न्यूनं कार्यं कुर्वन्ति ।**एतादृशी अल्पा अनाजीविका अन्तर्हिता इति कथ्यते । यतो हि इयं तेषां जनानाम् अवृत्तितः पृथक् अस्ति येषां पार्श्वे कापि आजीविका नास्ति एवं च व्यर्थं सन्ति (मुक्ता अवृत्तिः) । अतः इयं प्रच्छन्ना अवृत्तिः इति अपि कथ्यते**

इदानीं मन्यामहे यत् कश्चन भूस्वामी सुखरामः आगच्छति एवं च निजभूमौ कार्यं कर्तुं लक्ष्म्याः कुटुम्बस्य एकं सदस्यम् अथवा द्वौ सदस्यौ भाटकेन नयति । इदानीं लक्ष्म्याः कुटुम्बः पारिश्रमिकद्वारा कञ्चन अतिरिक्तम् आयम् अर्जयति । यतो हि भवतां कृते लघुभूखण्डे कार्यं कर्तुं पञ्चजनानाम् आवश्यकता नास्ति अतः द्वयोः जनयोः गमनात् कृषौ उत्पादनं प्रभावितं न भवति । प्रदत्ते उदाहरणे द्वौ सदस्यौ कस्याञ्चित् शिल्पशालायाम् अपि कार्यं कर्तुं गन्तुम् अर्हतः ।
पुनः एकवारं कुटुम्बस्य आयः वर्धितः भविष्यति अपि च ते जनाः निजभूमितः पूर्ववत् उत्पादनं प्राप्स्यन्ति ।

भारते लक्ष्मीःइव लक्षसंख्याकाः जनाः सन्ति। अस्य अयम् अर्थः अस्ति यत् यदि वयम् कांश्चन जनान् कृषिक्षेत्रकात् अपसार्य तेभ्यः कुत्रचित् अन्यत्र समुचितवृत्तेः उपलब्धतां कुर्मः तर्हि अपि कृष्युत्पादनं दुष्प्रभावितं न भविष्यति । जनाः कञ्चन अन्यं व्यवसायं कुर्वन्ति चेत् तेषाम् आयेन कुटुम्बस्य समस्तः आयः वर्धितः भविष्यति ।

अल्पीयस्याः अनाजीविका अन्यक्षेत्रकेषु अपि भवितुं शक्नोति । उदाहरणार्थं नगराणां सेवाक्षेत्रकेषु सहस्रसंख्याकाः अनियतश्रमिकाः सन्ति ये दैनिकवृत्तिम् अन्विष्यन्ति । ते प्लम्बर-पेण्टर-परिष्कारकार्यसदृशीः आजीविकाः कुर्वन्ति अन्ये जनाः च असौविध्यजनकं विषमं कार्यं कुर्वन्ति । तेषु अनेके प्रतिदिनं कार्यं न प्राप्नुवन्ति । अनेन एव प्रकारेण वयं सेवाक्षेत्रकस्य कांश्चन जनान् मार्गेषु ठेलां वहतः अथवा केषाञ्चन वस्तूनां विक्रयणं कुर्वतः पश्यामः । **यत्र ते सम्पूर्णदिनं व्यतीतं कुर्वन्ति परन्तु बहुन्यूनम् अर्जयितुं समर्थाः भवन्ति ।** यतो हि तेषां पार्श्वे कश्चन समीचीनतरः अवसरः उपलब्धः नास्ति इति कारणात् ते एतत् कार्यं कुर्वन्तः सन्ति ।

आगच्छन्तु एतेषां विषये विचारं कुर्याम --

१. द्वितीये एवं च तृतीये आलेखे प्रदत्तानां विवरणानां प्रयोगं कृत्वा सारण्याः पूर्तिं कुर्वन्तु अपि च अधः दत्तानां प्रश्नानाम् उत्तराणि यच्छन्तु

तालिका २.२ सकलगृहोत्पादे आजीविकायां च प्राथमिकक्षेत्रकस्य भूमिका

	1972-73	1973-74	2011-12	2013-14
सकलगृहोत्पादे सहभागिता				
आजीविकायां सहभागिता				

चत्वारिंशद्-वर्षैः प्राथमिकक्षेत्रके भवन्तः किं परिवर्तनं पश्यन्ति ?

२. उचितस्य उत्तरस्य चयनं कुर्वन्तु -
अल्पा जीविका तदा भवति यदा जनाः
(अ) कार्यं कर्तुं न इच्छन्ति।
(ब) मन्दगत्या कार्यं कुर्वन्तः सन्ति।
(स) स्वीयक्षमतातः न्यूनं कार्यं कुर्वन्तः सन्ति।
(द) तेषां कार्यस्य पारिश्रमिकं न क्रियते।

३. विकसितदेशेषु दृष्टस्य लक्षणस्य भारते जातैः परिवर्तनैः सह तुलनां कुर्वन्तु एवं च वैषम्यं ज्ञापयन्तु। भारते क्षेत्रकाणां मध्ये कीदृशानि परिवर्तनानि वाञ्छितानि आसन् यानि न आभवन् ?

४. अस्माभिः अल्पाजीविकायाः विषये विचारः किमर्थं करणीयः ?

अतिरिक्ताजीविकायाः सर्जनं कथं भवेत् ?

उपरि कृतायां चर्चायां वयं द्रष्टुं शक्नुमः यत् कृषिक्षेत्रे अल्पायाः अवृत्तेः स्थितिः गम्भीरा अस्ति। केचन जनाः एतादृशाः सन्ति येभ्यः ईषद् अपि वृत्तिः न प्राप्ता अस्ति। जनानां कृते वृत्तेः वृद्धिः कथं कर्तुं शक्यते ? वयं कतिपयविधीन् पश्यामः।

वयं लक्ष्म्याः तस्याः च द्विहेक्टेयरपरिमितस्य भूखण्खडस्य उदाहरणं स्वीकुर्मः । तस्याः कुटुम्बस्य भूमेः सेचनार्थम् एकस्य कूपस्य निर्माणार्थं सर्वकारः कतिपयमुद्रां व्ययीकर्तुं शक्नोति अथवा वित्तकोषः ऋणं प्रदातुं शक्नोति । तदा लक्ष्मीः स्वभूमेः सेचनं कर्तुं समर्था भविष्यति अपि च शारदीयऋतौ एकम् अपरं सस्यं गोधूमम् उत्पादयति। वयं मन्यामहे यत् एकहेक्टेयरपरिमितं गोधूमसस्यं द्वाभ्यां जनाभ्यां ५०दिनानि (बीजनिक्षेपणं जलप्रदानम् उर्वरकनिक्षेपणम् एवं च लवनम् इति एतेषु कार्येषु) वृत्तिं प्रदातुं शक्नोति । अतः कुटुम्बस्य द्वौ अन्यौ सदस्यौ स्वीयभूमौ वृत्तिं प्राप्तुं शक्नुतः अधुना मन्यामहे यत् एतादृशानाम् अनेकक्षेत्राणां सेचनार्थं कस्यचित् नूतनजलबन्धस्य निर्माणं क्रियते अथवा कस्याश्चित् कुल्यायाः खननं क्रियते अनेन कृषिक्षेत्रे आजीविकायाः अनेकेषाम् अवसराणां सर्जनं भवितुं शक्नोति अपि च अल्पीयस्याः अवृत्तेः समस्या स्वयं न्यूना भविष्यति।

अधना मन्यामहे यत् लक्ष्मीः अन्ये च कृषकाः पूर्वापेक्षया अधिकम् उत्पादनं कुर्वन्ति। कतिपयोत्पादस्य विक्रयः भवेत् इति अपि तेषां कृते आवश्यकं भविष्यति वा ? एतदर्थं तेषां कृते आवश्यकता भवितुं शक्नोति यत् ते स्वीयम् उत्पादं समीपवर्तिविपणौ नयेयुः इति । यदि सर्वकारः परिवहनस्य एवं च सस्यानां संग्रहणे अथवा भद्रतरग्रामीणमार्गाणां निर्माणे कतिपयराशेः निवेशं करोति तर्हि लघुट्रकयानानि सर्वस्मिन् स्थाने प्राप्नुवन्ति। अनेन विधिना लक्ष्मीसदृशाः अनेके कृषकाः येभ्यः अधुना जलस्य सौविध्यम् उपलब्धम् अस्ति सस्यानाम् उत्पादनं विक्रयणं च कर्तुं शक्नुवन्ति अनेन कार्येण केवलं कृषकेभ्यः एव उत्पादिका वृत्तिः उपलब्धा न भवितुं शक्नोति अपि तु परिवहनव्यापारसदृशीषु सेवासु निरतेभ्यः जनेभ्यः अपि आजीविका प्राप्ता भवितुं शक्नोति।

लक्ष्म्याः आवश्यकता केवलं जलपर्यन्तम् एव सीमिता नास्ति । कृषिं कर्तुं तस्याः कृते बीजानाम् उर्वरकाणां कृषिगतोपकरणानाम् अथ च जननिष्कासनाय पम्पसेटानाम् अपि आवश्यकता अस्ति यतो हि सा एका निर्धनकृषिका अस्ति इति अस्मात् कारणात् सा सर्वेषां वस्तूनां व्ययं न शक्नोति। अतः तया ऋणतातुः ऋणं स्वीकरणीयं भविष्यति एवं च उच्चकुसीदमित्या प्रत्यर्पणीयं भविष्यति । यदि स्थानीयवित्तकोषः उचितकुसीदमित्या तस्यै साखं प्रददाति तर्हि सा एतानि सर्वाणि वस्तूनि उचितसमयेन निजभूमौ कृषिं कर्तुं समर्था भविष्यति। तात्पर्यम् एतत् अस्ति यत् जलेन सममेव कृषौ परिष्काराय कृषकेभ्यः अल्पमूल्यसखानाम् प्रदानस्य आवश्यकता अस्ति। वयं चतुर्थे अध्याये मुद्रा एवं च साख इति एतयोः विषये अध्ययनं करिष्यामः।

वयम् अन्येन विधिना अस्याः समस्यायाः समाधानं कर्तुं शक्नुमः सः विधिः अस्ति यत् अर्धग्रामीणक्षेत्रेषु तेषाम् उद्योगानां सेवानां च अभिज्ञानं तेषां च वर्धनं यत्र बहूनां जनानां नियोजनं कर्तुं शक्येत । उदाहरणार्थं वयं मन्यामहे यत् अनेके कृषकाः आढकीकलायसदृशानां द्विदलसस्यानाम् उत्पादनं कर्तुं निर्णयं कुर्वन्ति । एतेषां समादानाय प्रसंस्करणाय एवं च नगरेषु विक्रयं कर्तुं द्विदलशिल्पशालायाः स्थापना किञ्चन एतादृशम् एव उदाहरणम् अस्ति । शीतभण्डारणगृहाणाम् उद्घटनात् कृषकाः एकम् अवसरं लप्स्यन्ते यत् ते स्वस्य आलुकप्लाण्डुसदृशानाम् उत्पादानां संग्रहणं कर्तुं शक्नुयुः एवं च उचितमूल्यं प्राप्यते चेत् विक्रयणं कर्तुं शक्नुयुः वनक्षेत्राणां निकटवर्तिग्रामेषु वयं मधुसंग्रहकेन्द्राणाम् आरम्भं कर्तुं शक्नुमः यत्र कृषकाः वनेभ्यः प्राप्तस्य मधुनः विक्रयणं कर्तुं शक्नुयुः शाकानाम् एवं च आलुक-श्वेतकन्द-तण्डुल-गोधूम-रक्ताङ्ग-फलानां बाह्यविपणिषु विक्रययोग्यानां कृषिगतोत्पादानां कृते प्रसंस्करणोद्योगानां स्थापना कर्तुं शक्यते । एतत् अर्धग्रामीणक्षेत्रेषु स्थितोद्योगेषु वृत्तिं प्रदास्यति।

भवतां मतेन भवतां क्षेत्रे कस्य समूहस्य जनाः अवृत्तिकाः अथवा अल्पावृत्तिकाः सन्ति ? किं भवन्तः कांश्चन उपायान् बोधयितुं शक्नुवन्ति येषां प्रयोगः कर्तुं शक्येत।

किं भवन्तः जानन्ति यत् भारते विद्यालयगनस्य आयुर्वर्गे ५-२९तमेवर्षे प्रायः प्रतिशतं षष्टिमिताः बालाः सन्ति ? एतेषु प्रायः प्रतिशतं द्विपञ्चाशत्मिताः एव विद्यालयं गच्छन्ति। अवशिष्टाः बालकाःविद्यालयं न गच्छन्ति। ते गृहे वसन्ति अथवा तेषु अधिकतरबालाःश्रमिकरूपेण कार्यं कुर्वन्ति। यदि एते बालाः अपि विद्यालयं गन्तुम् आरभेरन् तर्हि अस्माकं कृते अतोऽपि

भवनानाम् अध्यापकानाम् अन्येषां कर्मचारिणां च आवश्यकता भविष्यति । योजनायोगस्य द्वारा कृतस्य कस्यचित् अध्ययनस्य अनुसारं केवलं शिक्षाक्षेत्रे प्रायः विंशतिलक्षवृत्तीनां सर्जनं कर्तुं शक्यते । अनेन एव प्रकारेण यदि अस्माभिः स्वास्थ्यस्थितौ परिष्कारः करणीयः अस्ति तर्हि अस्माभिः ग्रामीणक्षेत्रेषु कार्यं कुर्वताम् अतोऽपि अधिकानां चिकित्सकानां परिचारिकाणां स्वास्थ्यकर्मचारिणां च आवश्यकता भविष्यति। एते केचन तादृशाः विधयः सन्ति यैः वृत्तीनां सर्जनं भविष्यति अपि च वयं येषां विषये प्रथमे अध्याये चर्चां कृतवन्तः स्मः तेषां विकासस्य महत्त्वपूर्णपक्षाणां विषये अपि विचारं कर्तुं समर्थाः भविष्यामः ।

प्रत्येकं राज्ये अथवा प्रदेशे तत्रत्यनिवासिनाम् आये तेषां वृत्तीषु च वृद्धेः सम्भावना भवति । एतत् पर्यटनम् अथवा क्षेत्रीयशिल्पोद्योगः अथवा सूचनाप्रौद्योगिकी इति एवंविधानां सेवानां माध्यमेन भवितुं शक्नोति एतेषु केषाञ्चन कृते समुचितयोजनायाः अथ च शासनिकसहायतायाः आवश्यकता भविष्यति । उदाहरणार्थं योजनायोगस्य अध्ययनानुसारं यदि पर्यटनक्षेत्रे परिष्कारः भवति तर्हि वयं प्रतिवर्षं ३५लक्षाधिकेभ्यः जनेभ्यः अतिरिक्ताः वृत्तीः प्रदातुं शक्नुमः ।

वयं जानीमः यत् चर्चितानां कतिपयपरामर्शानां क्रियान्वयः दीर्घसमयेन भविष्यति । अतः अल्पावधिं यावत् केषाञ्चन द्रुतोपायानाम् आवश्यकता अस्ति । एतद् मनसि निधाय केन्द्रसर्वकारेण सद्यः एव भारतस्य प्रायः ६२५जनपदेषु **कार्यस्य अधिकारं** व्यवहारपथम् आनेतुं एकः विधिः रचितः । अयं विधिः

महात्मगान्धिमहात्मगान्धि राष्ट्रियग्रामीण रोजगारगारण्टी अधिनियम २००५ इति कथ्यते । एतदधिनियमान्तर्गतं तेभ्यः सर्वेभ्यः जनेभ्यः ये कार्यं कर्तुं सक्षमाः सन्ति अपि येषां कृते कार्यम् अपेक्षितम् अस्ति, सर्वकारद्वारा वर्षे शतदिनानां वृत्तेः प्रतिभूः कृता अस्ति । यदि सर्वकारः वृत्तिं सुलभायितुं विफलीभवति तर्हि सर्वकारेण जनेभ्यः अवृत्तिपोषकधनं (बेरोजगारी भत्ता) दास्यते । अधिनियमान्तर्गतं तादृशेभ्यः कार्येभ्यः प्राथमिकता दास्यते यैः कार्यैः भाविसमये भूम्या उत्पादनस्य वर्धने साहाय्यं प्राप्स्यते ।

आगच्छन्तु एतेषां विषये विचारं कुर्वन्तु

१. भवतां विचारेण मनरेगा कार्यस्य अधिकारः किमर्थं कथ्यते ?

२. कल्पनां कुर्वन्तु यत् भवान् ग्रामस्य प्रधानः अस्ति एवं च तदृष्ट्या केषाञ्चन तादृशानां क्रियाविधीनां परामर्शं यच्छन्तु यैः जनानाम् आयस्य वृद्धिः भविष्यति अपि च ते अस्मिन् अधिनियमे सम्मेलनीयाः । चर्चां कुर्वन्तु ।

३. यदि कृषकेभ्यः सेचनस्य विपणनस्य च सौविध्यानाम् उपलब्धता कार्यते तर्हि वृत्तीनाम् आयस्य च वृद्धिः कथं भविष्यति ?

४. नगरीयक्षेत्रेषु वृत्तीनां वृद्धिः कथं कर्तुं शक्यते ?

संघटितस्य असंघटितस्य च रूपेण क्षेत्रकाणां विभाजनम्

अधुना वयम् आर्थिककार्याणां विभाजकस्य अन्यविधेः परीक्षणं कुर्मः । अयं विधिः जनानां नियोजनस्य आधारेण पश्यामः । तेषां कार्यकरणस्य अनुबन्धाः के सन्ति ? किं कोऽपि नियमः अथवा विनियमः अस्ति यस्य तेषां वृत्तेः सन्दर्भे अनुपालनं क्रियते ?

कान्ता

कान्ता कस्मिंश्चित् कार्यालये कार्यं करोति । सा प्रातः सार्धनववादनतः (९:३०तः) सार्धपञ्चवादनं (५:३०) यावत् कार्यालये तिष्ठति । सा नियमितरूपेण प्रत्येकं मासस्य अन्ते स्वीयं वेतनं प्राप्नोति । वेतनम् अतिरिच्य सा शासनिकनियमानाम् अन्तर्गतं भविष्यनिधिम् अपि प्राप्नोति । सा चिकित्सकीयपोषकधनम् अपि च अन्यपोषकधनानि अपि प्राप्नोति । कान्ता रविवासरे कार्यालयं न गच्छन्ति । एकस्मिन् दिने सवेतनम् अवकाशः भवति । यदा सा वृत्तिम् आरब्धवती आसीत् तदा तस्यै एकं नियुक्तिपत्रं दत्तम् आसीत् यस्मिन् वृत्तिसम्बद्धस्य निबन्धनस्य एवं च उपबन्धानाम् उल्लेखः कृतः आसीत् ।



कमलः

कमलः कान्तायाः प्रतिवेशी अस्ति । सः समीपवर्तिनि किराना इति कथ्यमाने आपणे दैनिकश्रमिकः अस्ति । सः प्रातः सार्धसप्तवादने (७:३०वादने) आपणं गच्छति अथ सायम् अष्टवादनं (८:००) वादनं यावत् कार्यं करोति । सः स्वीयश्रमम् अतिरिच्य अन्यं किमपि पोषकधनं न प्राप्नोति । यस्मिन् दिने सः कार्यं न करोति तस्य दिनस्य सः पारिश्रमिकं न प्राप्नोति । सः कमपि अवकाशम् अथवा सवेतनम् अवकाशं न प्राप्नोति । सः किमपि औपचारिकपत्रं न प्राप्तवान् अस्ति यस्मिन् आपणे नियुक्तेः विषये उक्तं स्यात् । तस्य नियोक्ता तं कस्मिन् अपि समये कार्यात् अपसरणाय कथयितुं शक्नोति ।

किं भवन्तः कान्तायाः कमलस्य च वृत्तेः परिस्थितिषु भेदं पश्यन्ति ?

कान्ता **संघटितक्षेत्रके** कार्यं करोति । संघटितक्षेत्रके ते उद्यमाः अथवा तानि कार्याणि अन्तर्भवन्ति यत्र वृत्तेः अवधिः नियमितः भवति । अतः जनानां पार्श्वे सुनिश्चितं कार्यं भवति । तानि क्षेत्रकाणि सर्वतकारद्वारा पञ्जीकृतानि भवन्ति अपि च तैः शासनिकनियमानां विनियमानां च पालनं करणीयं भवति । एतेषां नियमानां विनियमानां च शिल्पसंयन्त्राधिनियमः न्यूनतमपारिश्रमिकाधिनियमः सेवानुदानाधिनियमः आपणप्रतिष्ठानाधिनियमः इत्यादिषु अनेकविधिषु उल्लेखः कृतः अस्ति । एतत् संघटितक्षेत्रकम् इति कथ्यते यतो हि अस्य काश्चन औपचारिकप्रक्रियाः क्रियाविधयः च सन्ति । केचन जनाः कस्यचित् द्वारा नियोजिताः न भवन्ति प्रत्युत ते स्वतः कार्यं कर्तुं शक्नोति । परन्तु ते अपि स्वयं सर्वकारस्य समक्षं पञ्जीकारयन्ति अपि च नियमानां विनियमानां च अनुपालनं कुर्वन्ति ।

संघटितक्षेत्रकस्य कर्मचारिणः वृत्तिसुरक्षायाः लाभान् प्राप्नुवन्ति । इयम् आशा क्रियते यत् ते एकनिश्चितसमयं यावत् एव कार्यं करिष्यन्ति । यदि ते अधिकं कार्यं कुर्वन्ति तर्हि नियोक्तृद्वारा तेभ्यः अतिरिक्तं वेतनं दीयते । ते नियोक्तुः प्राथमिकता दास्यते यैः कार्यैः भाविसमये भूम्या उत्पादनस्य वर्धने साहाय्यं प्राप्स्यते । अन्यान् लाभान् अपि प्राप्नुवन्ति ते लाभाः के सन्ति ?

ते सेवतनम् अवकाशम् अवकाशकाले निस्तारं (भुगतान) भविष्यनिधिं सेवानुदानम् इत्यादि प्राप्नुवन्ति । ते चिकित्सीयलाभप्राप्तेः अधिकारिणः भवन्ति एवं च नियमानुसारं शिल्पसंयन्त्रस्वामिना पेयजलम् अथ च सुरक्षितकार्यपर्यावरणम् इति एवम्प्रकारकाणि सोविध्यानि सुनिश्चेतव्यानि भवन्ति । यदा ते सेवानिवृत्ताः भवन्ति तदा सेवानिवृत्तिधनं (पेंशन) अपि प्राप्नुवन्ति ।

अस्य विपरीतं कमलः असंघटितक्षेत्रके कार्यं करोति। **असंघटितक्षेत्रकाणि** लघुभिः एवं च विकीर्णैः (अधिकांशतः शासनिकनियन्त्रणात् बहिः भवन्ति) घटकैः निर्मितानि भवन्ति । अस्य क्षेत्रकस्य नियमाः एवं च विनियमाः तु भवन्ति परन्तु तेषाम् अनुपालनं न भवति । तेषां वृत्तीनां वेतनम् अल्पम् अस्ति अपि च नियमितता नास्ति ।अत्र अतिरिक्तसमये कार्यकरणस्यसवेतनावकाशस्यअवकाशस्यरोगकारणात् अवकाशस्य इत्यादीनां किमपि प्रावधानं नास्ति । वृत्तिः सुरक्षिता नास्ति । श्रमिकाः किमपि कारणं विना कार्यात् अपसारयितुं शक्यन्ते । केषुचित् ऋतुषु यदा कार्यं न्यूनं भवति केभ्यश्चित् जनेभ्यः कार्यात् अवकाशः दीयते । बहवः जनाः नियोक्त्रे रोचन्ते न वा इति एतं विषयम् आश्रयन्ति ।

अस्मिन् क्षेत्रके प्रभूतसंख्यायां जनाः मार्गेषु विक्रयणम् अथवा परिष्कारकार्यम् इति एवम्प्रकारकेषु निजलघुषु कार्यषु नियोजिताः सन्ति । अनेन एव प्रकारेण कृषकाः स्वीयक्षेत्रकेषु कार्याणि कुर्वन्ति एवं च आवश्यकतायां सत्यां पारिश्रमिके श्रमिकान् नियोजयन्ति।

असंघटित क्षेत्रकस्य श्रमिकाणां संरक्षणं कथं भवेत् ? अत्यधिका याचना भवति चेत् संघटितक्षेत्रकम् वृत्तेः प्रस्तावं करोति ।

आगच्छन्तु एतेषां विषये विचारं कुर्याम -

१. निम्नलिखितानि उदाहरणानि पश्यन्तु । एतेषु के असंघटितक्षेत्रकस्य गतिविधयः सन्ति ?

- विद्यालये पाठयन् कश्चन शिक्षकः
- विपणौ स्वपीठे अश्मचूर्णस्य गोणीं वहन् कश्चन श्रमिकः
- स्वक्षेत्रस्य सेचनं कुर्वन् कश्चन कृषकः
- चिकित्सालये रुग्णस्य उपचारं कुर्वन् कश्चन वैद्यः
- कस्यचित् संविदाकर्मिणः अधीने कार्यं कुर्वन् कश्चन दैनिकपारिश्रमिकः श्रमिकः ।
- कस्मिंश्चित् विशाले शिल्पसंयन्त्रे कार्यं कर्तुं गच्छन् कश्चन संयन्त्रश्रमिकः
- स्वगृहे कार्यं कुर्वन् कश्चन करघातन्तुवायः ।

२. संघटितक्षेत्रके नियमितरूपेण कार्यं कुर्वता अथ च असंघटितक्षेत्रके कार्यं कुर्वता जनेन सह सम्भाषणं कुर्वन्तु । सर्वेषु पक्षेषु तयोः कार्यस्थितीनां तुलनां कुर्वन्तु ।

३. संघटितक्षेत्रकस्य अथ च असंघटितक्षेत्रकस्य मध्ये भवन्तः विभेदं कथं करिष्यन्ति ? स्वशब्दैः व्याख्यां कुर्वन्तु ।

४. संघटितक्षेत्रके अथ च असंघटितक्षेत्रके भारतस्य सर्वेषां श्रमिकाणाम् अनुमानितसंख्या अधः दत्तायां सारण्यां दत्ता अस्ति । सारणीं सावधानं पठत । विलुप्तानाम् आङ्किकविवरणानां पूर्तिं कुर्वन्तु एवं च प्रश्नानाम् उत्तराणि यच्छन्तु ।

तालिका २.२ विभिन्नक्षेत्रकेषु श्रमिकाणां संख्या

क्षेत्रकम्	संघटितम्	असंघटितम्	आहत्य
प्राथमिकम्	१		२३२
द्वितीयकम्	४१	७४	११५
तृतीयकम्	४०	८८	१७२
आहत्य	८२		
आहत्य प्रतिशते			**१७२%**

- असंघटितक्षेत्रके कृषौ जनानां प्रतिशतं किम् अस्ति ?
- किं भवन्तः सहमताः सन्ति यत् कृषिः असंघटितक्षेत्रकस्य गतिविधिः अस्ति ? किमर्थम् ?
- यदि वयं सम्पूर्णदेशस्य अवलोकनं कुर्मः तर्हि प्राप्नुमः यत् भारते प्रतिशतं ..... मिताः श्रमिकाः संघटितक्षेत्रके सन्ति । भारते प्रायः प्रतिशतं ..... मितेभ्यः श्रमिकेभ्यः एव संघटितक्षेत्रके वृत्तयः उपलब्धाः सन्ति ।

परन्तु संघटितक्षेत्रके वृत्तेः अवसरेषु अत्यन्तमन्दगत्या वृद्धिः जायमाना अस्ति । एतद् अपि प्रायः दृश्यते यत् संघटितक्षेत्रकाणि असंघटितक्षेत्रकाणां रूपेण कार्याणि कुर्वन्ति । तैः एतादृश्यः रणनीतयः करवञ्चनात् एवं च श्रमिकेभ्यः संरक्षणप्रदातृविधीनाम् अनुपालनात् रक्षितुम् अङ्गीक्रियन्ते । परिणामतः बहवः श्रमिकाः असंघटितक्षेत्रके कार्यं कर्तुं विवशाः अभवन् यतः ते बहुन्यूनं वेतनं प्राप्नुवन्ति । तेषां प्रायः शोषणं क्रियते । तेभ्यः उचितं पारिश्रमिकं न दीयते । तेषाम् आयः न्यूनः अस्ति अपि च नियमितं नास्ति । अस्यां वृत्तौ संरक्षणं नास्ति नैव च कश्चन लाभः अस्ति । १९९०तमे वर्षे एतद् अपि दृष्टम् अस्ति यत् संघटितक्षेत्रकस्य बहूनां श्रमिकाणां तदीयवृत्तयः लुप्यमानाः सन्ति । एते जनाः असंघटितक्षेत्रके कार्यं कर्तुं विवशाः सन्ति । अतः असंघटितक्षेत्रके अतोऽपि वृत्तेः आवश्यकताम् अतिरिच्य श्रमिकाणां संरक्षणस्य साहाय्यस्य चापि आवश्यकता अस्ति ।

एते निरुपायाः जनाः के सन्ति येषां कृते संरक्षणस्य आवश्यकता अस्ति ? ग्रामीणक्षेत्रेषु असंघटितक्षेत्राणि मुख्यतः भूमिहीनकृषिश्रमिकैः लघुसीमान्तकृषकैः सस्यवण्टकैः अथ च शिल्पकारैः (यथा तन्तुवायैः लौहकारैः तक्षकैः स्वर्णकारैः च) रचितानि भवन्ति । भारते प्रायः प्रतिशतम् ८०मिताः ग्रामीणकुटुम्बाः लघुसीमान्तकृषकाणां श्रेण्यां सन्ति । एतेभ्यः कृषकेभ्यः समयेन बीजं कृष्युपकरणं साखः संग्रहणसौविध्यम् अथ च विपणनकेन्द्रम् इति एतेषां पर्याप्तसौविध्यानि उपलब्धानि भवेयुः इति आवश्यकम् अस्ति ।

नगरीयक्षेत्रेषु असंघटितक्षेत्राणि मुख्यतः लघूद्योगानां श्रमिकैः निर्माण-व्यापार-परिवहनेषु कार्यरतैः आकस्मिकश्रमिकैः अपि च मार्गेषु विक्रयणकार्यं कुर्वद्भिः शिरसि भारं वहद्भिः श्रमिकैः वस्त्राणां निर्मातृभिः एवं च अवस्करोत्थापकैः रचितानि भवन्ति । लघूद्योगानां कृते अपि असंशोधितवस्तुनः प्राप्त्यर्थम् उत्पादस्य विपणनार्थं च शासनस्य साहाय्यम् आवश्यकं भवति । आकस्मिकश्रमिकेभ्यः उभयोः नगरीयग्रामीणक्षेत्रयोः संरक्षणं दीयताम् इति आवश्यकम् अस्ति ।

वयम् एतद् अपि प्राप्नुमः यत् बहुसंख्यकश्रमिकाः अनुसूचितजातिजनजातिपश्चवर्तिजातिभिः सह सम्बद्धाः सन्ति ये असंघटितक्षेत्रेषु कार्यं कुर्वन्ति । एतेषां श्रमिकाणां वेतनम् अनियमितम् अस्ति अपि च पारिश्रमिकं न्यूनम् अस्ति । एतैः सह सामाजिकभेदभावः अपि क्रियते । अतः आर्थिकसामाजिकविकासाय असंघटितक्षेत्रकस्य श्रमिकेभ्यः संरक्षणं साहाय्यं च प्रदीयताम् इति अनिवार्यम् अस्ति । आर्थिक-गतिविधीनां क्षेत्रकेषु वर्गीकरणस्य कश्चित् अन्योपायः भवितुं शक्नोति – परिसम्पत्तीनां स्वामिनः सेवानां च उपलब्धतायै उत्तरदायिजनः कः अस्ति ? **सार्वजनिकक्षेत्रके**, अधिकांश-परिसम्पत्तिषु सर्वकारस्य स्वामित्वं भवति तथा च सर्वकारः एव सर्वासां सेवानाम् उपलब्धतां कारयति । **निजक्षेत्रके** परिसम्पत्तिषु स्वामित्वस्य सेवानां च वितरणस्य दायित्वं एकलजनस्य समवायस्य च अधीनस्थं भवति । रेलसंस्था अथवा पत्रालयीयसंस्था सार्वजनिकक्षेत्रस्य उदाहरणरूपेण अस्ति, तथा च टाटा-आयरन-एण्ड-स्टील-समवाय-

यदा यन्त्रागाराः पिहिताः भवन्ति तदा बहवः स्थायिकर्मकराः शाकानां विक्रयणं वस्तुवाहकानां वहनम् अथवा अन्यानि कार्याणि कुर्वन्ति ।

स्मरणं कुर्वन्तु

अस्मान्परितःअनेकेआर्थिकगतिविधयःसंचालिताःभवन्ति।तेषांविषयेतर्कसंगतरीत्याविचारंकर्तुंवर्गीकरणस्य प्रक्रिया अपरिहार्या अस्ति । वयं कं निष्कर्षम् इच्छामः इति एतस्मिन् आधारे वर्गीकरणस्य अनेके निकषाः भवितुं शक्नुवन्ति । वर्गीकरणस्य प्रक्रिया वस्तुस्थितेः मूल्याङ्कनकरणे साहाय्यं करोति ।आर्थिकगतिविधीनां त्रिषु क्षेत्रकेषु प्राथमिक-द्वितीयक-तृतीयकेषु विभाजनं कर्तुं 'कार्यस्य स्वभावः' निकषरूपेण उपयोक्तुं शक्यते । एतद् वर्गीकरणम् आधारीकृत्य वयं भारते समस्तोत्पादनस्य अथ च वृत्तेः पद्धत्याः विश्लेषणं कर्तुं समर्थाः अभवाम। अनेन एव प्रकारेण वयम् आर्थिकगतिविधीनां संघटितक्षेत्रके असंघटितक्षेत्रके च विभाजनं कृतवन्तः। अस्य विभाजनस्य प्रयोगः एतयोः द्वयोः क्षेत्रकयोः वृत्तेः स्थितिं द्रष्टुं कृतः । वर्गीकरणाभ्यासेभ्यः व्युत्पन्नाः सर्वाधिकाः महत्त्वपूर्णनिष्कर्षाः के आसन् ? ताः समस्याः समाधानानि च कानि आसन् यानि प्रति संकेतः कृतःकिंभवन्तःसूचनाःअधःदत्तायांसारण्यांसंक्षिप्तरूपेणअभिव्यक्तीकर्तुं शक्नुवन्ति

तालिका २.४ आर्थिकक्रियाकलापानां वर्गीकरणम्

क्षेत्रकम्	प्रयुक्त-निकषः	अतिमहत्त्वपूर्ण-निष्कर्षः	इङ्गित-समस्याः तासां समाधानं च कथं कर्तुं शक्यते ?
प्राथमिकम् द्वितीयकम् तृतीयकम्	कार्यस्य अनुभवः		
संघटितक्षेत्रक- असंघटितक्षेत्रकम्			

स्वामित्वाधारितं क्षेत्रकं – सार्वजनिकक्षेत्रकं नैजक्षेत्रकं च

लिमिटेड इति (टिस्को) अथवा रिलायंस-इण्डस्ट्रीज-लिमिटेडप्रभृत्तिसमवायाः निजस्वामित्वे सन्ति।

निजक्षेत्रस्य गतिविधीनां ध्येयं लाभार्जनस्य भवति। एतेषां सेवानां प्राप्तये अस्माभिः एकलस्वामित्वयुक्तानां समवायानां कृते व्ययः करणीयः भवति। सार्वजनिकक्षेत्रस्य ध्येयं केवलं लाभार्जनम् एव न भवति । सर्वकारः सेवाः आधृत्य कृतव्ययस्य पूर्तये अन्योपायान् आश्रयति । आधुनिकदिनेषु सर्वकारः सर्वविधेषु गतिविधिषु व्ययं करोति । एते गतिविधयः के सन्ति ? सर्वकारः एतादृशेषु गतिविधिषु व्ययं किमर्थं करोति ? अवजानन्तु। नैकविषयाः एवंविधाः सन्ति येषाम् आवश्यकता समाजस्य सर्वेभ्यः सदस्येभ्यः भवति, परन्तु **तेषाम् उपलब्धतां निजक्षेत्रस्य संस्था उचितमूल्येन न कारयन्ति ।** किमर्थम् ? यतो हि एतादृशीषु सेवासु अत्यधिकधनं व्ययीकरणीयं भवति, तत्तु निजक्षेत्रकाणां क्षमतातः बहिः वर्तते । एतेषां वस्तूनां प्रयोक्तृभ्यः सहस्राधिकजनेभ्यः धनसङ्ग्रहणं कृत्वा पुनः, यदि ते वस्तूनि सुलभायन्ते तर्हि ते तदर्थम् अधिकधनं स्वीकुर्वन्ति । यथा – राजमार्गस्य सेतूनां पत्तनानां विद्युतादिकस्य च निर्माणम्, अपि च जलबन्धादीनां निर्माणं कृत्वा सेचनव्यवस्थायाः प्रकल्पनम् । अतः एव सर्वकारः एतादृशम् अधिकव्ययं स्वयं करोति अपि च सर्वेषां जनानां कृते एवंविधानि सौविध्यानि निश्चयेन सम्पादयति अथवा सुनिश्चितीकरोति।

कानिचन कार्याणि एतादृशानि सन्ति **तेभ्यः सर्वकारीयस्य समर्थनस्य आवश्यकता भवति ।** निजक्षेत्रीयाः संस्थाः तान् उत्पादान् अथवा व्यवसायान् तावत् पर्यन्तं कार्यशीलान् न स्थापयितुं शक्नुवन्ति यावत् पर्यन्तं सर्वकारस्य समर्थनं प्रोत्साहनं वा तत्र न स्यात्। यथा – उत्पादनमूल्ये विद्युतः विक्रयणेन नैकेषु उद्योगेषु वस्तूनाम् उत्पादनव्ययस्य वर्धनं भवितुं शक्नोति। नैकेषां प्रकल्पानां, विशेषतः लघुप्रकल्पानां पिधानं भवितुं शक्नोति । अत्र सर्वकारः तस्मिन् अनुपाते विद्युतः उत्पादनाय वितरणाय च

किमपि उपायं करोति येन ते उद्योगाः विद्युतः क्रयणं कर्तुं शक्नुवन्ति। सर्वकारः व्ययस्य कस्यचित् भागस्य वहनं करोति।

अनेन एव प्रकारेण , भारतसर्वकारः कृषकेभ्यः उचितमूल्येन गोधूमानां तण्डूलानां च क्रयणं करोति । अन्नस्य स्वीयेषु भाण्डागारेषु स्थापनं करोति अपि च अन्नस्य आपणानां माध्यमेन उपभोक्तृभ्यः न्यूनमूल्येन अन्नानि विक्रीणीते। भवन्तः नवम्यां कक्ष्यायां खाद्यसुरक्षाध्याये एतस्मिन् विषये पठितवन्तः । सर्वकारः व्ययस्य कञ्चन भागं वहति । अनेन प्रकारेण, सर्वकारः कृषकाणाम् उपभोक्तृणां च साहाय्यं करोति।

प्रायः आर्थिककार्याणि एतादृशानि सन्ति, येषां प्राथमिकदायित्वं सर्वकारस्य अस्ति । **एतेषु व्ययकरणं सर्वकारस्य कृते अनिवार्यम् अस्ति ।** यथा – सर्वेषां कृते स्वास्थ्यस्य शिक्षासम्बद्धस्य सौविध्यस्य च उपलब्धता स्यात् । अस्माभिः गते अध्याये केषुचित् गतिविधिषु विचारः कृतः । समुचितरूपेण विद्यालयस्य सञ्चालनं गुणात्मकशिक्षायाः विशेषतः प्राथमिकशिक्षायाः व्यवस्थापनं, सर्वकारस्य कर्त्तव्यं वर्तते। विश्वदृष्ट्या भारते निरक्षराणां जनानां जनसङ्ख्या सर्वाधिका वर्तते।

अनेन प्रकारेण, वयं जानीमः यत् भारतस्य प्रायः अर्धाः बालाः कुपोषणग्रस्ताः सन्ति। तथा च तेषु बालेषु चतुर्थांशत्वेन गभीररूपेण रुग्णाः सन्ति। अस्माभिः शिशुमृत्युमात्रायाः अनुपातस्य वा विषये पठितम् । ओडिशायां (40), मध्यप्रदेशे (51) इति शिशुमृत्योः अनुपातः वर्तते । सः च अनुपातः विश्वस्य केभ्यश्चित् भागेभ्यः अधिकः अस्ति । इयम् अपि आवश्यकता वर्तते यत् सर्वकारः मानवविकासस्य एतादृशानां विषयाणां यथा – सुरक्षितस्य पेयजलस्य व्यवस्थां भोजनस्य पोषणस्य च व्यवस्थां चापि कुर्यात्। सर्वकारस्य इदम् अपि कर्त्तव्यम् अस्ति यत् सः व्ययविवरणपत्रके धनस्य अधिकप्रावधानं कृत्वा अत्यन्तनिर्धनानां देशस्य च पूर्णतया उपेक्षितभागेषु विद्यमानजनानां संरक्षणं पालनं विकासं च कुर्यात्।

सारांशः –

अस्मिन् अध्याये अस्माभिः आर्थिकगतिविधीनां विभाजनं केषुचित् सार्थकसमूहेषु स्यात् तदर्थं केषाञ्चित् उपायानाम् अध्ययनं कृतम्। अत्र कश्चन अयम् उपायः अपि परीक्षितव्यः यत् गतिविधिः प्राथमिके द्वितीयके तृतीयके च क्षेत्रके केन सम्बद्धः अस्ति । भारतस्य विगतस्य त्रिंशतस्य वर्षाणाम् अङ्काः प्रदर्शयन्ति यत् यद्यपि जी.डी.पी.(समस्त-गृह्य-उत्पादः) इत्यस्मिन् सर्वाधिकयोगदानं तृतीयके क्षेत्रके उत्पादितवस्तूनां सेवानां च अस्ति, परन्तु आजीविकायाः अवसराः प्रायः प्राथमिके क्षेत्रके एव लभ्यन्ते । अस्माभिः इदम् अपि दृष्टं यत् देशे आजीविकायाः वृत्तेः वा अवसराणां वर्धनाय किं कर्तुं शक्यते । द्वितीयके वर्गीकरणे वयं सङ्घटिते असङ्घटिते च क्षेत्रके कार्यकर्तृणां जनानां विषये अपि विचारयामः । प्रायः जनाः असङ्घटिते क्षेत्रे कार्यं कुर्वन्ति तथा च तेषां संरक्षणम् अनिवार्यम् अस्ति । अस्माभिः सार्वजनीनस्य निजक्षेत्रस्य च गतिविधीनां मध्यस्थस्य अन्तरस्य अध्ययनं कृतम् अपि च अवगतं यत् सार्वजनीन-गतिविधीनां केन्द्रीकरणं केषुचित् निश्चितक्षेत्रेषु किमर्थम् आवश्यकम् अस्ति

अभ्यासः

१. कोष्ठके दत्तस्य उचितविकल्पस्य प्रयोगं कृत्वा रिक्तस्थानानां पूर्तिं कुर्वन्तु।

(क) सेवाक्षेत्रके वृत्तौ उत्पादनस्य समानानुपाते वृद्धिः ..... (अभवत् / न अभवत्)

(ख) ..... क्षेत्रकस्य श्रमिकाः वस्तूनाम् उत्पादनं न कुर्वन्ति। (तृतीयकस्य/कृषेः)

(ग) ..... क्षेत्रकस्य अधिकतरक्षमिकेभ्यः वृत्तिसुरक्षा प्राप्ता भवति। (संघटितस्य/असंघटितस्य)

(घ) भारते ..... अनुपाते श्रमिकाः असंघटितक्षेत्रके कार्यं कुर्वन्तः सन्ति। (लघुनि/विशाले) श्रूयतां भगवद्वाणी

(ङ) कार्पासं ..... उत्पादः अस्ति एवं च वस्त्रं ..... उत्पादः अस्ति। (प्राकृतिकः/विनिर्मितः)

(च) प्राथमिक-द्वितीयक-तृतीयकक्षेत्रकाणां गतिविधयः ..... सन्ति। (सवतन्त्राः/परस्परम् आश्रिताः)

२. उचितस्य उत्तरस्य चयनं कुर्वन्तु --

(अ) सार्वजनिकक्षेत्रकस्य निजक्षेत्रकस्य च आधारेण विभाजिताः सन्ति

(क) वृत्तेः अनुबन्धाः

(ख) आर्थिकगतिविधीनां स्वभावाः

(ग) उद्यमानां स्वामित्वानि

(घ) उद्यमे नियोजितानां श्रमिकाणां संख्या

(ब) कस्यचित् वस्तुनः अधिकांशतः प्राकृतिकप्रक्रियातः उत्पादनं ..... क्षेत्रकस्य गतिविधिः अस्ति।

(क) प्राथमिकस्य

(ख) द्वितीयकस्य

(ग) तृतीयकस्य

(घ) (सूचनाप्रौद्योगिक्याः)

(स) कस्मिंश्चित् वर्षे उत्पादितानां ..... समस्तमूल्यं सकलगृहोत्पादः इति कथ्यते।

(क) सर्वेषां वस्तूनां सेवानां च

(ख) सर्वेषाम् अन्तिमवस्तूनां सेवानां च

(ग) सर्वेषां मध्यवर्तिवस्तूनां सेवानां च

(घ) सर्वेषां मध्यवर्तिनाम् एवं च अन्तिमानां वस्तूनां सेवानां च

(द) सकलगृहोत्पादस्य पदेषु २०११-२०१२तमवर्षे तृतीयकक्षेत्रकस्य सहभागिता .....अस्ति।

(क) आहत्य विंशतितः प्रतिशतं त्रिंशतः मध्ये

(ख) प्रतिशतं ३०तः४०पर्यन्तम्

(ग) प्रतिशतं ५०तः६०पर्यन्तम्

(घ) प्रतिशतम् ७०मिता

3. निम्नलिखितस्य मेलनं करोतु –

कृषिक्षेत्रस्य समस्याः	**केचन सम्भाविताः उपायाः**
1. असेचितभूमिः	(अ) कृष्याधारितानाम् उद्योगागाराणां स्थापना
2. सस्यानां न्यूनमूल्यम्	(ब) सहकारि-विपणन-समितयः
3. ऋणभारः	(स) सर्वकारद्वारा खाद्यान्नानाम् आहरणम्
4. मन्दताकाले आजीविकायाः अभावः	(द) सर्वकारेण कूल्यानां निर्माणम्
5. सस्यकर्तनात् समनन्तरं स्थानीयवणिजां स्वीयस्य अन्नस्य विक्रयणसम्बद्धा विवशता (न्यूने कुसीदे वित्तकोशैः साख इत्यस्य व्यवस्थापनम्)	

4. विषमं परिचिन्वन्तु ज्ञापयन्तु च किमर्थम् ?

(क) पर्यटन-निर्देशकः, रजकः, सौचिकः,कुम्भकारः

(ख) शिक्षकः,चिकित्सकः,शाकविक्रेता,अधिवक्ता

(ग) पत्रवाहकः, चर्मकारः,सैनिकः,आरक्षकः

(घ) एम.टी.एन.एल,भारतीयरेलसंस्था,एयर-इण्डिया,जेट-एयरवेज,आल-इण्डिया-रेडियो इत्यादीनि।

5. कश्चित् शोधच्छात्रः सूरतनगरे कार्यकर्तृणां जनानां विषयकम् अध्ययनं कृत्वा निम्नलिखिताः अङ्काः प्राप्ताः – तालिकां पूरयतु। अस्मिन् नगरे असङ्घटित-क्षेत्रीयाणां श्रमिकाणां प्रतिशतं किम् अस्ति ?

कार्यस्थलम्	**आजीविकायाः प्रकृतिः**	**श्रमिकाणां प्रतिशतम्**
सर्वकारेण पञ्जीकृत-कार्यालयेषु उद्योगागारेषु च	सङ्घटिताः	15
औपचारिक-अधिकारपत्र-सहितेषु विपणिषु निजापणाः, कार्यालयाः चिकित्साकेन्द्राणि		15
राजमार्गेषु कार्यकर्तारः जनाः, निर्माणश्रमिकाः, गृह्यश्रमिकाः		20
लघुकार्यशालासु कार्यं कुर्वन्तः जनाः, ये प्रायः सर्वकारेण अधिकृताः न सन्ति।		

6. किं भवन्तः मन्यन्ते यत् आर्थिक-गतिविधीनां प्राथमिके द्वितीयके तृतीयके च क्षेत्रे विभाजनस्य उपयोगिता वर्तते ? एतत् कथम् अस्ति, तद्व्याख्यानं कुर्वन्तु ?

7. अस्मिन् अध्याये चर्चितं प्रत्येकं क्षेत्रम् आजीविकायां (सकल-गृह्योत्पादे) चैव किमर्थं केन्द्रितं करणीयम् ? किम् अन्येषां वादानां विवादानां च परीक्षणं कर्तुं शक्यते ? चर्चां कुर्वन्तु।

8. जीविकार्थं कार्यकर्तृणां स्वीयपार्श्वस्थानां वस्यकानां सर्वेषां कार्याणां दीर्घां सूचीं कुर्वन्तु। तानि कार्याणि भवन्तः केन उपायेन वर्गीकर्तुं शक्नुवन्ति? स्वीयचयनस्य सन्दर्भे व्याख्यानं कुर्वन्तु।

9. तृतीयक्षेत्रम् अन्यक्षेत्रेभ्यः कथं भिन्नं वर्तते ? सोदाहरणं व्याख्यायन्तु।

10. प्रच्छन्नायाः अनाजीविकायाः विषये भवन्तः किं जानन्ति ? नगरीय-ग्रामीण-क्षेत्राणाम् उदाहरणं दत्त्वा व्याख्यायन्तु।

11. मुक्त-अनाजीविकायाः प्रच्छन्न-अनाजीविकायाः (प्रच्छन्नवृत्तिराहित्यस्य वा) च मध्ये विभेदं कुर्वन्तु।

12. 'भारतीयार्थव्यवस्थायाः विकासे तृतीयं क्षेत्रं कामपि भूमिकां न निर्वहति'। किं भवन्तः अनेन तथ्येन सहमताः सन्ति ? भवन्तः उत्तरस्य समर्थने कारणम् उपस्थापयन्तु।

13. भारते सेवाक्षेत्रं द्वौ विभिन्नप्रकारकौ जनौ निश्चिनुतः। तौ जनौ कौ स्तः ?

14. असङ्घटिते क्षेत्रे श्रमिकाणां शोषणं क्रियते। किं भवन्तः अनेन विचारेण सहमताः सन्ति ? स्वोत्तरस्य समर्थनाय कारणम् उपस्थापयन्तु।

15. अर्थव्यवस्थायां गतिविधयः आजीविकायाः परिस्थितीनाम् आधारेण कथं वर्गीक्रियन्ते ?

16. सङ्घटितेषु असङ्घटितेषु च क्षेत्रेषु विद्यमानानाम् आजीविका-परिस्थितीनां तुलनां कुर्वन्तु।

17. मनरेगा 2005 (MANREGA 2005) इत्यस्य उद्देश्यानां व्याख्यां कुर्वन्तु।

18. स्वीयक्षेत्रात् उदाहरणं स्वीकृत्य सार्वजनिकस्य निजक्षेत्रस्य च गतिविधीनां कार्याणां च परस्परं तुलनां वैषम्यं च उपस्थापयन्तु।

19. स्वीयक्षेत्रात् ऐकैकम् उदाहरणम् उपस्थाप्य निम्नतालिकां पूरयन्तु अपि च चर्चां कुर्वन्तु।

	सुव्यवस्थित-प्रबन्धनयुक्तानिसङ्घटनानि	कुव्यवस्थितप्रबन्धनयुक्तानि सङ्घटनानि
सार्वजनिकक्षेत्राणि		
निजक्षेत्राणि		

20. सार्वजनिकक्षेत्रस्य गतिविधीनां कानिचन उदाहरणानि उपस्थापयन्तु अपि च व्याख्यां कुर्वन्तु यत् सर्वकारेण एतादृशानां गतिविधीनां कार्यान्वयनं किमर्थं क्रियते ?

21. व्याख्यां कुर्वन्तु यत् कस्यचित् देशस्य आर्थिकविकासे सार्वजनिकक्षेत्रं कथं योगदानं करोति ?

22. असङ्घटितक्षेत्रस्य श्रमिकाणां निम्नलिखितविषयेषु संरक्षणं स्यात् इति आवश्यकम् अस्ति - श्रमः,सुरक्षा, स्वास्थ्यम्। सोदाहरणं व्याख्यानं कुर्वन्तु।

23. अहमदाबादे कृते कस्मिंश्चित् अध्ययने अवगतं यत् नगरस्य 15,00,000श्रमिकेषु 11,00,000 श्रमिकाः असङ्घटितक्षेत्रके कार्यं कुर्वन्ति स्म। 1997-98 तमवर्षयोः नगरस्य सम्पूर्णायः 600 कोटिरूप्यकाणि आसीत् अत्र 320 कोटिरूप्यकाणि सङ्घटितक्षेत्रात् लभ्यन्ते स्म। एतान् अङ्कान् तालिकायां प्रदर्शयन्तु। नगरे इतोऽपि अधिकस्य वृत्तेः अवसरस्य सर्जनाय केषु उपायेषु चिन्तनीयम् ?

24. निम्नलिखितायां तालिकायां त्रयाणां क्षेत्राणां सकलगृह्योत्पादः (स.घ.उ)रूप्यकाणि (कोटिः) इत्यस्मिन् प्रदत्तः -

वर्षम्	प्राथमिकम्	द्वितीयम्	तृतीयम्
2000	52,000	48,500	1,33,500
2013	8,00,500	10,74,000	38,68,000

(क) 1950, 2010 इति वर्षयोः कृते स.घ.उ. इत्यस्मिन् त्रयाणां क्षेत्राणां सहभागितायाः गणनां कुर्वन्तु।

(ख) एतान् अङ्कान् अध्याये प्रदत्तस्य द्वितीयालेखस्य समानतया एकस्य दण्डालेखस्य रूपेण प्रदर्शयन्तु।

(ग) दण्डालेखेन वयं कं निष्कर्षं प्राप्नुमः ?

शिक्षकाणां कृते निर्देशाः

तृतीयः अध्यायः -- मुद्रा अथ च ऋणोद्-ग्रहण-प्रमाणपत्रम् (साख)

मुद्रा कश्चन मनोहारी कौतूहलपूर्णः च विषयः अस्ति । विद्यार्थिनां कृते अस्य तत्त्वस्य प्रकाशनम् आवश्यकम् अस्ति। मुद्रायाः इतिहासः एवं च विभिन्नसमयेषु मुद्रायाः पृथक् पृथक् रूपाणि स्वयं काञ्चित् रोचककथां प्रस्तुवन्ति । अस्य स्तरस्य उद्देश्यम् एतद् अस्ति यत् विद्यार्थिनः अवगच्छेयुः निर्णयं च कुर्युः यत् सामाजिकपरिस्थितिषु मुद्रायाः कानि रूपाणि प्रयुक्तानि भवन्ति स्म । मुद्रायाः आधुनिकरूपाणि बैङ्कप्रणाल्या सह सम्बद्धानि सन्ति। अस्य अध्यायस्य प्रथमे भागे एतद् एव मुख्यविचारः अस्ति।

भारतस्य वर्तमानस्थितौ बैङ्किङ्गप्रणाल्याः संगणकीकरणात् मुद्रायाःनूतनरूपाणां शनैःशनैःविस्तारःजायमानःअस्ति।परिणामतः विद्यार्थिनां पार्श्वे एतं विषयं स्वयमेव अवगन्तुम् अनेके अवसराः सन्ति । मुद्रायाः कार्याणि इति अस्मिन् विषये औपचारिकरूपेण विचारं कर्तुम् आवश्यकता नास्ति । परन्तु अस्य विषयस्य प्रश्नानां रूपेण प्रकाशनं भवेत्। मुद्रायाः उत्पत्तिः (मुद्रागुणकः) अथवा आधुनिकप्रणाल्याः पृष्ठाघानम् इति एवम्प्रकाराः विषयाः अध्याये न स्वीकृताः सन्ति। परन्तु भवन्तः इच्छन्ति चेत् एतेषां विषये चर्चां कर्तुम् अर्हन्ति। साखः आर्थिकजीवनस्य किञ्चन महत्त्वपूर्णं तत्त्वम् अस्ति अतः अस्य अवधारणात्मकस्तरे अवगमनम् आवश्यकम् अस्ति।

अध्यायस्य द्वितीयभागे कस्याञ्चित् अपि साखव्यवस्थायां के पक्षाः द्रष्टव्याः भवन्ति तथा च जनानाम् उपरि कः प्रभावः भवति इति बिन्दुः विचारितः अस्ति। वयं स्वीयसमीपवर्तिसंसारे सहस्रविधाः साखव्यवस्थाः पश्यामः । अतः समीचीनतरं भविष्यति यदि विद्यार्थिनां परिवेशैः सम्बद्धानां साखव्यवस्थानां माध्यमेन तेषाम् एतासां विभिन्नपक्षाणां विषये अवबोधः कार्येत ।साखेन सह सम्बद्धः कश्चन अन्यः महत्त्वपूर्णः विषयः अस्ति यत् अयं सर्वेषां कृते उपलब्धः भवेत् विशेषेण निर्धनानां कृते यथोचितम् अनुबन्धैः सह । अस्माभिः अस्मिन् विषये सविशेषम् अवधानं करणीयं भविष्यति यत् अयं जनानाम् अधिकारः अस्ति अपि च एत विना अस्य वर्गस्य विशालभागः विकासप्रक्रियातः बहिः भविष्यति। ग्रामीणबैङ्कानां हस्तक्षेपः इति एवम्प्रकाराणां बहूनां नवीनप्रयासानां विषये विद्यार्थिनाम् अवबोधः कारयितुं शक्यते । परन्तु एतद् अवगमनम् आवश्यकम् अस्ति यत् अस्माकं पर्श्वे सर्वेषां प्रश्नानाम् उत्तराणि न सन्ति । नूतनविधीनाम् अन्वेषणस्य आवश्यकता अस्ति । एतत् च विकासशीलदेशानां पुरतः सामाजिकसमाह्वानेषु अन्यतमम् अस्ति।

सूचनायाः स्रोतांसि

अस्मिन् अध्याये औपचारिकानौपचारिक-क्षेत्रकयोः साखसम्बद्धानि आङ्किकविवरणानि राष्ट्रियप्रतिदर्शसर्वेक्षणसंघटनद्वारा ग्रामीणऋणानि अधिकृत्य कृतात् सर्वेक्षणात् स्वीकृतानि सन्ति । (अखिलभारतीयऋणनिवेशसर्वेक्षणम् ७०तमम्, २०१३, एन.एस.एस.ओ इति अनेन सञ्चालितम्) । ग्रामीणबैङ्कस्य विषये सूचनाः आङ्किकविवरणानि च वार्तापत्रेभ्यः जालपुटेभ्यः स्वीकृतानि सन्ति। बैङ्कसम्बद्धानाम् आङ्किकविवरणानां विस्तृतसूचनार्थम् अथवा कस्यचित् विशिष्टबैङ्कस्य विषये ज्ञातुं भवन्तः भारतीयरिजर्वबैङ्कस्य (www.rbi.org) एवं च सम्बद्धबैङ्कानां जालपुटे गन्तुं शक्नुवन्ति । स्वयंसहायतासमूहेषु आङ्किकविवरणानि राष्ट्रिय कृषिग्रामीणविकासबैङ्कस्य जालपुटे (www.nabard.org) उपलब्धानि सन्ति

तृतीयः अध्यायः

मुद्रा अथ च ऋणोद्-ग्रहण-प्रमाणपत्रम् (साख)

मुद्रा विनिमयस्य माध्यमम्

मुद्रायाः उपयोगः अस्माकं दैनिकजीवनस्य कश्चन महान् भागः अस्ति । स्वीयपरिवेशे पश्यन्तु । भवन्तिः कस्मिंश्चित् दिने मुद्रया सम्बद्धानाम् अनेकविषयाणाम् अभिज्ञानं कर्तुं शक्नुवन्ति । किं भवन्तः एतेषाम् एकां सूचीं निर्मातुं शक्नुवन्ति ? बहुषु विनिमयेषु भवन्तः द्रक्ष्यन्ति यत् मुद्रायाः माध्यमेन वस्तूनां क्रयणं विक्रयणं च क्रियमाणम् अस्ति । एतादृशेषु केषुचित् विनिमयेषु मुद्रायाः स्थाने सेवाः प्रदीयमानाः सन्ति । परन्तु केषुचित् विषयेषु सम्भवम् अस्ति यत् विनिमयस्य समये मुद्रायाः किमपि आदानं प्रदानं च न भवेत् । केवलम् अनन्तरं प्रदानस्य वचनं कृतं स्यात् ।

किं भवद्भिः कदापि चिन्तितम् अस्ति यत् क्रयणं मुद्रायाः माध्यमेन किमर्थं भवन्ति ? कारणं बहुसरलम् अस्ति । यस्य जनस्य पार्श्वे मुद्रा अस्ति स अस्याः विनिमयं कस्यचित् अपि वस्तुनः सेवायाः वा क्रयणार्थं सरलतया कर्तुं शक्नोति । अतः प्रत्येकं जनाय मुद्रायाः रूपेण प्रदानं रोचते । ततः परं तस्याः मुद्रायाः उपयोगं स्वीयावश्यकतायाः वस्तूनि क्रेतुं करोति । कस्यचित् उपानह्-निर्मातुः उदाहरणं पश्यामः । सः विपणौ उपानहः विक्रीय गोधूमं क्रेतुम् इच्छति । उपानह्-निर्माता प्रथमम् उपानहां स्थाने मुद्रां प्राप्स्यति ततः परम् अस्याः मुद्रायाः उपयोगं गोधूमस्य क्रयणार्थं करिष्यति चिन्तयन्तु यत् उपानह्-निर्माता यदि मुद्रायाः प्रयोगं विना उपानहां साक्षात् गोधूमेन सह विनिमयम् अकरिष्यत् तर्हि कियती कठिनता अभविष्यत् । तस्य कृते गोधूमोत्पादकस्य तादृशस्य कृषकस्य अन्वेषणीयम् अभविष्यत् यः न केवलं गोधूमं विक्रेतुम् इच्छेत् अपि तु सममेव उपानहः अपि क्रेतुम् इच्छेत् । अर्थात् उभौ पक्षौ मिथः वस्तूनि क्रेतुं विक्रेतुं च सम्मतौ भवेताम् इति ।

एतद् आवश्यकतानां द्वैतसंयोगः इति कथ्यते । कश्चन जनः यः वस्तू विक्रेतुम् इच्छेत् तद् एव वस्तु अपरः जनः क्रेतुम् अपि इच्छेत् । वस्तुविनिमयप्रणाल्यां यत्र मुद्रायाः उपयोगं विना वस्तूनां विनिमयः भवति तत्र **आवश्यकतानां द्वैतसंयोगस्य** स्थितिः अनिवार्यविशिष्टता अस्ति ।

अस्य तुलनायां एतादृशी अर्थव्यवस्था यस्यां मुद्रायाः प्रयोगः भवति तत्र मुद्रा महत्त्वपूर्णभूमिकायाः निर्वाहं कृत्वा आवश्यकतानां द्वैतसंयोगस्य आवश्यकतां समापयति । ततः परम् उपानह्-निर्मातुः कृते एतद् आवश्यकं न भवति यत् सः एतादृशकृषकस्य अन्वेषणं कुर्यात् यः तस्य उपानहां क्रयणं कुर्यात् सममेव तस्मै गोधूमस्य अपि विक्रयणं कुर्यात् । तेन केवलं स्वीयोपानहां कृते क्रेता अन्वेष्टव्यः अस्ति । एकवारं सः उपानहः विक्रेतुं सफलः भवति चेत् सः विपणौ गोधूमम् अन्यानि च वस्तूनि क्रेतुं शक्नोति । यतो हि मुद्रा

विनिमयप्रक्रियायां मध्यस्थतायाः कार्यं करोति एतत् च **विनिमयस्य माध्यमम्** इति कथ्यते।

आगच्छन्तु एतेषां विषये विचारं कुर्याम

१. मुद्रायाः प्रयोगेण वस्तूनां विनिमयः सरलः कथं भवति ?
२. किं भवन्तः कानिचन एतादृशानि उदाहरणानि चिन्तयितुं शक्नुवन्ति यत्र वस्तूनां सेवानां च विनिमयः अथवा श्रमस्य प्रदानं वस्तुविनिमयद्वारा क्रियमाणम् अस्ति ?

मुद्रायाः आधुनिकरूपाणि

प्रारम्भिकाहत-नाणकानि (प्रायेण 2500 वर्षपुरातनानि)

गुप्तकालीन नाणकानि

तुगलक नाणकानि

अकबरकालीन-सुवर्णमुद्रा

आधुनिकनाणकानि

अस्माभिः दृष्टं यत् मुद्रा एतादृशं वस्तु अस्ति क्रये विक्रये च विनिमयस्य माध्यमं भवितुं शक्नोति। नाणकानां प्रचलनात् पूर्वं विविधवस्तूनां मुद्रायाः रूपेण उपयोगः क्रियते स्म। उदाहरणार्थम्, आबहोः प्रारम्भिककालात् एव भारतीयाः अन्नस्य पशोः च मुद्रायाः रूपेण उपयोगं कुर्वन्ति स्म। अस्य अनन्तरं स्वर्ण-रजत-ताम्रसदृशधातूनां नाणकानि प्रचलितानि। एतेषां प्रचलनं विगतशताब्दं यावत् अवर्तत।

मुद्रामुद्रायाः

आधुनिकरूपेषु करेंसीमुद्रायाः कर्गदपत्राणि एवं च नाणकानि सम्मिलितानि सन्ति। तानि वस्तूनि येषां पूर्वं मुद्रायाःरूपेण उपयोगः क्रियते स्म तद्विपरीतम् आधुनिकमुद्रा स्वर्णरजतताम्रसदृशैः निर्मितैः नाणकैः निर्मिता नास्ति। अन्नम् एवं च पशुः इव ताः दैनिकोपयोगस्य वस्तूनि अपि न सन्ति। आधुनिकमुद्रायाः एतादृशः स्वीयः कोऽपि उपयोगः नास्ति।पुनः, मुद्रा विनिमयस्य माध्यमं किमर्थं स्वीक्रियते? विनिमयस्य साधनत्वेन एतस्मात् मुद्रा स्वीक्रियते, यतो हि कस्यचित् देशस्य सर्वकारः एतस्याःप्राधिकरणं करोति। भारतेभारतीय-रिजर्व -वित्तकोशःकेन्द्रीयसर्वकारस्य पक्षतः मुद्रापणकं प्रस्तौति। भारतीयस्य विध्यनुसारं, काचित् संस्था अथवा जनः मुद्राप्रस्तुतये अधिकृतः नास्ति। एतदतिरिच्य अधिनियमः विनिमयस्य माध्यमेन रूप्यकस्य प्रयोगस्य वैधतां प्रददाति, भारते वाणिज्यप्रकरणे तत्र कोऽपि स्वीकरणात् न निराकर्तुं शक्नोति। भारते कश्चन अपि जनः अधिनियमानुसारं रूप्यकेषु आदानं प्रदानं च न निराकर्तुं शक्नोति। अतः, रूप्यकं व्यापकस्तरे विनिमय्य माध्यमत्वेन स्वीकृतम्।

वित्तकोशेषु निक्षेपः –

जनाः मुद्रां वित्तकोषेषु निक्षेपस्य रूपेणापि स्थापयन्ति। कस्मिंश्चित् काले, जनाः दैनन्दिनव्यवहाराय आवश्यकतानां च कृते न्यूनमुद्राङ्कितधनस्य आवश्यकता भवति। उदाहरणार्थम् – प्रत्येकं मासान्ते वेतनभोगिश्रमिकानाम् अतिरिक्तं प्रत्यक्षधनं भवति। जनाः एतादृशेन प्रत्यक्षधनेन किं कुर्वन्ति ? जनाः स्वनाम्ना वित्तकोषेषु वित्तलेखां स्थापयन्ति तथा च धनं तत्र नियोजयन्ति अपि च तत्र कुसीदम् अपि अर्जयन्ति। अनेन प्रकारेण जनानां धनं वित्तकोशानां पार्श्वे सुरक्षितं भवति। अपि च जनाः तत्र कुसीदम् अपि प्राप्नुवन्ति। जनाः आवश्यकतानुसारं धनस्य आहरणम् अपि मध्ये मध्ये नियोजितधनात् कर्तुं शक्नुवन्ति तथा विधं सौविध्यं तत्र भवति। यतः वित्तलेखासु नियोजितधनम् आवश्यतानुसारं याचनामाध्यमेन वा आहर्तुं शक्यते, अतः एतादृशं

नियोजितधनम् आवश्यकतानुसारं नियोजनम् इति उच्यते।

याचनानियोजनेन अन्यत् अपि किञ्चित् सौविध्यं दीयते। एतत् सौविध्यं मुद्रायाः विनिमयस्य वा महत्त्वपूर्णलक्षणत्वेन अपि प्रयुज्यते। भवद्भिः प्रत्यक्षधनं विहाय धनादेशमाध्यमेन अर्थात् चैकद्वारा धनप्राप्तिः इत्यपि श्रुता स्यात्। चैक इत्यनेन धनाहरणाय दानाय वा नियोक्तुः कृते एतत् आवश्यकम् अस्ति यत् तस्य वित्तलेखा तस्मिन् वित्तकोशे स्यात् यस्य चैकपत्रं तस्य वर्तते। निश्चितधनराशेः कृते धनस्वामी धननियोक्ता वा चैक इति ददाति। चैक इति किञ्चित् एतादृशं कर्गदम् अस्ति यस्य माध्यमेन चैकपत्रपुस्तिका-धारकः एकः जनः अपरस्मै जनाय निश्चितधनराशेः आहरणाय अनुमतिपत्रम् अन्य जनस्य नाम्ना ददाति।

आगच्छन्तु, इदम् अवगन्तुं प्रयत्नं कुर्मः त् चैकद्वारा धनदानं कथं भवति तथा च एतत् उदाहरणमाध्यमेन जानीमः।

चैकद्वारा धनदानम् आदानं च

पादत्राण-निर्मात्रा एम.सलीमेन चर्मणः आपूर्तिकर्त्रे धनं दातव्यम् अपि च एतदर्थं सः कस्यचित् विशेषराशेः चैकद्वारा धनदानं कर्तुम् इच्छति। अर्थात्, पादत्राणनिर्माता स्वीयवित्तकोशं सूचयति यत् एतं निश्चितराशिं तस्मै गृहीत्रे दद्यात् इति। चर्मणः आपूर्तिकर्ता चैक इति प्रपत्रं नीत्वा स्वीये वित्तलेखायां नियोजयति। धनम् एकस्मात् वित्तकोशात् अपरस्मिन् वित्तकोशे कैश्चित् दिनैः सङ्क्रान्तम् अन्तरितं वा भवति। एतादृशम् आदानं प्रदानं प्रत्यक्षधनम् अदत्त्वा पूर्तिं गच्छति।



अनेन प्रकारेण वयं पश्यामः यत् याचिते नियोजिते मुद्रायाः अनिवार्यलक्षणं लभ्यते। इष्टनियोजितस्य विनिमये चैकलेखनस्य सौविध्येन प्रत्यक्षधनस्य प्रयोगम् अकृत्वा साक्षात् आदानं प्रदानं च शक्यते। यतः नियोजितधनात् मुद्रायाः दानाय आदानाय च व्यापकस्तरे चैकादिमाध्यामानि अङ्गीक्रियन्ते, अतः आधुनिकार्थव्यवस्थायाम् मुद्रात्वेन एव एतादृशी चैकादिप्रक्रिया मन्यते।

अत्र भवद्भिः वित्तकोशस्य भूमिका स्मर्तव्या भविष्यति। वित्तकोशानां कृते एतादृशस्य नियोजितधनस्य परिवर्ते विनिमये वा कश्चित् अपि अभ्यर्थितराशेः आदानं प्रदानं वा न भविष्यति। मुद्रायाः आधुनिकरूपाणि अपि च नियोजितविषये आधुनिकवित्तकोशीयप्रणाल्याः कार्यप्रणाल्या घनिष्ठत्वेन सम्बद्धानि सन्ति।

आगच्छन्तु – एतेषु विषयेषु विचारयामः –

1. एम.सलीमः धनं प्रत्यर्पयितुं 20,000रूप्यकाणि प्रत्यक्षमुद्रारूपेण आहर्तुम् इच्छति। एतदर्थं सः धनादेशपत्रस्य लेखनं कथं करिष्यति ?
2. समुचितम् उत्तरं चिह्नीकुर्वन्तु –
   (अ) सलीमस्य प्रेममहोदयस्य च मध्ये द्रव्यविनिमय-व्यवहारानन्तरम्।
      (क) सलीमस्य वित्तलेखायां शिष्टं वर्धते अपि च प्रेमस्य च वित्तलेखायां शिष्टराशिः वर्धते।
      (ख) सलीमस्य वित्तलेखायां शिष्टराशेः विकलनं भवति अपि च प्रेममहोदयस्य वित्तलेखायां शिष्टं वर्धते।
      (ग) सलीमस्य वित्तलेखायां शिष्टराशिः वर्धते अपि च प्रेममहोदयस्य वित्तलेखायां शिष्टराशिः न्यूनीभवति।
3. अभ्यर्थित-विनियोजित-राशिः मुद्रा इति रूपेण कथम् अवगम्यते ?

वित्तलेखासु ऋणसम्बद्धगतिविधयः

वित्त-कोश-सम्बद्ध-चर्चाम् अग्रे सारयामः । वित्तकोशप्रणाल्या जनतातः विनियोजितधनराशिः वित्तलेखामाध्यमेन स्वीक्रियते, स्वीकृतराशेः किं भवति ? अत्र कश्चित् रोचकक्रियाविधिः प्रयुक्तः भवति । वित्तकोशाः नियोजितधनराशेः कञ्चित् भागं प्रत्यक्षधनरूपेण तेषां पार्श्वे स्थापयन्ति । उदाहरणार्थम्, अद्यत्वे वर्तमानकाले भारते वित्तकोशाः नियोजितधनराशेः केवलं 15 प्रतिशतं भागं प्रत्यक्षधनरूपेण स्वीयपार्श्वे स्थापयन्ति। तत्र नियोक्ता कदाचित् धनराशिम् आहर्तुं शक्नोति इति सम्भावनया इत्थं क्रियते। यतः कस्मिंश्चित् एकस्मिन् दिने केवलाः केचन धननियोक्तारः एव प्रत्यक्षधनम् आहर्तुं गच्छन्ति, अतः वित्तकोशीयव्यवहारः तेन प्रत्यक्षधनेन सरलतया प्रवर्तते । वित्तकोशाः नियुक्तधनराशेः कञ्चित् बृहद्भागम् ऋणरूपेण दातुं प्रयोगं कुर्वन्ति। विभिन्नार्थिक-क्रिया-विधीनां कृते ऋणसम्बद्धा अभ्यर्थना आधिक्येन भवति। वयं तस्मिन् विषये आगामि-खण्डेषु आधिक्येन पठिष्यामः । वित्तकोशाः नियोजितधनराशेः जनानाम् ऋणसम्बद्ध-आवश्यकताः पूरयितुं प्रयोगं कुर्वन्ति अनेन प्रकारेण, वित्तकोशाः येषां पार्श्वे अतिरिक्तधनराशिः अस्ति (नियोक्ता) अथवा यस्य धनराशेः आवश्यकता भवति यथा (ऋणग्रहीता) इत्यनयोः मध्ये मध्यस्थतायाः कार्यं कुर्वन्ति। वित्तकोशाः नियोजितधनराशौ यं कुसीदं यच्छन्ति ततः अधिकं कुसीदम् ऋणरूपेण प्रदत्तधने स्वीकुर्वन्ति । ऋणग्रहीतृभ्यः स्वीकृतकुसीदस्य नियोक्तृभ्यः च प्रदत्तकुसीदस्य मध्यस्थान्तर-माध्यमः एव वित्तकोशानाम् आयस्य प्रमुखस्रोतसः रूपेण अस्ति।

यदि सर्वे धननियोक्तारः एकस्मिन् एव काले स्वीयधनराशिम् आहर्तुम् इच्छेयुः तर्हि किं भविष्यति ?

साखस्य द्वे विभिन्ने स्थिती

अस्माकं दैनिकीसु गतिविधिषु ईदृशानि बहूनि आदानप्रदानानि भवन्ति , यत्र विभिन्नरूपेषु ऋणस्य प्रयोगः भवति । ऋणेन अस्माकं तात्पर्यं कयाचित् सहमत्या अस्ति यत्र कुसीदकारः अधमर्णाय धनं वस्तूनि सेवाः च उपलब्धं कारयति तथा च भविष्ये अधमर्णेन धनस्य प्रतिदानस्य प्रतिज्ञां कारयति ।अधुना वयं निम्नलिखितेन उदाहरणद्वयेन जानीमः यत् ऋणस्य भूमिका का भवति ।

(१) उत्सवानाम् ऋतुः

अस्मात् समयात् मासद्वयानन्तरम् उत्सवानाम् ऋतुः अस्ति तथा च पादत्राण-निर्मातुः सलीमाय नगरस्य कस्यचित् महतः व्यापारिणः 3000पादत्राण-युगलानांनिर्माणस्यआदेशःभवति। सः आदेशः सलीमेन एकस्मिन् मासे एव पूरणीयः अस्ति। उत्पादनस्य कार्यं समयेन पूरयितुं सलीमः सीवनाय संश्लेषणाय च अनेकेषां श्रमिकाणाम् आवश्यकताम् अनुभवति। सः असंशोधितानां वस्तूनाम् अपि क्रयणं करिष्यति । एतेषां व्ययानां पूरणाय सलीमः द्वाभ्यां स्रोतोभ्याम् ऋणं स्वीकरोति। प्रथमं सः चर्मव्यापारिणः चर्म पूर्वं स्वीकरोति धनं च पश्चाद् दास्यामि इति प्रतिज्ञां करोति ।

द्वितीयः , सः आदेशकर्त्रा महाव्यापारिणः 1000 पादत्राणानां कृते अग्रिमधनस्य रूपेण ऋणं स्वीकरोति तथा च मासस्य समाप्तेः प्राक् तस्य आदेशपूरणस्य सङ्कल्पं करोति । मासस्य अन्ते सलीमः 3000 पादत्राणानां निर्माणे सफलः भवति । सः तेन महाव्यापारिणः लाभम् अपि अर्जयति तथा सः गृहीतं ऋणम् अपि प्रतिददाति ।

सलीमः उत्पादनाय कार्यशीलाया- परिसम्पत्तेः आवश्यकताम् ऋणेन पूरयति । ऋणेन सः उत्पादस्य कार्यशीलानां व्ययानां तथा च उत्पादानां समयेन पूरणे साहाय्यं गृह्णाति , स्वलाभं च वर्धयति। एवम्, ऋणं काञ्चित् महत्वपूर्णां सकारात्मिकीं च भूमिकां निर्वहति ।

अन्ते सलीमः 3000 पादत्राणानां निर्माणे सफलः भवति । सः तेन महाव्यापारिणः लाभम् अपि अर्जयति तथा सः गृहीतम् ऋणम् अपि प्रतिददाति ।सलीमः उत्पादनाय कार्यशीलाया- परिसम्पत्तेः आवश्यकताम् ऋणेन पूरयति । ऋणेन सः उत्पादस्य कार्यशीलानां व्ययानां तथा च उत्पादानां समयेन पूरणे साहाय्यं गृह्णाति , स्वलाभं च वर्धयति । **एवम्, ऋणं काञ्चित् महत्वपूर्णां सकारात्मिकीं च भूमिकां निर्वहति ।**

(२) स्वप्नायाः समस्याः

काचित् लघ्वी कृषिका स्वप्ना, स्वस्य 3 एकड-परिमितायां भूमौ कलायं उत्पादयति । सा आशावती अस्ति यत्, सस्ये पक्वे जाते सति ऋणं प्रतिदास्यति इति अतः सः कुसीदकारात् ऋणं स्वीकरोति । सस्ये कीटनाशकानाम् आक्रमणात् तस्य नाशः भवति । यद्यपि स्वप्ना तत्र महार्हाणां कीटनाशकानां प्रयोगं करोति । तथापि तेन कश्चिद् विशेषः लाभः न भवति सस्यं च नष्टं भवति । सा कुसीदकारस्य ऋणस्य प्रतिदाने असमर्था जाता तथा एकस्मिन् वर्षे तद् ऋणम् इतोपि वर्धितं भवति । अग्रिमे वर्षे स्वप्ना कृषिकार्याय पुनः ऋणं स्वीकरोति । अस्मिन् वर्षे सस्यं सामान्यं भवति तथापि तावान् लाभः न जायते येन सा ऋणं प्रतिदातुं शक्ता स्यात् । सा ऋणे मग्ना जाता । अतः ऋणं प्रतिदातुं सा स्वभूमेः किञ्चिद् भागं विक्रेतुं विवशा जाता ।

ग्रामीणक्षेत्रेषु ऋणोद्-ग्रहण-प्रमाणपत्रस्य मुख्याभ्यर्थना बीजवपनकाले भवति । सस्योत्पादने बीजानाम् उर्वरकाणां कीटनाशकानां जलस्य विद्युतः उपकरणानां सुष्ठुकरणादिकस्य च कृते महान् व्ययः भवति । उपर्युक्तविषयस्य कृते तत्र क्रयणस्य सस्यविक्रयणस्य च आभ्यन्तरे न्यूनातिन्यूनं 3-4 मासात्मककालस्य अन्तरालं भवति। सामान्यतः कृषकाः ऋतोः आरम्भे सस्योत्पादनाय ऋणरूपधनं गृह्णन्ति अपि च सस्यस्य फलप्राप्तौ पुनः धनं प्रत्यर्पयन्ति। ऋणरूपधनस्य प्रत्यर्पणं मुख्यतः सस्यद्वारा प्राप्ते आये आश्रितं भवति। स्वप्नायाः विषये सस्यनष्टे सति ऋणप्रत्यर्पणम् अशक्यं जातम्। तया ऋणं प्रत्यर्पयितुं स्वीयभूमेः कञ्चनभागं विक्रेतुं बाध्या जाता। ऋणकारणात् स्वप्नायाः अर्जनं द्विगुणितं न जातम् अपितु स्थितिः दयनीया जाता। सामान्यभाषया ऋणजालं तत् उच्यते।

एतस्मिन् विषये ऋणेण ऋणग्रहिता तस्यां स्थितौ निपात्यते, यतः बहिर्भागं प्रति आगन्तुम् अतीव कष्टदायकं भवति । कस्याञ्चित् स्थितौ प्रायः ऋणरूपधनेन आयवर्धने सहयोगः क्रियते, यत्र जनस्य स्थितिः पूर्वापेक्षया समीचीना जायते । अपरस्यां स्थितौ , सस्यस्य नाशे सति ऋणेन जनः ऋणजाले निपात्यते । स्वप्ना ऋणं प्रत्यर्पयितुं स्वीयभूमेः भागं विक्रेतुं बाध्या भवति । स्पष्टम् अस्ति यत् तस्याः स्थितिः पूर्वापेक्षया दयनीया जाता स्यात् । ऋणेन लाभः भविष्यति उत न, इदं परिस्थितिजन्यं हानिस्थितौ च प्राप्तसहयोगस्य सम्भावनाश्रितः भवति । प्रत्येकस्मिन् ऋणसन्धौ कुसीदमात्रा निश्चीयते , यः अधमर्णेन उतमर्णाय मूलधनराशिना सह दातव्या भवति।

1. निम्नलिखिततालिकां पूरयन्तु।

	सलीमः	स्वप्ना
ते कस्मात् ऋणावश्यकताम् अनुभूतवन्तः ?		
समस्या का आसीत् ?		
परिणामः के जाताः ?		

2. कल्पनां कुर्वन्तु, सलीमः वणिग्भ्यः वस्तुसम्बद्धादेशान् प्राप्नोति। षड् वर्षानन्तरं तस्य स्थितिः का भविष्यति?
3. कानि कारणानि सन्ति, यानि स्वप्नास्थितिं समस्यायुक्तां कुर्वन्ति ? निम्नलिखितकारकाणां चर्चां कुर्वन्तु – कीटनाशक-ओषधानि, श्रेष्ठिनः अथवा उत्तमर्णाः, ऋतुः।

ऋण-सम्बद्ध-प्रतिभूतयः

एतदतिरिच्य, उत्तमर्णः कञ्चित् समर्थक-ऋणाधार-वस्तु अपि स्थापयितुं शक्नोति । समर्थक-ऋणाधारः तादृशी सम्पद् अस्ति, यस्याः स्वामी अधमर्णः अस्ति (यथा भूमिः,भवनम्,वाहनम्,पशुः, वित्तकोशीयपुञ्जी इत्यादिकम्) अपि च एतस्याः सम्पत्तेः प्रयोगं सः उत्तमर्णाय प्रतिभूतिरूपेण करोति यावत्पर्यन्तं गृहीतऋणस्य प्रत्यर्पणं न भवति । यदि अधमर्णः धनं न प्रत्यर्पयति, तर्हि उत्तमर्णः धनप्राप्तये सम्पत्तेः अथवा समर्थक-ऋणाधारस्य विक्रयणाय अधिकारी भवति। यथा भूमिः, भवनम्, वाहनम्, पशुः, वित्तकोशीयपुञ्जी इत्यादिकं सामान्योदाहरणानि समर्थक-ऋणाधारस्य सन्ति येषाम् उपयोगः ऋणं गृहीतुं क्रियते।

आवास-ऋणम्

मेघा गृहं क्रेतुं वित्तकोशात् पञ्चलक्षरूप्यकाणि ऋणरूपेण स्वीकृतवती। एतस्मिन् ऋणे कुसीदस्य वार्षिकमात्रा 12 प्रतिशतम् अस्ति अपि च एतत् ऋणं दशवर्षावधौ भागशः मासिकदेयरूपेण प्रत्यर्पणीयम् । मेघा वित्तकोशात् ऋणस्वीकरणात् प्राक् तया स्वीयसेवाकार्यसम्बद्धं वेतनमानसबद्धं च विवरणं दर्शनीयं भवति । वित्तकोशः नवीवगृहस्य सर्वविधलेखान् ऋणाधाररूपेण स्वीयपार्श्वे स्थापयति, यदा मेघा कुसीदसहितं मूलराशिं प्रत्यर्पयिष्यति तदा वित्तकोशः अभिलेखान् प्रतिदास्यति । **मेघायाः आवास-सम्बद्ध-ऋणस्य निम्नलिखितविवरणानां पूर्तिं कुर्वन्तु –**

ऋणराशिः(रूप्यकेषु)	
ऋण-अवधिः	
आवश्यक-विवरण-कर्गदानि	
कुसीदमात्रा	
प्रतिदानस्य स्वरूपम्	
समर्थक-ऋणाधारः	

कुसीदमात्राम्, समर्थक-ऋणाधारम्, आवश्यक-विवरण-कर्गदानि, प्रतिपादनस्य च उपायान् सम्मिलितरूपेण **ऋणस्य प्रतिभूतयः** इति उच्यन्ते ।ऋणसम्बद्धप्रतिभूतिषु काचित् एका ऋणव्यवस्था अपर-ऋण-व्यवस्था नितरां पृथक् भवति । ऋणसम्बद्धाप्रतिभूतयः उत्तमर्णस्य अधर्मणस्य च प्रकृतौ अपि आश्रिताः भवन्ति । अग्रिमभागे एतादृशानि उदाहरणानि प्रदत्तानि सन्ति, यत्र विभिन्न-ऋण-व्यस्थासु ऋणसम्बद्ध-प्रतिभूतयः पृथक् पृथक् भवन्ति ।

आगच्छन्तु – एतेषु विषयेषु विचारयामः –

1. उत्तमर्णः ऋणदानकाले समर्थक-ऋणाधारस्य याचनां किमर्थं करोति ?
2. अस्माकं देशस्य काचित् व्यापकजनसङ्ख्या निर्धना वर्तते। किम् एवंविधा जनसङ्ख्या ऋणग्रहणस्य क्षमतां प्रभावयति ?
3. कोष्ठके प्रदत्तानां समुचितविकल्पानां चयनं कृत्वा रिक्तस्थानानि पूरयन्तु –

   ऋणस्वीकरणकाले अधमर्णाः सरल-ऋण-ग्रहण-प्रतिभूतीः पश्यति।

   एतस्य अभिप्रायः अस्ति ---- (निम्ना/उच्चा) कुसीदमात्रा, --- (सरलाः/कठिनाः) प्रतिदानप्रतिभूतयः,---(न्यूनः/अधिकः) समर्थकः ऋणाधारः अपि च आवश्यककर्गदः च।

विविध-प्रकारकं साखप्रबन्धम् – कस्यचित् ग्रामस्य उदाहरणम्

रोहितः रञ्जनः च कक्षायाम् ऋणसम्बद्धप्रतिभूति-सम्बद्धम् अध्ययनं पूर्णं कृतम् । ते स्वीयक्षेत्रे विविधप्रकारकाणाम् ऋणप्रबन्धनानां विषये अवगन्तुम् उत्सुकाः आसन् - के जनाः ऋणरूपेण धनं यच्छन्ति अधर्मणाः के आसन् ? ऋणसम्बद्धाः प्रतिभूतयः काः आसन् ? रोहितः रञ्जनः च निर्णीतवन्तौ यत् – तौ कैश्चित् ग्रामजनैः सह एतस्मिन् विषये वार्तालापं करिष्यन्ति । अग्रे भवन्तः तयोः वित्तीयलेखां पठितुं शक्नुवन्ति

15, नवम्बरमासः, 2016 तमे वर्षे, वयं साक्षात् तेषु क्षेत्रेषु गच्छामः यत्र दिनस्य तस्मिन् काले अधिकतरकृषकाः श्रमिकाः च कार्यं कुर्वन्तः स्युः । क्षेत्रेषु आलूकानां सस्यं रोहति । आदौ वयं सोनपुरं, कञ्चन लघुग्रामः, यत्र सेचनस्य सौविध्यानि विद्यन्ते, तत्रत्येन केनचित् श्यामलनामकेन कृषकेण सह मिलामः ।

श्यामलस्य कथनमस्ति यत् सः स्वीये 1.5 एकडपरिमितभूमेः कर्षणाय प्रत्येकस्मिन् ऋतौ ऋणरूपधनस्य आवश्यकता भवति। केभ्यश्चित् वर्षेभ्यः पूर्वं सः ग्रामस्य श्रेष्ठिनः ऋणं स्वीकुर्वन्ति स्म यत्र तेन पञ्चप्रतिशतं मासिककुसीदं दातव्यं भवति (60 प्रतिशतं वार्षिकम्) । गतेभ्यः केभ्यश्चित् वर्षेभ्यः श्यामलः ग्रामस्य कस्माच्चित् वणिजः त्रिप्रतिशतं मासिककुसीदरूपेण ऋणं स्वीकरोति।

कृषिकाले ऋतोः आरम्भे वणिक् ऋणे कृषिसम्बद्धानाम् आवश्यकतानां पूर्तिं करोति, सस्यपक्त्वकाले तत् ऋणं प्रत्यर्पणीयं भवति।

ऋणे कुसीदमतिरिच्य वणिक् कृषकैः सङ्कल्पं कारयति यत् कृषकः पक्वसस्यं तस्मै एव विक्रेष्यते । इत्थं वणिक् निश्चिन्तः अस्ति यत् ऋणस्य प्रतिदानं यथाकालं भविष्यति । सस्यमूल्यं सस्यकर्तनकाले न्यूनं भवति अतः सः कृषकेभ्यः न्यूनमूल्येन सस्यं क्रीत्वा अनन्तरकाले च मूल्यवर्धनकाले सस्यं विक्रीय अत्यधिकं लाभांशम् अर्जयति । वणिग् तस्मिन् काले सस्यक्रयणे लाभांशम् अर्जयति । सः सस्यं न्यूनमूल्येन क्रीत्वा अनन्तरकाले मूल्यवर्धने विक्रीणीते ।

अधुना वयम् **अरुणेन** मिलामः यः कस्यचित् कृषक-सम्बद्ध-कार्यस्य निरीक्षणं करोति । अरुणस्य पार्श्वे सप्त-एकड-परिमिता भूमिः वर्तते । अरुणः सोनपुरस्य तेषु केषुचित् जनेषु अस्ति, यः कृष्यर्थं वित्तकोशात् ऋणं प्राप्तवान् । एतस्मिन् ऋणे वार्षिककुसीदमात्रा 8.5 प्रतिशतम् अस्ति, तथा च एषा अग्रिमैः त्रिभिः वर्षैः अपि प्रत्यर्पयितुं शक्यते । अरुणस्य योजना अस्ति यत् सः सस्यपाककाले स्वीयोत्पादनस्य कमपि भागं विक्रीय तेन स्वीकृतस्य ऋणस्य प्रत्यर्पणं करिष्यति । सः अवशिष्ट-आलुक-सस्यं शीतभाण्डारगृहे स्थापयित्वा वित्तकोशात् तस्य प्रतिदाने नवीनम् ऋणं ग्रहीतुं प्रार्थनापत्रं दातुम् इच्छति । वित्तकोशाः तादृशानां कृषकाणां कृते सौविध्यानि दातुं सज्जाः सन्ति ये पूर्वम् अपि कृषिकार्यार्थं तेभ्यः ऋणं स्वीकृतवन्तः सन्ति ।

रमा समीपस्थे क्षेत्रे कृषिश्रमिकरूपेण कार्यं करोति। वर्षे नैकमासेषु रमासमीपे कमपि कार्यं न भवति। सहसा रुग्णायां सत्याम् अथवा परिवारे कस्मिंश्चित् समारोहे व्ययार्थम् अपि तया ऋणं स्वीकरणीयं भवति। रमा ऋणार्थं स्वीये स्वामिनि यः सोनपुरस्य मध्यवर्गीयः भूस्वामी वर्तते तस्मिन् आश्रिता भवति। भूस्वामी तस्यै 5 प्रतिशतं मासिककुसीदे ऋणं ददाति। रमा तत् ऋणं भूस्वामिनः समीपे कार्यं कृत्वा प्रत्यर्पयति। अधिकांशतया, रमया नवीन-ऋणं ग्रहणीयं भवति, अपरञ्च सा पुरातन-ऋणं प्रत्यर्पयितुम् अपि न शक्नोति । वर्तमानसमये तया भूस्वामिने 5,000 रुप्यकाणि दातव्यानि। यद्यपि भूस्वामी तया सह समीचीनतया न व्यवहरति पुनरपि सा तदर्थं नैरन्तर्येण कार्यं करोति यतः आवश्यकतायां सत्यां सा ऋणं प्राप्तुं शक्नुयात्। रमा अस्मान् सूचयति यत् सोनपुरे भूमिहीनानां जनानां कृते ऋणस्य एकमात्रं सोतोरूपेण भूस्वामिनः एव सन्ति।

सहकारि-समितिभ्यः ऋणम्

वित्तकोशान् अतिरिच्य ग्रामीणक्षेत्रेषु अनार्घ-ऋणस्य किञ्चित् अन्यस्रोतः सहकारिसमितयः सन्ति। सहकारि-समितीनां सदस्याः स्वीयसंसाधनानि केषुचित् क्षेत्रेषु सहयोगाय एकत्रीकुर्वन्ति। नैकविधाः सहकारिसमितयः भवितुं शक्नुवन्ति, यथा – कृषकाणां तन्तुवायानाम् औद्योगिकश्रमिकादीनां च सहकारिसमितयः। कृषक-सहकारि-समितिःसोनपुरस्य समीपस्थे कस्मिंश्चित् ग्रामे कार्यं करोति। एतस्याः 2300 कृषकसदस्याः सन्ति।

एषा स्वीयसदस्येभ्यः नियोजितधनराशिं प्राप्नोति। एषः नियुक्तधनराशिः ऋणाधाररूपेण मन्यते, अनया सहकारिसमित्या वित्तकोशात् प्रभूतम् ऋणं प्राप्तम्। एतस्य धनराश्याः प्रयोगः सदस्येभ्यः ऋणरूपधनं दातुं क्रियते। एतस्य ऋणस्य प्रत्यर्पणस्य अनन्तरम् ऋणस्य अपरं सत्रं प्रारब्धुं शक्यते।

कृषक-सहकारि-समितिः कृष्युपकरणानि क्रेतुं कृषिकार्यं कृषिसम्बद्धवाणिज्यं च कर्तुं मत्स्यपालनाय गृहनिर्माणाय अन्येषां च विविधकार्याणां कृते व्ययार्थम् ऋणं प्रापयति।

आगच्छन्तु – एतेषु विषयेषु विचारयामः –

1. सोनपुरे ऋणस्य विभिन्नस्रोतसां सूचीं कुर्वन्तु।
2. उपरि प्रदत्तेषु अनुच्छेदेषु ऋणस्य विभिन्नप्रयोगयुक्ताः पङ्क्तीः रेखाङ्किताः कुर्वन्तु।
3. सोनपुरस्य लघुकृषकाणां मध्यमकृषकाणां भूमिहीनकृषकश्रमिकाणां च कृते ऋणसम्बद्धप्रतिभूतीनां परस्परं तुलनां कुर्वन्तु।
4. श्यामलस्य तुलनायाम् अरुणः कृषिकार्येण अधिकायं कस्मात् कारणात् प्राप्स्यति ?
5. किं सोनपुरस्य सर्वे जनाः न्यूनकुसीदमात्रया ऋणं प्राप्तुं शक्नुवन्ति ? के जनाः ऋणं प्राप्तुं शक्नुवन्ति ?
6. समुचितोत्तरं चिह्नीकुर्वन्तु –

   (क) समयानुसारम्, रमायाः ऋणम्।

   - वर्धनं भविष्यति
   - समानं भविष्यति
   - विकलनं भविष्यति

   ख) अरुणः सोनपुरस्य तेषु जनेषु अस्ति ये वित्तकोशेभ्यः ऋणरूपेण धनं स्वीकुर्वन्ति यतो हि –

   - ग्राम्याः अन्ये जनाः श्रेष्ठिभ्यः ऋणरूपधनं ग्रहीतुम् इच्छन्ति।
   - वित्तकोशाः समर्थक-ऋणाधारस्य अभ्यर्थनां कुर्वन्ति या प्रत्येकं जनस्य पार्श्वे न भवति।
   - वित्तकोशीये ऋणे कुसीदमात्रा तावती एव अस्ति यावतीं वणिजः स्वीकुर्वन्ति।
7. कैश्चित् जनैः सह वार्तालापं कुर्वन्तु, यैः भवन्तः स्वीयक्षेत्रे ऋण-प्रबन्धानां विषये कामपि सूचनां प्राप्तुं शक्नुयुः कृताचर्चां सङ्गृह्णन्तु। विभिन्नजनेषु ऋणसम्बद्ध-प्रतिभूतिषु विभिन्नताः लिखन्तु।

भारते औपचारिक-क्षेत्रीयाः साखप्रक्रिया

अस्माभिः उपरिस्थेषु उदाहरणेषु दृष्टं यत् – जनाः विभिन्नस्रोतोभ्यः ऋणं प्राप्नुवन्ति । विभिन्न-प्रकारकाणि ऋणानि द्वयोः भागयोः विभक्तुं शक्यन्ते – औपचारिकक्षेत्रीयम् अनौपचारिकक्षेत्रीयं च ऋणम् । प्रथमे वर्गे वित्तकोशेभ्यः सहकारिसमितिभ्यः च प्राप्त-ऋणानि गण्यन्ते । अनौपचारिक-उत्तमर्ण-वर्गे श्रेष्ठिनः, व्यापारिणः, भूस्वामिनः, सम्बन्धिनः, मित्राणि च गण्यन्ते । प्रथमे आलेखे भवन्तः भारतस्य ग्रामीणकुटुम्बेभ्यः ऋणस्य विभिन्नस्रोतांसि द्रष्टुं शक्नुवन्ति । किम् अधिक-ऋणानि औपचारिक-क्षेत्रेभ्यः आयान्ति अथवा अनौपचारिक-क्षेत्रेभ्यः

आलेखः १ वर्षम् २०१२ भारते १००० ग्रामीणपरिवाराणां ऋणस्य स्रोतांसि



भारतीय-रिजर्व-वित्तकोशः ऋणानाम् औपचारिकस्रोतसां कार्यप्रणाल्याः निरीक्षणं करोति । उदाहरणार्थम् – अस्माभिः दृष्टं यत् वित्तकोशाः स्वीय-नियुक्त-धनराशेः कञ्चित् न्यूनतमप्रत्यक्ष-भागः स्वपार्श्वे स्थापयन्ति।

भारतीय-रिजर्व-वित्तकोशः निरीक्षते यत् वित्तकोशाः यथार्थतः प्रत्यक्ष-शेषान् कल्पितवन्तः । भारतीयरिजर्वकोशः एतं विषयमपि निरीक्षते यत् वित्तकोशाः केवलाः अर्जनशीलेभ्यःव्यवसायिभ्यः वणिग्भ्यः च एव ऋणं प्रापयन्ति, उत लघुकृषकेभ्यः लघु-उद्योग-सञ्चालकेभ्यः लघु-अधमर्ण-इत्यादिभ्यः अपि ऋणं यच्छन्ति । यथाकालं, वित्तकोशैः भारतीय-रिजर्व-वित्तकोशाय इयं सूचना दातव्या भवति यत् कियत् केभ्यः च ऋणं दीयते तस्य प्रदत्त-ऋणस्य कुसीदप्रतिशतं च कियत् अस्ति ? अनौपचारिक-क्षेत्रके ऋणदातॄणां गतिविधि-सम्बद्ध-निरीक्षणाय कापि संस्था नास्ति । ते

स्वैच्छिककुसीदमात्रया ऋणं दातुं शक्नुवन्ति । अवैधानिकोपायैः स्वीयधनप्रतिग्रहणं ते कुर्वन्ति तान् उद्दिश्य कश्चित् अपि नियन्त्रकः तत्र नास्ति। औपचारिक-करदातृणाम् अपेक्षया अनौपचारिक-क्षेत्रीयाः ऋणदातारः प्रायः कदाचित् अधिक-कुसीदं स्वीकुर्वन्ति । अतः अनौपचारिकम् ऋणं करदात्रे अधिकमूल्यकं भवति। ऋणसम्बद्धस्य कुसीदस्य अधिकमात्रायाः अर्थः अस्ति यत् अधमर्णस्य आयस्य अधिकतरः भागः ऋणस्य कुसीदप्रत्यर्पणे एव व्ययीभवति। अतः, अधमर्णानां पार्श्वे आत्मार्थं न्यूनः आयः अवशिष्टः भवति । (यथा अस्माभिः सोनपुरवास्तव्यस्य श्यामलस्य उदाहरणेन अवगतम् आसीत्)। कदाचित् तु कुसीदस्य मात्रा तावती भवति यावती च मात्रा ऋणस्वीकुर्तुः आयस्य अपि न भवति। एतस्मात् कारणात् कुसीदभारः वर्धते। (यथा – अस्माभिः सोनपुरस्थायाः रमायाः उदाहरणेन अवगतम् आसीत्) अपि च ऋणग्रहीता ऋणजाले बद्धः भवति। एवमपि भवितुं शक्नोति यत् ये जनाः ऋणं स्वीकृत्य स्वीयम् उद्योगागारं स्थापयितुम् इच्छन्ति, ते अधिक-कुसीद-राशिं दृष्ट्वा तत् कर्तुं न प्रवर्तन्ते। एतानि सर्वाणि कारणानि दृष्ट्वा वित्तकोशैः सहकारिसमितिभिः च आधिक्येन ऋणं दातव्यम् । तन्माध्यमेन जनानाम् आयः वर्धयितुं शक्नोति अपि च नैके जनाः स्वीयानां विभिन्नानाम् आवश्यकतानां कृते न्यूनकुसीदराश्या ऋणं ग्रहीतुं शक्ष्यन्ति । ते कृषिकार्यं सस्यकार्यं वा कर्तुं शक्नुवन्ति, कमपि उद्योगं कर्तुं शक्नुवन्ति, लघु-उद्योगागारादिकानि स्थापयितुं शक्नुवन्ति। ते नवीनोद्योगं स्थापयितुं शक्नुवन्ति अथवा वस्तुवाणिज्यं कर्तुं शक्नुवन्ति । न्यूनकुसीदकम् ऋणं देशस्य विकासाय अत्यावश्यकम् अस्ति । द्वितीये आलेखे नागर-जनानां कृते ऋणस्य औपचारिकम् अनौपचारिकं च महत्त्वं दर्शितम् अस्ति। आलेखे निर्धनप्रभृत्तिः धनाढ्याः जनाः चतुर्षु भागेषु विभक्ताः सन्ति । भवन्तः द्रष्टुं शक्नुवन्ति यत् नगरक्षेत्रीयाणां निर्धनकुटुम्बानाम् ऋणसम्बद्धाः 85 प्रतिशतम् आवश्यकताः अनौपचारिकश्रोतोभिः पूर्तिं गच्छन्ति । एतस्य तुलनां भवन्तः नगरक्षेत्रीयाणां धनाढ्यकुटुम्बैः सह कुर्वन्तु । भवन्तः किं पश्यन्ति ? तेषां केवलं दशप्रतिशतम् ऋणम् अनौपचारिकस्रोतोभ्यः अपरञ्च 90 प्रतिशतम् औपचारिक-स्रोतोभ्यः च वर्तते। एवंविधमेव परिदृश्यं ग्रामीणक्षेत्रेषु अपि अस्ति । धनिक-कुटुम्बाः औपचारिकेभ्यः ऋणदातृभ्यः न्यूनमूल्यकम् ऋणं स्वीकुर्वन्ति, अपरञ्च निर्धन-कुटुम्बैः ऋणार्थं बहुधनं दातव्यं भवति।

औपचारिकम् अनौपचारिकं च ऋणोद्ग्रहण-पत्रम्–कः अनेनकिंप्राप्नोति?

अनेन सम्पूर्णवर्णनेन किं ज्ञायते ? प्रथमम्, औपचारिकस्रोतः अधुना अपि ग्रामीणकुटुम्बानां सम्पूर्ण-ऋण-आवश्यकतानां केवलं 50 प्रतिशतम् एव पूरयति। अवशिष्टाः आवश्यकताः अनौपचारिक-स्रोतोभ्यः पूर्तिं गच्छन्ति । अनौपचारिक-ऋण-दातृभ्यः स्वीकृते ऋणे सामान्यतः कुसीदराशिः बह्वधिकाः भवति अपि च इदम् ऋणम् उत्तमर्णानाम् आयवर्धकम् एव भवति ।अतः, वित्तकोशाः सहकारिसमितयः च स्वीयगतिविधिन् विशेषतया ग्रामीणक्षेत्रेषु विस्तारं

द्वितीयः आलेखः - नगरीय-कुटुम्बैः स्वीकृतस्य सम्पूर्णस्य ऋणस्य कियत् प्रतिशतम् औपचारिकं तथा च कियत् प्रतिशतम् अनौपचारिकम् आसीत् ?



नीलवर्णीयाः – अनौपचारिक-स्रोतसि ऋणस्य प्रतिशतम्

वृन्ताकवर्णीयाः – औपचारिक-श्रोतसि ऋणस्य प्रतिशतम्

नयेयुः इति अवश्यकता वर्तते । यतः अधमर्णानाम् अनौपचारिक-स्रोतःसु निर्भरता न्यूना स्यात् । अपरम्, यदि एकतः औपचारिक-स्रोतःसम्बद्धानाम् ऋणानां विस्तारः स्यात् तर्हि अपरतः इदमपि आवश्यकमस्ति यत् इदम् ऋणं सर्वजनैः प्राप्तव्यं स्यात् । वर्तमानकाले, धनिकाः एव औपचारिकस्रोतोभ्यः ऋणं प्राप्नुवन्ति अपरञ्च निर्धनाः अनौपचारिक-स्रोतःसु एव आश्रिताः भवन्ति । इदम् आवश्यकम् अस्ति यत् औपचारिकस्य ऋणस्य अधिकतया समानवितरणं स्यात्, यतः निर्धनाः अपि न्यूनमूल्यकस्य ऋणस्य प्राप्तिद्वारा लाभान्विताः स्युः ।

आगच्छन्तु – एतेषु विषयेषु विचारयामः –

1. ऋणस्य औपचारिकेषु अनौपचारिकेषु च स्रोतःसु का पृथक्तता अस्ति ?
2. सर्वेषां जनानां कृते यथोचितमात्रया ऋणं किमर्थम् उपलब्धं स्यात् ?
3. किं भारतीय-रिजर्व-वित्तकोशसदृशः कश्चन निरीक्षकः स्यात् यः अनौपचारिकानाम् उत्तमर्णानां गतिविधीनां निरीक्षणं कुर्यात् ? तस्य कार्यं कठिनं किमर्थं भविष्यति ?
4. भवतां दृष्टौ निर्धनकुटुम्बानाम् अपेक्षया धनिककुटुम्बानाम् औपचारिक-ऋणानां भागः किमर्थम् अधिकः भवति ।

तूलिकासीवनं कुर्वन् कश्चन श्रमिकः।

निर्धनानां स्वसहायतासमूहाः

गतखण्डे अस्माभिः दृष्टं यत् निर्धनाः ऋणार्थम् अधुना अपि अनौपचारिक-स्रोतःसु एव आश्रिताः सन्ति । कस्मात् एवम् अस्ति ? भारतस्य सर्वेषु ग्रामीणक्षेत्रेषु वित्तकोशाः विद्यमानाः न सन्ति । यत्र कुत्रचित् विद्यमानाः अपि सन्ति, वित्तकोशात् ऋणरूपधनस्य ग्रहणम् अनौपचारिक-स्रोतसः ऋणग्रहणस्य अपेक्षया अधिकं कठिनम् अस्ति । यथा भवन्तः मेघायाः प्रकरणे दृष्टवन्तः, वित्तकोशात् ऋणं स्वीकर्तुम् ऋणाधारस्य विशेष-आयादि-पत्राणां च आवश्यकता भवति । ऋणाधारस्य अनुपलब्धता किञ्चित् प्रमुखं कारणम् अस्ति, यतः निर्धनाः वित्तकोशात् ऋणं न ग्रहीतुं शक्नुवन्ति । अपरतः, अनौपचारिकाः ऋणदातारः यथा श्रेष्ठिनः, एतान् ऋणग्रहितॄन् व्यक्तिगतरूपेण जानन्ति अपि च एतस्मात् कारणात् प्रायः ऋणाधारं विना अपि ऋणं दातुं सज्जीभवन्ति । ऋणदातारः आवश्यकतायां सत्यां पुरातनस्य ऋणस्य प्रत्यर्पणेन विना अपि नवीनम् ऋणं ग्रहीतुं श्रेष्ठिनं गन्तुं शक्नुवन्ति । परन्तु, श्रेष्ठिनः उत्तमर्णाः वा अधिकमात्रया कुसीदं

गृह्णन्ति, आदानस्य प्रदानस्य च लेखाकार्यम् अपि सावधानं न कुर्वन्ति निर्धनान् अधमर्णान् च पीडयन्ति।

सद्यतनेषु वर्षेषु, जनाः निर्धनेभ्यः ऋणं दातुं नवीनोपायान् व्यवहर्तुं प्रयत्नं कृतवन्तः । एतेषु कश्चन उपायः ग्रामीणक्षेत्रेषु निर्धनानां विशेषतः महिलानां लघुषु स्वयंसहायता-समूहेषु सङ्घटनाय अपि च तासां संरक्षितराशिम् एकत्रीकरणाय वर्तते । कस्मिंश्चित् विशिष्टे स्वयंसहायता-समूहे परस्परं प्रतिवेशिनः 15-20 सदस्याः भवन्ति, ये नियमितरूपेण परस्परं मिलन्ति अपि च धनराशेः संरक्षणं कुर्वन्ति । प्रतिजनम् आयः 25 रूप्यकाणि आरभ्य शतं रूप्यकाणि अथवा ततोऽधिकं भवितुं शक्नोति । इदं कुटुम्बानां धनसंरक्षण-क्षमतायाम् आश्रितं भवति । सदस्याः स्वीयाः आवश्यकताः पूरयितुं लघुभ्यः ऋणदातृसमूहेभ्यः एव ऋणरूपं धनं स्वीकर्तुं शक्नुवन्ति। समूहः स्वीकृते ऋणे कुसीदं स्वीकरोति, परन्तु इदं कुसीदम् उत्तमर्णद्वारा स्वीक्रियमाणस्यकुसीदस्य अपेक्षया न्यूनं भवति। एतस्माद् वर्षद्वयात् वा परं , यदि समूहः नियमितरूपेण धनराशेः संरक्षणं करोति तदा समूहः वित्तकोशात् ऋणम् आहर्तुं योग्यः भवति। ऋणं समूहनाम्ना दीयते अपि च एतस्य उद्देश्यं सदस्यानां कृते स्ववृत्तेः अवसराणां सर्जनं भवति। उदाहरणार्थं, सदस्याः अल्पराशियुक्तस्य ऋणस्य ग्रहणाय स्वीयस्य प्राधिकृतस्य च भूमेः मोचनाय कार्यशीलधनराशेः आवश्यकता भवति अपि च (तत्र यथा – बीजानाम् उर्वरकाणां वंशस्य वस्त्रक्रयणाय), गृहनिर्माणाय सीवनयन्त्रक्रयणाय हस्तवयनचक्रोद्योगस्य स्थापनाय पशूनां च क्रयणादिकार्याणां कृते अपि ऋणरूपधनस्य आवश्यकता भवति । संरक्षितराशेः ऋणगतिविधिसम्बद्धान् निर्णयान् प्रायः समूहस्य सदस्याः स्वयं कुर्वन्ति । समूहः प्रदीयमानस्य ऋणस्य तस्य लक्ष्यस्य तस्य राशेः कुसीदमात्रायाः पुनः प्रत्यर्पणस्य च अवध्यादिविषये निर्णयं करोति । एवंविधस्य ऋणस्य प्रत्यर्पणस्य दायित्वमपि समूहस्य भवति ।

कश्चन सदस्यः यदि क्वचित् ऋणस्य प्रत्यर्पणं न करोति तर्हि समूहस्य अन्यसदस्याः एवंविधं प्रकरणं गाभीर्येण स्वीकुर्वन्ति । एतस्मात् कारणाद् एव वित्तकोशाः निर्धनमहिलाभ्यः ऋणं दातुं सज्जाः भवन्ति यतो हि ताः आत्मानं स्वयं सहायतासमूहेषु सङ्घटिताः कुर्वन्ति, यद्यपि तासां पार्श्वे कश्चन अपि ऋणाधारः न भवति।

अनेन प्रकारेण, स्वयं सहायतासमूहः ऋणग्रहीतृणाम् ऋणाधारसम्बद्धायाः न्यूनतारूपसमस्यायाः समाधाने साहाय्यं करोति । ऋणग्रहीतारः यथाकालं विभिन्नप्रकाराणाम् ऋणसम्बद्धानाम् आवश्यकतानां पूर्तये समुचित-कुसीदेन ऋणं प्राप्नुवन्ति। एतदतिरिच्य अयं समूहः ग्रामीणक्षेत्रीयाणां निर्धनानां सङ्घटनाय अपि साहाय्यं करोति । अनेन न केवलाः महिलाः आर्थिकरूपेण स्वावलम्बिन्यः भवन्ति अपि तु समूहस्य नियमितानाम् उपवेशनानां माध्यमेन जनाः सामान्यमञ्चं स्थलं वा अपि प्राप्नुवन्ति, यत्र ताः विविधेषु सामाजिकविषयेषु यथा – स्वास्थ्ये पोषणे गृह्यहिंसादिकेषु परस्परं परिचर्चाम् अपि कर्तुं प्रभवन्ति।

गुर्जरप्रान्ते महिलानां स्वयं सहायतासमूहस्यउपवेशनम्।

बाङ्ग्लादेशस्य ग्रामीण-वित्तकोशः

बङ्ग्लादेश-ग्रामीण-वित्तकोशस्य उचित-कुसीदे निर्धनानाम् ऋणसम्बद्धानाम् आवश्यकतानां पूर्त्तेः कश्चन सफलः इतिहासः वर्तते। एतस्य आरम्भः 1970 तमे वर्षे लघ्वाकारेण अभवत्। 2014 तमवर्षे अक्तूबरमासे ग्रामीण-वित्तकोशस्य अधुना 8.63 लक्षं सदस्याः सन्ति ये बाङ्ग्लादेशस्य 81,390 ग्रामेषु प्रसृताः सन्ति। अत्र ऋणग्रहीत्र्यः प्रायः महिलाः सन्ति यासां सम्बन्धः समाजस्य निर्धनवर्गात् अस्ति। एतादृशैः ऋणधारकैः दर्शितम् अस्ति यत् न केवलाः निर्धनाः महिलाः विश्वसनीयाः ऋणग्रहित्र्यः भवन्ति अपि तु विभिन्नप्रकारिकाः आयस्य लघुगतिविधिन् अपि साफल्येन आरभ्य प्रवर्तयितुं सक्षमाः सन्ति।

'यदि निर्धनेभ्यः जनेभ्यः समुचिते काले समुचितप्रतिभूतीः आश्रित्य ऋणं दीयते, तर्हि लक्षाधिकाः जनाः स्वीयान् लक्षशः लघुगतिविधिन् कृत्वा विकासस्य महत्तमं चमत्कारं कर्तुं शक्नुवन्ति।'

प्रो.मोहम्मदयुनूसः।
ग्रामीणवित्तकोशस्य संस्थापकः अपि च 2006 तमे वर्षे शान्त्यर्थं नोबेलपुरस्कारेण सम्मानितः।

सारांशः

अस्मिन् अध्याये अस्माभिः मुद्रायाः आधुनिकरूपाणि वित्तकोशीयप्रणाल्याः सम्बद्धाः च नैकविषयाः अधीताः। एकतः राशेः नियोक्तारः स्वीयराशिं वित्तकोषेषु नियोजयन्ति, अपरतः, ऋणग्रहीतारः वित्तकोशेभ्यः धनम् आहरन्ति। आर्थिकगतिविधीनां कृते ऋणस्य आवश्यकता भवति। यथा – अस्माभिः दृष्टं ऋणस्य सकारात्मकप्रभावाः भवितुं शक्नुवन्ति अथवा कासुचित् परिस्थितिषु ते अधमर्णस्य दुर्दशां कर्तुं शक्नुवन्ति। ऋणं विभिन्नैः स्रोतोभिः लभ्यते। स्रोतांसि औपचारिकानि अनौपचारिकानि च भवितुं शक्नुवन्ति। औपचारिकाणान् अनौपचारिकाणां च ऋणदातॄणां च मार्गणामध्ये पर्याप्तभेदः भवति। वर्तमानकाले धनिकाः औपचारिकस्रोतोभ्यः ऋणम् आहरन्ति अपरञ्च निर्धनाः अधुना अपि अनौपचारिकस्रोतःसु एव आश्रिताः भवन्ति। इदम् आवश्यकम् अस्ति यत् औपचारिकक्षेत्रीयाणां सर्वेषाम् ऋणानां वर्धनं स्यात्, यतः बहुमूल्यके अनौपचारिके ऋणे निर्भरता न्यूना स्यात्। सहैव, वित्तकोशेभ्यः सहकारिसमित्यित्यादिभ्यः निर्धनाः यत् ऋणं प्राप्नुवन्ति तादृशस्य औपचारिकस्य ऋणस्य भागः वर्धनीयः स्यात्। प्रयासद्वयम् अपि विकासाय एतादृशाय अनिवार्यम् अस्ति।

अभ्यासः –

1. दुर्खीमयुक्तासु परिस्थितिषु ऋणम् अधमर्णाय इतोऽपि समस्याः उत्पादयितुं शक्नोति। स्पष्टीकुर्वन्तु।
2. मुद्रा आवश्यकतानां द्विर्बद्धसंयोगस्य समस्याः कथं समाधत्ते ? स्वीयपक्षतः उदाहरणम् उपस्थाप्य बोधयन्तु।
3. अतिरिक्तमुद्रायुक्तानां जनानाम् अनूभूतावश्यकतानां च जनानां मध्ये वित्तकोशाः कथं मध्यस्थतां कुर्वन्ति ?
4. दशरूप्यकाणां पणकं पश्यन्तु। तदुपरि किं लिखितम् अस्ति ? किं भवन्तः एतस्य कथनस्य व्याख्यां कर्तुं शक्नुवन्ति ?
5. किमर्थं वयं भारते ऋणस्य औपचारिक-स्रोतसां वर्धनस्य आवश्यकताम् अनुभवामः ?
6. निर्धनानां कृते स्वयं सहायतासमूहानां सङ्घटनानां च पृष्ठे मूलविचारः किम् अस्ति ? स्वीयशब्दैः व्याख्यां करोतु।
7. किं कारणं वर्तते यत् वित्तकोशाः केभ्यश्चित् ऋणग्रहितृभ्यः ऋणं दातुं सज्जाः न भवन्ति ?
8. भारतीय-रिजर्व-वित्तकोशः अन्यवित्तकोशानां गतिविधिषु कथं दृष्टिं स्थापयति ? इदं किमर्थम् आवश्यकम् अस्ति ?
9. विकासे ऋणस्य भूमिकायाः विश्लेषणं कुर्वन्तु।

10. मानवः कस्यचित् लघुव्यवसायस्य आरम्भाय ऋणरूपस्य धनस्य आवश्यकता अस्ति। जनः केन आधारेण इदं सुनिश्चितं करिष्यति यत् सः ऋणं वित्तकोशात् स्वीकुर्यात् अथवा उत्तमर्णसकाशात् ? चर्चां कुर्वन्तु।

11. भारते 80 प्रतिशतं कृषकाः लघुकृषकाः सन्ति , ये कृष्यर्थम् ऋणस्य आवश्यकताम् अनुभवन्ति।
    (क) वित्तकोशाः लघुकृषकेभ्यः ऋणदानकाले किमर्थं विभ्यति ?
    (ख) ते अपराणि स्रोतांसि कानि सन्ति ? येभ्यःलघुकृषकाः ऋणं स्वीकर्तुं शक्नुवन्ति ?
    (ग) उदाहरणं दत्त्वा स्पष्टीकुर्वन्तु यत् कथम् ऋणसम्बद्धाः उपबन्धाः लघुकृषकाणां प्रतिकूलाः भवितुं शक्नुवन्ति।
    (घ) परामर्शं यच्छन्तु यत् कथं लघुकृषकेभ्यः मूल्यमूल्यकम् ऋणं प्रापयितुं शक्यते।

12. रिक्तस्थानानां पूर्तिं कुर्वन्तु -
    (क) ---------- परिवाराणाम् ऋणसम्बद्धाः आवश्यकताः प्रायः अनौपचारिकस्रोतोभिः पूर्तिं गच्छन्ति।
    (ख) ---------- ऋणस्य कुसीदेन ऋणस्य भारः वर्ध्यते।
    (ग) ---------- केन्द्रीयसर्वकारस्य पक्षतः मुद्राङ्कितपणकाणि प्रकाशयति।
    (घ) वित्तकोशाः ---------- इत्यस्मिन् दीयमानकुसीदेन ऋणे अधिककुसीदं स्वीकुर्वन्ति।
    (ङ) ----------सम्पत्तिः वर्तते यस्याः स्वामी ऋणग्रहीता भवति यस्याः प्रयोगं सः ऋणग्रहणकाले प्रतिभूतिरूपेण करोति, यावत्पर्यन्तम् ऋणं सम्पूर्णतया सः न प्रत्यर्पयति।

13. समुचितस्य उत्तरस्य चयनं कुर्वन्तु –
    (क) स्वयं सहायता समूहेषु धनसंरक्षणस्य ऋणसम्बद्धाः निर्णयाः प्रायः स्वीक्रियन्ते –
        - वित्तकोशद्वारा
        - सदस्यैः
        - असर्वकारीयसंस्थाभिः
    (ख) ऋणस्य औपचारिकस्रोतःसु सम्मिलितं नास्ति –
        - वित्तकोशाः
        - सहकारिसमितिः
        - नियोक्ता

अतिरिक्तपरियोजना, कार्यकलापः

अधःप्रदत्ततालिका नागरजनानां विभिन्नजनानां च व्यवसायं दर्शयति। एताः जनाः केषाम् उद्देश्यानां कृते ऋणस्य आवश्यकताः अनुभवन्ति ? रिक्तस्तम्भान् पूरयन्तु –

व्यवसायः	ऋणग्रहणस्य कारणानि
निर्माणश्रमिकाः	
सङ्गणकशिक्षिताः स्नातकच्छात्राः	
देहल्यां प्रवासिश्रमिकाः	
गृह्यसेविकाः	
लघुव्यवसायी	
त्रिचक्रिकाचालकः	
बद्ध-उद्योगागारस्य श्रमिकाः	

अग्रे, जनान् भागद्वये विभाजयन्तु, येषां विषये भवन्तः चिन्तयन्ति ये वित्तकोशात् ऋणं प्राप्तुं शक्यन्तु, अपि च ये वित्तकोशात् ऋणं प्राप्तुं न शक्नुवन्ति। भवन्तः वर्गीकरणाय केषां कारकाणाम् उपयोगं कृतवन्तः ?

शिक्षकाणां कृते निर्देशाः

चतुर्थः अध्यायः वैश्वीकरणम् एवं च भारतीया अर्थव्यवस्था

विश्वस्य अधिकतरभागाः परस्परं सम्बद्धाः जायमानाः सन्ति। यद्यपि देशानां मध्ये अस्य पारस्परिकसम्बन्धस्य अनेके आयामाः सन्ति यथा सांस्कृतिकाः सामाजिकाः राजनैतिकाः आर्थिकाः च परन्तु अस्मिन् अध्याये अत्यन्तसीमिते अर्थे वैश्वीकरणस्य विषये चर्चा कृता अस्ति। अस्मिन् वैश्वीकरणस्य परिभाषा बहुराष्ट्रियसमवायानां विदेशिव्यापारमाध्यमेन एवं च विदेशिनिवेशमाध्यमेन देशानां मध्ये एकीकरणस्य रूपेण कृता अस्ति। अग्रे द्रक्ष्यामः यत् अस्मिन् अध्याये पोर्टफोलियोनिवेशसदृशाः जटिलविषयाः त्यक्ताः सन्ति।

यदि वयं विगतानां त्रिंशद्वर्षाणाम् अवलोकनं कुर्मः तर्हि वयं प्राप्नुमः यत् विश्वस्य दूरस्थदेशानां संयोजयित्र्यां वैश्वीकरणप्रक्रियायां बहुराष्ट्रियसमवायानां मुख्यभूमिका अस्ति। बहुराष्ट्रियसमवायाः स्वीयोत्पादनस्य अन्यदेशेषु प्रसारं किमर्थं केन विधिना च कुर्वन्तः सन्ति ? अध्यायस्य प्रथमे खण्डे अस्मिन् विषये एव चर्चा कृता अस्ति। बहुराष्ट्रियसमवायानां तीव्रवृद्धिः तेषां च प्रभावः मात्रात्मकाकलनानाम् अपेक्षया मुख्यतया भारतीयसन्दर्भात् गृहीतानाम् उदाहरणानां द्वारा दर्शितम् अस्ति। अवधानं भवतु यत् उदाहरणानि सामान्यपक्षस्य व्याख्याकरणे सहायकानि भवन्ति। पाठनावधौ धारणाः विशेषेण प्रतिपादनीयाः एवं च उदाहरणानां प्रयोगः व्याख्यायै करणीयः इति। भवन्तः परीक्षणाय तथा च नवीनावधारणानां सुदृढीकरणाय बोधगम्यानुच्छेदानां (यथा द्वितीयखण्डस्य अन्ते दत्तम् अस्ति) रचनात्मकम् उपयोगं कर्तुं शक्नुवन्ति।

वैश्वीकरणस्य प्रक्रियायाः एवं च अस्य प्रभावस्य अवगमने उत्पादनस्य एकीकरणम् एवं च आपणस्य एकीकरणं काचित् महत्त्वपूर्णधारणा अस्ति। अस्मिन् अध्याये वयं वैश्वीकरणस्य प्रक्रियायां बहुराष्ट्रियसमवायानां भूमिकायाः विषये विचारं कुर्वन्तः अस्य विस्तरेण चर्चां कृतवन्तः स्मः। अग्रिमविषयं प्रति गमनात् पूर्वं भवद्भिः सुनिश्चेतव्यम् अस्ति यत् छात्राः एतान् विचारान् पर्याप्तस्पष्टतया आत्मसात्कुर्युः इति।

अनेकैः कारकैः वैश्वीकरणं सुगमं कृतम् अस्ति। एतेषु प्रौद्योगिक्यां तीव्रोन्नतिः व्यापारः एवं च निवेशनीतीनाम् उदारीकरणं एवं च विश्वव्यापारसंघटनसदृशानाम् अन्ताराष्ट्रियसंघटनानां भारः इति एतानि कारकाणि प्रति विशेषावधानं कृतम् अस्ति। प्रौद्योगिक्याम् उन्नतिः छात्राणां कृते किञ्चन आकर्षकक्षेत्रम् अस्ति। भवन्तः छात्रेभ्यः कांश्चन निर्देशान् दत्त्वा तान् स्वतः निरीक्षणं कर्तुं प्रेरयितुं शक्नुवन्ति। उदारीकरणस्य चर्चासमये भवद्भिः अवधानं करणीयम् अस्ति यत् छात्राः भारतस्य उदारीकरणात् पूर्वतनार्थव्यवस्थया अपरिचिताः सन्ति। उदारीकरणात् प्राक्तन्याः पश्चाद्वर्तिन्याः च स्थित्योः मध्ये तुलनां विषमतां च दर्शयितुं नाटकस्य आयोजनं कर्तुं शक्यते। अनेन एव प्रकारेण विश्वव्यापारसंघटनस्य अन्तर्गतं जायमानेषु अन्ताराष्ट्रियसन्धीनां शक्तीनां च असमानसन्तुलनं रोचकविषयः अस्ति यस्य व्याख्यायाः स्थने चर्चायाः रूपेण प्रतिपादनं कर्तुं शक्यते।

अन्तिमखण्डे वैश्वीकरणस्य प्रभावाः सम्मेलिताः सन्ति। विकासप्रक्रियायां वैश्वीकरणेन कियद् योगदानं कृतम् अस्ति ? अस्मिन् खण्डे प्रथमाध्यायस्य द्वितीयाध्यायस्य (यथा न्यायसङ्गतविकासलक्ष्यं किम् अस्ति) विषयान् प्रति अपि अवधानं कृतम् अस्ति यस्य भवन्तः सन्दर्भं दातुं शक्नुवन्ति। अस्य खण्डस्य चर्चासमये स्थानीयपर्यावरणात् क्रियाविधीनाम् उदाहरणानां च ग्रहणम् अपि अतीव आवश्यकम् अस्ति। अनेन तेषां सन्दर्भाणां समावेशः कर्तुं शक्यते येषां समावेशः अस्मिन् अध्याये न कृतः अस्ति। यथा स्थानीयकृषकाणाम् उपरि आयतानां प्रभावः इत्यादयः। एतादृशीनां स्थितीनां विवेचनां कर्तुं सामूहिकविचारमन्थनसत्राणाम् आयोजनं कर्तुं शक्यते।

सूचनायाः स्रोतांसि

अन्ताराष्ट्रियसंघटनद्वारा स्वीये जालपुटे www.ilo.org इत्यत्र न्यायसङ्गतवैश्वीकरणस्य अध्यर्थना कृता अस्ति। एतादृश्यः अध्यर्थनाः अन्यैः संघटनैः अपि कृताः सन्ति। एकम् अन्यं रोचकं स्रोतः विश्वव्यापारसंघटनस्य http//www.wto.org इत्यस्मिन् जालपुटे अस्ति। अनेन स्रोतसा विश्वव्यापारसंघटने क्रियमाणानाम् अनेकविधसन्धीनां विषये सूचनाः प्राप्यन्ते। समवायसम्बद्धानां सूचनानां कृते अधिकतराणां बहुराष्ट्रियसमवायानां स्वीयजालपुटानि सन्ति। यदि भवन्तः बहुराष्ट्रियसमवायान् आलोचनात्मकरीत्या द्रष्टुम् इच्छन्ति तर्हि तदर्थम् अनुमोदितजालपुटम् अस्ति www.corporatewatch.org.uk इति अस्ति।

चतुर्थः अध्यायः

वैश्वीकरणम् एवं च भारतीया अर्थव्यवस्था

अद्यतने विश्वे उपभोक्तृरूपेण अस्मासु केषाञ्चन पुरतः वस्तूनां सेवानां च विस्तृतविकल्पाः सन्ति । विश्वस्य शीर्षस्थविनिर्मातृभिः निर्मितानि कैमरा चलदूरभाषः एवं च दूरदर्शनम् इति एतेषां नवीनतमप्रारूपाणि अस्माकं कृते सुलभानि सन्ति । सदैव भारतीयमार्गेषु वाहनानां नूतनप्रारूपाणि द्रष्टुं शक्यन्ते । तानि दिनानि व्यतीतानि यदा भारतस्य मार्गेषु केवलम् एम्बेसडरवाहनानि अथवा फियेटकारयानानि दृश्यन्ते स्म । अद्य भारतीयाः विश्वस्य प्रायः सर्वैः शीर्षस्थैः समवायैः निर्मितानां कारयानानां क्रयणं कुर्वन्तः सन्ति । अन्येषां बहूनां वस्तूनां ब्राण्डेषु अपि एतादृशी एव तीव्रवृद्धिः द्रष्टुं शक्यते । युतकान् आरभ्य दूरदर्शनानि एवं च प्रसंस्कृतफलानां रसं यावत् ।

अस्माकम् आपणेषु वस्तूनां बहुव्यापिविकल्पाः अपेक्षाकृतं नवीनपरिघटनाः सन्ति । दशकद्वयपूर्वम् अपि भवन्तः भारतस्य आपणेषु वस्तूनाम् एतादृशीं विविधतां द्रक्ष्यन्ति । **कतिपयैः वर्षैः एव अस्माकम् आपणे पूर्णतः परिवर्तनं जातम् अस्ति ।**

वयम् एतत् तीव्रपरिवर्तनं कथम् अवगन्तुं शक्नुमः केषां कारकाणां कारणात् एतानि परिवर्तनानि जायमानानि सन्ति अपि च एतैः परिवर्तनैः केन प्रकारेण जनानां जीवनं प्रभावितं जायमानम् अस्ति ? अस्मिन् अध्याये वयम् एतेषां प्रश्नानां विषये विचारं करिष्यामः ।

अन्तर्देशीयम् उत्पादनम्

विंशशताब्दस्य मध्यावधिं यावत् उत्पादनं मुख्यतः देशानां सीमानाम् अन्तः एव सीमितम् आसीत् । एतेषां देशानां सीमोल्लङ्घयितृवस्तुषु केवलम् असंशोधितवस्तूनि खाद्यपदार्थाः एवं च सिद्धोत्पादाः एव सम्मिलिताः आसन् । भारतसदृशोपनिवेशेभ्यः असंशोधितवस्तूनाम् एवं च खाद्यपदार्थानां निर्यातः क्रियते स्म तथा च सिद्धवस्तूनाम् आयातः क्रियते स्म । व्यापारः एव दूरस्थदेशानां परस्परं संयोजनस्य मुख्यमाध्यमम् आसीत् । एतद् **बहुराष्ट्रियसमवायानां** परिदृश्ये उदयात् प्राक्तनं युगम् आसीत् । यः एकाधिकदेशेषु उत्पादनस्य नियन्त्रणं करोति स्वामित्वं च धरति स बहुराष्ट्रियसमवायः इति कथ्यते । बहुराष्ट्रियसमवायाः तेषु प्रदेशेषु कार्यालयान् तथा च उद्योगार्थं शिल्पशालाः स्थापयन्ति यत्र तेषां कृते अल्पमूल्यश्रमस्य एवं च अन्यसंसाधनानाम् उपलब्धता भवितुं शक्नोति । उत्पादनविनियोगमूल्ये न्यूनतां कर्तुम् एवं च अधिकं लाभं स्वीकर्तुं बहुराष्ट्रियसमवायाः एवं कुर्वन्ति । निम्नोदाहरणे विचारं कुर्मः ।

कस्यचित् बहुराष्ट्रियसमवायस्य द्वारा उत्पादनस्य विस्तारः

औद्योगिकोपकरणानां निर्माता कश्चन विशालः बहुराष्ट्रियसमवायः संयुक्तराज्यामेरिकायाः अनुसन्धानकेन्द्रे स्वीयोत्पादानां प्रारूपं सज्जीकरोति । तस्य उपकरणानि चीनदेशे विनिर्मितानि भवन्ति । ततः परम् एतानि जलपोते संस्थाप्य मेक्सिकोम् अथ च पूर्वयूरोपं प्रति नीयन्ते । तत्र उपकरणानां संयोजनं क्रियते । सिद्धोत्पादस्य समस्तविश्वे विक्रयणं क्रियते । अत्रान्तरे समवायस्य ग्राहकसेवायाः भारतस्थितानां कॉलकेन्द्राणां माध्यमेन संचालनं क्रियते ।

एतत् अस्ति एकं ग्राहकसेवाकेन्द्रं बङ्गलोरुनगरस्थम् । एतत् केन्द्रं पर्याप्तैः दूरसंचारसौविध्यैःएवं च अन्तर्जालेन सुसज्जितम् अस्ति । एतत् विदेशिग्राहकेभ्यः सूचनाः साहाय्यं च उपलब्धं कारयति ।

अस्मिन् उदाहरणे बहुराष्ट्रियसमवायः केवलं वैश्विकस्तरे एव स्वीयोत्पादस्य विक्रयणं कुर्वन् अस्ति अपि तु एतद् अधिकमहत्त्वपूर्णम् अस्ति यत् **वस्तूनां सेवानां च उत्पादनं विश्वस्तरे** कुर्वन् अस्ति । परिणामतः **उत्पादनप्रक्रिया क्रमशः जटिलरीत्या संघटिता जाता अस्ति ।** उत्पादनप्रक्रिया लघुभागेषु विभाजिता अस्ति एवं च समस्तविश्वे प्रसृता अस्ति । उपरि दत्ते उदाहरणे चीनदेशः अल्पमूल्यविनिर्माणकेन्द्रम् अस्ति इत्यस्य लाभं प्रददाति । मेक्सिकोः एवं च पूर्वयूरोपः अमेरिका-यूरोपाणाम् आपणैः निजनिकटतायाः कारणात् लाभप्रदौ स्तः । भारते अत्यन्तकुशलाः अभियन्तारः उपलब्धाः सन्ति। ते उत्पादनस्य प्राविधिकपक्षान् अवगन्तुं शक्नुवन्ति । अत्र आङ्ग्लभाषिणः शिक्षितयुवानः अपि सन्ति । ते ग्राहकसंवीक्षासेवाः सुलभायितुं शक्नुवन्ति । एतैः सर्वैः वस्तुभिः बहुराष्ट्रियसमवायस्य मूल्यविनियोगस्य प्रायः प्रतिशतं ५०-६०मितं रक्षणं कर्तुं शक्यते । अतः वस्तुतः सीमानां पारे बहुराष्ट्रियोत्पादनप्रक्रियायाः प्रसारेण असीमितलाभः भवितुं शक्नोति ।

आगच्छन्तु, अस्मिन् विचारं कुर्याम --

वस्त्रोद्योगे उत्पादनप्रक्रिया केन प्रकारेण समस्तविश्वे प्रसृता अस्ति इति दर्शयितुं निम्नकथनस्य पूर्तिं कुर्वन्तु ।
कस्मिंश्चित् ब्राण्डलेबलमध्ये "मेड इन थाइलैण्ड" इति लिखितम् अस्ति परन्तु तस्मिन् एकः अपि थायीदेशीयः उत्पादः नास्ति । वयं विनिर्माण-प्रक्रियायाः विश्लेषणं कुर्मः एवं च प्रत्येकस्मिन् चरणे सर्वोत्तमनिर्माणं पश्यामः ।
वयम् एतद् विश्वस्तरे कुर्वन्तः स्मः । यथा वस्त्रनिर्माणे समवायः
कोरियातः कार्पासं स्वीकर्तुं शक्नोति .....

अशेषविश्वस्य उत्पादनस्य परस्परं संयोजनम्

सामान्यतः बहुराष्ट्रियसमवायाः तस्मिन् एव स्थाने उत्पादनघटकानां स्थापनां कुर्वन्ति यत् आपणस्य समीपे भवति, यत्र अल्पमूल्येन कुशलः अकुशलः च श्रमः उपलब्धः भवति अपि च उत्पादनस्य अन्यकारकाणाम् उपलब्धता सुनिश्चिता भवति । सममेव बहुराष्ट्रियसमवायाः शासनिकनीतीनाम् अपि अवधानं कुर्वन्ति याः तेषां हिताय चिन्तयन्ति । भवन्तः अस्मिन् अध्याये शासनिकनीतीनां विषये अस्माद् अपि अधिकम् अध्ययनं करिष्यन्ति ।

एतासां परिस्थितीनां सुनिश्चयानन्तरम् एव बहुराष्ट्रियसमवायाः उत्पादनार्थं कार्यालयानां शिल्पशालानां च स्थापनां कुर्वन्ति । परिसम्पत्तीनां यथा भूमिः भवनं यन्त्रम् अन्यानि उपकरणानि च क्रयणार्थं व्ययीकृता मुद्रा निवेशः इति कथ्यते । बहुराष्ट्रियसमवायानां द्वारा कृतः निवेशः विदेशिनिवेशः कथ्यते । कोऽपि निवेशः अनया आशया क्रियते यत् एताभिः परिसम्पत्तिभिः लाभः अर्जितः भविष्यति ।

यदा कदाचित् बहुराष्ट्रियसमवायाः एतेषां देशानां स्थानीयसमवायैः सह संयुक्तरूपेण उत्पादनं कुर्वन्ति ।संयुक्तोत्पादनेन स्थानीयसमवायः द्विगुणितं लाभं प्राप्नोति । प्रथमम्, बहुराष्ट्रियसमवायाः अतिरिक्तनिवेशार्थं धनं प्रदातुं शक्नुवन्ति यथा हि तीव्रोत्पादनार्थं यन्त्रोपकरणानि क्रेतुम् । द्वितीयम्, बहुराष्ट्रियसमवायाः उत्पादनस्य नवीनतमप्रौद्योगिकीम् आत्मना सह आनेतुं शक्नुवन्ति ।

परन्तु बहुराष्ट्रियसमवायानां निवेशस्य सर्वसामान्यमार्गः स्थानीयसमवायानां क्रयणम् अथ च तस्य अनन्तरम् उत्पादनस्य प्रसारणम् अस्ति । अपारसम्पद्युक्ताः बहुराष्ट्रियसमवायाः एतत् सरलतया कर्तुं शक्नुवन्ति । उदाहरणार्थम् अमेरिकादेशीयेन कारगिलफूड्सनामकेन बहुराष्ट्रियसमवायेन परखफूड्ससदृशाः लघुसमवायाः क्रीताः सन्ति । परखफूड्ससमवायेन भारतस्य विभिन्नभागेषु किञ्चन विशालं विपणनतन्त्रं सज्जीकृतम् आसीत् यत्र तस्य ब्राण्डाः सुप्रसिद्धाः आसन् । परखफूड्ससमवायस्य चत्वारि तैलशोधक-केन्द्राणि अपि आसन् । तेषाम् उपरि अधुना कारगिलसमवायस्य नियन्त्रणं जातम् अस्ति । अधुना कारगिलसमवायः प्रतिदिनं 50लक्षपैकेटपरिमाणस्य निर्माणक्षमतया सह भारते खाद्यतैलानां बृहत्तमः उत्पादकसमवायः अस्ति ।

वस्तुतः अनेकेषां शीर्षस्थबहुराष्ट्रियसमवायानां सम्पत्तिः विकासशीलदेशानां सर्वकाराणां ससस्तार्थिक-आयव्ययपत्रात् अपि अधिका अस्ति । एतादृशानाम् अपारसम्पत्तियुक्तानां बहुराष्ट्रियसमवायानां शक्तिविषये प्रभावविषये च विचारः करणीयः ।

बहुराष्ट्रियसमवायाः केनचित् अन्येन विधिना उत्पादनस्य नियन्त्रणं कुर्वन्ति । विकसितदेशानां विशालबहुराष्ट्रियसमवायाः लघुभ्यः उत्पादकेभ्य उत्पादनस्यआदेशंददति।वस्त्रंपादत्राणंतथाचक्रीडासामग्री इति एतानि एतादृशाः उद्योगाः सन्ति यत्र समस्तविश्वे प्रचुरमात्रायां लघुभिः उत्पादकैः उत्पादनं क्रियते । बहुराष्ट्रियसमवायेभ्यः एतेषाम् उत्पादानाम् आपूर्तिः क्रियते । ततः परम् एतेषाम् उत्पादानां स्वीयब्राण्डनाम्ना

विकासशीलदेशेषु उत्पादितजीन्सवस्त्रम् अमेरिकादेशे 6500रूप्यकैः विक्रीयते ।

ग्राहकेभ्यः विक्रयणं कुर्वन्ति । एतेषु विशालसमवायेषु दूरस्थोत्पादकानां मूल्यानि, गुणवत्ता, आपूर्तिः एवं च श्रमोपबन्धानां निर्धारणस्य प्रचण्डक्षमता भवति ।

अनेन प्रकारेण वयं पश्यामः यत् बहुराष्ट्रियसमवायाः अनेकप्रकारेण स्वीयोत्पादनकार्यस्य प्रसारं कुर्वन्तः सन्ति एवं च विश्वस्य अनेकदेशानां स्थानीयसमवायैः सह पारस्परिकसम्बन्धान् स्थापयन्तः सन्ति । स्थानीयसमवायैः सह सहभागिताद्वारा, आपूर्त्यर्थं स्थानीयसमवायानां प्रयोगं कृत्वा तथा च स्थानीयसमवायैः सह निकटप्रतिस्पर्धां कृत्वा अथवा तान् क्रीत्वा बहुराष्ट्रियसमवायाः दूरस्थस्थानानाम् उत्पादनेषु स्वीयप्रभावं कुर्वन्तः सन्ति । परिणामतः **सुदूरस्थानेषु प्रसृतम् उत्पादनं परस्परं सम्बन्धितं जायमानम् अस्ति** ।

आगच्छन्तु एतेषां विषये विचारं कुर्याम ----

कश्चन अमेरिकादेशीयः फोर्डमोटर्सनामकः समवायः विश्वस्य 26देशेषु प्रसारेण सह विश्वस्य बृहत्तमः मोटरयाननिर्माता समवायः अस्ति । फोर्डमोटर्ससमवायः 1995तमे वर्षे भारतम् आगतवान् एवं च अनेन समवायेन चेन्नैनगरस्य निकटे 1700 कोटिरूप्यकाणां निवेशं कृत्वा एकं विशालसंयन्त्रं स्थापितम् । एतत् संयन्त्रं भारते भारते महिन्द्रा एण्ड महिन्द्रा इति अस्य समवायस्य सहयोगेन स्थापितम् आसीत् । 2014 तमवर्षं यावत् फोर्डमोटर्ससमवायः भारतीयापणेषु 77,000 कारयानानां विक्रयणं कुर्वन् आसीत् अपरञ्च 77000 कारयानानां निर्यातः अपि भारतात् दक्षिणाफ्रिका मेक्सिको एवं च ब्राजीलदेशभ्यः कृतः । समवायः विश्वस्य अन्येषु देशेषु स्वीयसंयन्त्राणां कृते फोर्ड इण्डिया इति अस्य समवायस्य विकासं पुर्जापूर्तिकेन्द्रस्य रूपेण कर्तुम् इच्छति।

वामतः दत्तम् अनुच्छेदं पठन्तु प्रश्नानां च उत्तराणि ददतु---

1. किं भवन्तः स्वीकुर्वन्ति यत् फोर्डमोटर्ससमवायः कश्चन बहुराष्ट्रियसमवायः अस्ति ? किमर्थम् ?
2. विदेशिनिवेशः कः भवति ? फोर्डमोटर्ससमवायेन भारते कियान् निवेशः कृतः आसीत् ?
3. भारते उत्पादनसंयन्त्राणां स्थापनां कृत्वा फोर्डमोटर्ससदृशाः बहुराष्ट्रियसमवायाः केवलं भारतसदृशदेशानां विशालापणानाम् एव लाभं न प्राप्नुवन्ति अपितु अल्पोत्पादन-विनियोगस्य अपि लाभं प्राप्नुवन्ति । कथनस्य व्याख्यां कुर्वन्तु ।
4. भवतां मतेन समवायाः स्वीयवैश्विकव्यापाराय कारयानस्य पुर्जाणां विनिर्माणकेन्द्रस्य रूपेण भारतस्य विकासं किमर्थं कर्तुम् इच्छन्ति ? निम्नकारकाणां विषये विचारं कुर्वन्तु----

(अ) भारते श्रमे अन्येषुसंसाधनेषु च विनियोगः (ब) अनेकस्थानीयविनिर्मातृणाम् उपस्थितिः, ये फोर्डमोटर्ससमवायाय कलपुर्जानाम् आपूर्तिं कुर्वन्ति । (स) अधिकसंख्यायां भारतस्य चीनस्य च ग्राहकैः सह निकटता ।

5. भारते फोर्डमोटर्सद्वारा कारयानानां निर्माणेन उत्पादनं केन प्रकारेण परस्परं सम्बन्धितं भविष्यति ?
6. बहुराष्ट्रियसमवायाः अन्येभ्यः समवायेभ्यः केन प्रकारेण पृथक् सन्ति ?
7. प्रायः सर्वे: बहुराष्ट्रियसमवायाः अमेरिका-जापान-यूरोपदेशानां सन्ति यथा नोकिया,कोकाकोला, पेप्सी, होण्डा, नाइक इत्यादयः। किं भवन्तः अनुमानं कर्तुं शक्नुवन्ति यत् एवं कथम् अस्ति ?

विदेशिव्यापारः एवं च विपणिनां एकीकरणम्

दीर्घकालात् विदेशिव्यापारः विभिन्नदेशानाम् एकीकरणस्य मुख्यमाध्यमम् अवर्तत । इतिहासे भवद्भिः तेषां व्यापारमार्गाणां तथा च तेषां मार्गाणां द्वारा क्रियमाणस्य गहनव्यापारस्य विषये पठितं स्यात् ये भारत-दक्षिणैशियायाः पूर्व-पश्चिमापणैः सह एकीकरणं कुर्वन्ति । एतद् अपि भवतां स्मरणं स्यात् यत् व्यापारिकहितानां कारणेन एव ईस्ट इण्डियासदृशः व्यापारिकसमवायः भारतं प्रति आकृष्टः अभवत् ।

अन्ततः विदेशिव्यापारस्य आधारभूतकार्यं किम् अस्ति ?

सरलशब्देषु कथ्येत चेत् विदेशिव्यापारः गृहविपणिभ्यः अर्थात् निजदेशस्य विपणिभ्यः बहिस्तनविपणिषु प्रापयितुम् उत्पादकेभ्यः अवसरं प्रददाति । उत्पादकाः केवलं निजदेशस्य विपणिषु एव स्वीयान् उत्पादान् विक्रेतुं न शक्नुवन्ति अपितु विश्वस्य अन्येषां देशानां विपणिषु अपि प्रतिस्पर्धां कर्तुं शक्नुवन्ति। अनेन अन्येषु देशेषु उत्पादितवस्तूनाम् आयातेन क्रेतृणां समक्षं तेषां वस्तूना गृहोत्पादनस्य अन्येषां विकल्पानां विस्तारः भवति ।

अधुना वयं भारतस्य आपणेषु चीनदेशीयानां क्रीडनकानां प्रभावस्य उदाहरणद्वारा विदेशिव्यापारस्य प्रभावस्य अध्ययनं कुर्मः ।

भारते चीनदेशस्य क्रीडनकानि----

चीनदेशस्य विनिर्मातारः भारते क्रीडनकानां निर्याताय कञ्चन अवसरं लभन्ते यत्र क्रीडनकानां विक्रयणम् अधिकमूल्ये क्रियमाणम् अस्ति । ते भारताय क्रीडनकानां निर्यातं कर्तुम् आरभन्ते । अधुना भारते क्रेतृणां पार्श्वे चीनदेशस्य अथ भारतदेशस्य क्रीडनकानां मध्ये चयनस्य विकल्पः उपलब्धः अस्ति । अल्पः मूल्यः भवति अथ च आकृतयः शोभनाः भवन्ति इति अस्मात् कारणात् चीनदेशस्य क्रीडनकानि भारतीयविपणिषु अधिकलोकप्रियाणि सन्ति । एकेन वर्षेण एव क्रीडनकानां प्रतिशतं 70-80मितेषु आपणेषु भारतीयक्रीडनकानां स्थानं चीनदेशस्य क्रीडनकैः स्वीकृतम् अस्ति ।

अधुना भारतस्य आपणेषु क्रीडनकानां मूल्यं पूर्वापेक्षया अल्पम् अस्ति ।

अत्र किं जायमानम् अस्ति ? व्यापारस्य कारणात् चीनदेशस्य क्रीडनकानि भारतीयविपणिषु आगतानि। भारतीयक्रीडनकानां तथा च चीनदेशस्य क्रीडनकानां मध्ये प्रतिस्पर्धायां चीनदेशस्य क्रीडनकानि समीचीनतराणि सिद्धानि अभवन् । भारतीयक्रेतृणां समक्षम् अल्पमूल्ये क्रीडनकानाम् अपेक्षाकृतम् अधिकाः विकल्पाः सन्ति । अनेन चीनदेशस्य क्रीडनकनिर्मातारः स्वीयव्यवसायस्य प्रसाराय कञ्चन अवसरं लभन्ते एतद्विपरीतं भारतीयक्रीडनकनिर्मातारः हानिं लभन्ते । यतो हि तेषां क्रीडनकानां विक्रयणं न्यूनं भवति ।

सामान्यतः व्यापारस्य उद्घटनात् वस्तूनां कस्माच्चित् विपणेः अपरस्मिन् विपणौ प्रेषणं स्वीकरणं च भवति। विपणौ वस्तूनां विकल्पाः वर्धिताः भवन्ति । द्वयोः विपण्योः एकस्य एव वस्तुनः मूल्यं समानं जायते । अधुना द्वयोः देशयोः उत्पादकाः अन्योन्यस्मात् सहस्रयोजनमिते अन्तराले तिष्ठन्तः अपि परस्परं प्रतिस्पर्धां कर्तुं शक्नुवन्ति । **अनेन प्रकारेण विदेशिव्यापारः विभिन्नदेशानां विपणीन् संयोजयितुम् अथवा एकीकर्तुं सहायकं भवति।**

निर्मितवस्त्राणां लघुव्यापारिणः बहुराष्ट्रियसमवायानां ब्राण्डैः आयातैः च सह प्रतिस्पर्धां कुर्वन्तः।

आगच्छन्तु एतेषु विचारं कुर्याम --

१. अतीते काले देशानां संयोजकं मुख्यं माध्यमं किम् आसीत् ? अधुना एतत् भिन्नं कथम् अस्ति ? २. विदेशव्यापारः एवं च विदेशिनिवेशः इति अनयोः मध्ये भेदं स्पष्टीकुर्वन्तु।

३. सद्यस्तनेषु वर्षेषु चीनदेशः भारतात् इस्पातस्य आयातं कुर्वन् अस्ति। व्यवस्थां कुर्वन्तु यत् चीनद्वारा इस्पातस्य आयातः कथं प्रभावितं करिष्यति --

(क) चीनस्य इस्पातसमवायान्

(ख) भारतस्य इस्पातसमवायान्

(ग) चीने अन्येषाम् औद्योगिकवस्तूनाम् उत्पादनाय इस्पातस्य क्रेतृदेशान्

४. चीनस्य आपणेषु भारतात् इस्पातस्य आयातः केन प्रकारेण उभयोः देशयोः इस्पातविपणेः एकीकरणे सहायतां करिष्यति ? व्याख्यां कुर्वन्तु।

वैश्वीकरणं किम् अस्ति ?

आ विगतदशकत्रयात् अधिकतराः बहुराष्ट्रियसमवायाः विश्वे तेषां स्थानानाम् अन्वेषणं कुर्वन्तः सन्ति यानि तेषाम् उत्पादनाय अल्पमूल्यानि भवेयुः । एतेषु देशेषु बहुराष्ट्रियसमवायानां निवेशे वृद्धिः जायमाना अस्ति । सममेव विभिन्नदेशानां मध्ये विदेशिव्यापारः अपि तीव्रगत्या वर्धमानः अस्ति । विदेशव्यापारस्य विशालभागः बहुराष्ट्रियसमवायानां द्वारा नियन्त्रितः अस्ति। यथा भारते फोर्डमोटर्स् इत्यस्य कारयानसंयन्त्रं केवलं भारतस्य कृते एव कारयानानां निर्माणं न करोति अपि तु अन्येषां विकासशीलदेशानां कृते अपि कारयानानाम् एवं च समस्तविश्वे स्वीयशिल्पशालानां कृते उपयन्त्राणाम् अपि निर्यातं करोति। अनेन एव प्रकारेण अधिकतराणां बहुराष्ट्रियसमवायानां क्रियाविधिषु वस्तूनां सेवानां च विशालपरिमाणेन व्यापारःसम्मिलितः अस्ति।

अधिकविदेशिव्यापारस्य अथ च अधिकविदेशिनिवेशस्य परिणामतः विभिन्नदेशानां विपणीनाम् उत्पादानां च मध्ये एकीकरणं जायमानम् अस्ति । विभिन्नदेशानां मध्ये परस्परसम्बन्धानां तीव्रैकीकरणस्य च प्रक्रिया एव वैश्वीकरणम् अस्ति । बहुराष्ट्रियसमवायाः वैश्वीकरणस्य प्रक्रियायां मुख्यभूमिकायाः निर्वहणं कुर्वन्तः सन्ति। विभिन्नदेशानां मध्ये अधिकाधिकं वस्तूनां सेवानां निवेशस्य एवं च प्रौद्योगिक्याः आदानं प्रदानं जायमानम् अस्ति । विगतानां केषाञ्चन दशकानां तुलनायां विश्वस्य अधिकांशभागाः परस्परम् अपेक्षाकृतम् अधिकं सम्पर्के आगताः सन्ति ।

वस्तूनां सेवानां निवेशानां तथा च प्रौद्योगिकीनाम् अतिरिक्तं विभिन्नदेशाः परस्परं सम्बद्धाः भवेयुः इति एतदर्थम् अन्यः कश्चन माध्यमः भवितुं शक्नोति । अयं माध्यमः अस्ति विभिन्नदेशानां मध्ये जनानाम् आगमनं गमनं च इति । प्रायः जनाः उत्तमायस्य उत्तमवृत्तेः एवं च उत्तमशिक्षायाः अन्वेषणे एकस्मात् देशात् अपरं देशं गच्छन्ति । किन्तु विगतेषु केषुचित् दशकेषु अनेकेषां प्रतिबन्धानां कारणात् विभिन्नदेशानां मध्ये जनानां गमने आगमने च अधिका वृद्धिः न अभवत् ।

आगच्छन्तु एतेषां विषये विचारं कुर्याम

2. ते विभिन्नाः विधयः के सन्ति येषां द्वारा देशाः परस्परं सम्बद्धाः कर्तुं शक्यन्ते ?
3. साधुविकल्पस्य चयनं कुर्वन्तु---
   देशानां मध्ये सम्बद्धता भवति चेत् परिणामाः के भविष्यन्ति ?
   (क) उत्पादकानां मध्ये न्यूनप्रतिस्पर्धा भविष्यति
   (ख) उत्पादकानां मध्ये अधिकप्रतिस्पर्धा भविष्यति
   (ग) उत्पादकानां मध्ये प्रतिस्पर्धायां परिवर्तनं न भविष्यति

अस्माभिः परिवहने महती उन्नतिः दृष्टा अस्ति ।

तानि कारकाणि यैः वैश्वीकरणं सम्भवति

प्रौद्योगिक्यां तीव्रोन्नतिः तत् कारकम् अस्ति येन वैश्वीकरणस्य प्रक्रिया उत्प्रेरिता । यथा विगतेषु 50वर्षेषु परिवहनप्रौद्योगिक्यां तीव्रोन्नतिः जाता अस्ति । अनेन सुदूरं यावत् वस्तूनां तीव्रतरा आपूर्तिः अल्पमूल्ये समभवत् ।

वस्तूनां परविहनाय कण्टेनरः

वस्तूनि कण्टेनरे स्थापितानि सन्ति येन एतानि जलयानेषु रेलयानेषु वायुयानेषु एवं च ट्रकयानेषु विना क्षतिं स्थापयितुं शक्येत । कण्टेनरैः वहनविनियोगमूल्ये बहुलाभः अभवत् अपि च वस्तूनि तीव्रगत्या आपणेषु प्रापयितुं शक्यन्ते । अनेन एव प्रकारेण वायुयातायातस्य विनियोगमूल्ये न्यूनता आगता अस्ति। परिणामतः वायुमार्गेण अपेक्षाकृतम् अधिकमात्रायां वस्तूनां परिवहनं समभवत् ।

अस्माद् अपि अधिकम् उल्लेखनीयम् अस्ति यत्सूचना-संचारप्रौद्योगिक्याः विकासः।वर्तमानसमये दूरसंचारस्य संगणकस्य एवं च अन्तर्जालस्य क्षेत्रे प्रौद्योगिकी द्रुतगत्या परिवर्तमाना अस्ति । दूरसंचारसौविध्यानां प्रयोगः (टेलीग्राफ,दूरभाषः, चलभाषः एवं च फैक्स् इति एतेषाम्) समस्तविश्वे परस्परं सम्पर्काय सूचनानां तत्कालं प्रेषणाय एवं च दूरवर्तिक्षेत्रेभ्यः संवादाय क्रियते। एतानि सौविध्यानि संचारोपग्रहाणां द्वारा सुगमीकृतानि सन्ति। यथा हि विदितम् अस्ति भवतां यत् जीवनस्य प्रायः सर्वस्मिन् क्षेत्रे संगणकानां प्रवेशः जातः अस्ति । भवद्भिः अन्तर्जालस्य चामत्कारिकसंसारे अपि प्रवेशः कृतः स्यात्। यत्र यत्किमपि भवन्तः ज्ञातुम् इच्छन्ति प्रायः तस्य सर्वस्य सूचनां प्राप्तुं शक्नुवन्ति अपि च सूचनानां परस्परं वितरणं कर्तुं शक्नुवन्ति । अन्तर्जालेन वयं तत्कालम् ईमेलं प्रेषयितुं शक्नुमः अपि च अत्यन्तमूल्येन समस्तविश्वे सम्भाषणं कर्तुं शक्नुमः।

सूचना-संचारप्रौद्योगिक्या विभिन्नदेशानां मध्ये सेवानाम् उत्पादनस्य प्रसारे मुख्यभूमिका निर्व्यूढा अस्ति । आगच्छन्तु पश्येम कथम् ....

इयं पत्रिका बहु शोभना प्रतीयते । परन्तु मम पाठ्यपुस्तकस्य मुद्रणम् एतादृशं किमर्थं नास्ति ? अहं स्वपुस्तके बहुकठिनतया शब्दान् पठितुं शक्नोमि
मम बाल ! एवं नास्ति । एतत् मुद्रणयन्त्रं सामान्यभारतीयानां कृते नास्ति।

वैश्वीकरणे संचारप्रौद्योगिक्याः उपयोगः

लन्दनस्य पाठकानां कृते प्रकाशितायाः कस्याश्चित् पत्रिकायाः आकृतिः मुद्रणं च दिल्ल्यां करिष्यते । पत्रिकायाः पाठ्यविषयः अन्तर्जालद्वारा दिल्लीकार्यालयं प्रति प्रेष्यते । दिल्लीकार्यालये आकृतिकारः दूरसंचार-सौविध्यानाम् उपयोगं कृत्वा लन्दनकार्यालयात् पत्रिकायाः आकृतिविषये निर्देशं प्राप्नुवन्ति । आकृतेः कार्यं संगणके क्रियते । मुद्रणस्य पश्चात् पत्रिकाः वायुमार्गेण लन्दनं प्रति प्रेष्यन्ते । एतावता आकृतेः मुद्रणस्य च यः व्ययः भवति तस्य व्ययस्य निस्तारणम् अन्तर्जालद्वारा

आगच्छन्तु एतेषां वषिये वचिारं कुर्याम

1. उपरि दत्ते उदाहरणे तेषां शब्दानाम् रेखाङ्कनं कुर्वन्तु यैः शब्दैः उत्पादने प्रौद्योगिक्याः प्रयोगः उल्लिखितः अस्ति।

2. सूचनाप्रौद्योगिकी वैश्वीकरणेन केन प्रकारेण सम्बद्धा अस्ति ? किं सूचनाप्रौद्योगिक्याः प्रसारं विना वैश्वीकरणं सम्भविष्यति ?

विदेशिव्यापारः एवं च विदेशिनिवेशस्य उदारीकरणम्

वयं पुनः एकवारं चीनदेशस्य क्रीडनकानाम् आयातेन सम्बद्धम् उदाहरणं प्रति गच्छामः । चिन्तयन्तु यत् भारतशासनं क्रीडनकानाम् आयाते करं निर्धारयति । तदा किं भविष्यति ? अस्य अर्थः अस्ति यत् ये एषां क्रीडनकानाम् आयातं कर्तुम् इच्छन्ति तैः करं दातव्यं भविष्यति । करस्य कारणात् क्रेतृभिः आयातितक्रीडनकानाम् अधिकं मूल्यं दातव्यं भविष्यति । चीनदेशस्य क्रीडनकानाम् अधुना भारतस्य आपणेषु तावत् अल्पमूल्यं न भविष्यति एवं च चीनदेशात् तेषाम् आयातः स्वतः न्यूनः भविष्यति । भारतस्य क्रीडनकनिर्मातारः अधिकं समृद्धाः भविष्यन्ति ।

आयाते करं **व्यापारावरोधकस्य** किञ्चन उदाहरणम् अस्ति । अवरोधकम् अस्मात् कारणात् अस्ति यतो हि अनेन केचन प्रतिबन्धाः भवन्ति । विदेशिव्यापारे वृद्धेः अथवा न्यूनतायाः नियमनं कर्तुम् एवं च देशे कीदृशानां वस्तूनाम् आयातः भवेत् इति एतं निर्णयं कर्तुं शासनानि व्यापारावरोधकानां प्रयोगं कर्तुं शक्नुवन्ति ।

स्वतन्त्रतायाः अनन्तरं भारतशासनेन विदेशिव्यापारः एवं च विदेशिनिवेशः प्रतिबन्धितः अस्ति । देशस्य उत्पादकेभ्यः विदेशिप्रतिस्पर्धायाः संरक्षणं प्रदातुम् एतत् अनिवार्यं मतम् अस्ति । 1950-1960 दशकयोः उद्योगानाम् उदयः जायमानः आसीत् एवम् अस्याम् अवस्थायाम् आयातेन सह प्रतिस्पर्धा एतेषाम् उद्योगानां वृद्धौ अवरोधिका भवति । अतः एव भारतेन केवलं यन्त्रोपकरणम् उर्वरकं शिलातैलम् इति एतेषाम् अनिवार्यवस्तूनाम् आयातस्य एव अनुमतिः दत्ता अस्ति । अवधानं कुर्वन्तु यत् सर्वैः विकसितदेशैः विकासस्य प्रारम्भिकचरणेषु गृहोत्पादकेभ्यः विभिन्नविधिभिः संरक्षणं दत्तम् अस्ति ।

भारते प्रायः 1991 तमवर्षस्य प्रारम्भात् नीतिषु केचन दूरगामिपरिवर्तनानि कृतानि । शासनेन अयं निर्णयः कृतः यत् भारतीयोत्पादकानां कृते विश्वस्य उत्पादकैः सह प्रतिस्पर्धां कर्तुम् अवसरः आगतः अस्ति। एतद् अनुभूतं यत् प्रतिस्पर्धया देशे उत्पादकानां प्रदर्शने परिष्कारः भविष्यति इति । यतो हि तैः स्वीयगुणवत्तायां परिष्कारः करणीयः भविष्यति । अस्य निर्णयस्य प्रभावशालिभिः अन्ताराष्ट्रियसंघटनैः समर्थनं कृतम् ।

अतः विदेशिव्यापारात् एवं च विदेशिनिवेशात् अवरोधकाः अपसारिताः । अस्य अर्थः अस्ति यत् वस्तूनाम् आयातः निर्यातः च सुगमतया कर्तुं शक्यते स्म एवं च विदेशिसमवायाः अत्र स्वीयकार्यालानां शिल्पशालानां च स्थापनां कर्तुं शक्नुवन्ति स्म ।

शासनद्वारा अवरोधानाम् अथवा प्रतिबन्धानाम् अपसारणस्य प्रक्रिया उदारीकरणस्य नाम्ना ज्ञायते । व्यापारस्य उदारीकरणेन व्यावसायिनः मुक्तरूपेण निर्णयं स्वीकर्तुम् अनुमतिं प्राप्तवन्तः सन्ति यत् ते कस्य आयातं निर्यातं वा कर्तुम् इच्छन्ति । शासनं पूर्वापेक्षया न्यूनं नियन्त्रणं करोति अस्मात् कारणात् एव तद् अधिकम् उदारं कथ्यते।

आगच्छन्तु एतेषां विषये विचारं कुर्याम ----

1. विदेशिव्यापारस्य उदारीकरणेन भवन्तः किम् अवगच्छन्ति ?
2. आयाते करं किञ्चन व्यापारावरोधकम् अस्ति । शासनेन आयातयोग्यवस्तूनां संख्या अपि सीमिता कर्तुं शक्यते। एतत् कोटा इति कथ्यते। किं भवन्तः चीनदेशीय-क्रीडनकानाम् उदाहरणेन व्याख्यां कर्तुं शक्नुवन्ति यत् व्यापारावरोधकस्य रूपेण कोटायाः प्रयोगः कथं कर्तुं शक्यते? भवतां मतेन किम् अस्य प्रयोगः करणीयः? चर्चां कुर्वन्तु ।

विश्वव्यापारसंघटनम्

अस्माभिः दृष्टं यत् कैश्चित् बहुप्रभावशालिभिः अन्ताराष्ट्रियसंघटनैः भारते विदेशिव्यापारस्य विदेशिनिवेशस्य च समर्थनं कृतम्। एतेषां संघटनानां मतम् अस्ति यत् विदेशिव्यापारे विदेशिनिवेशे च सर्वे अवरोधकाः हानिकारकाः सन्ति। कोऽपि अवरोधकः न भवेत्। देशानां मध्ये मुक्तव्यापारः भवेत्। विश्वस्य सर्वैः देशैः स्वीयाः नीतयः उदारीकर्तव्याः।

विश्वव्यापारसंघटनं (WTO) किञ्चन तादृशं संघटनम् अस्ति यस्य उद्देश्यम् अन्ताराष्ट्रियव्यापारस्य उदारीकरणम् इति अस्ति। विकसितदेशानां प्रसङ्गे आरब्धं विश्वव्यापारसंघटनम् अन्ताराष्ट्रियव्यापारेण सम्बद्धानां नियमानां निर्धारणं करोति। एतत् संघटनं पश्यति यत् एतेषां नियमानां पालनं भवेत् इति। वर्तमानसमये विश्वस्य प्रायः 160 देशाः विश्वव्यापारसंघटनस्य (जून2014) सदस्याः सन्ति।

यद्यपि विश्वव्यापारसंघटनं सर्वेभ्यः देशेभ्यः मुक्तव्यापारस्य सौविध्यं प्रददाति परन्तु व्यवहारे एतद् दृष्टम् अस्ति यत् विकसितदेशैः अनुचितरीत्या व्यापारावरोधकाः अङ्गीक्रियमाणाः सन्ति। अपरतः विश्वव्यापारसंघटनस्य नियमैः विकासशीलदेशाः व्यापारावरोधान् अपसारयितुं विवशीकृताः सन्ति। अस्य एकम् उदाहरणं कृष्युत्पादानां व्यापारे वर्तमानविवादत्वेन अस्ति।

व्यापारव्यवहारेषु वाद-विवादः

द्वितीये अध्याये भवद्भिः दृष्टं यत् भारते अधिकांशतः आजीविकायाः एवं च सकलगृहोत्पादस्य महत्त्वपूर्णभागं कृषिक्षेत्रं प्रददाति। अस्य तुलनायां अमेरिकासदृशानां विकसितदेशानां सकलगृहोत्पादे कृषेः अंशः मात्रं प्रतिशतम् एकमितः अस्ति एवं च समस्ताजीविकायां केवलं प्रतिशतं 0.5 मितः अस्ति। तथापि अमेरिकायाः कृषिक्षेत्रे कार्यरताः एतावन्तः प्रतिशतं न्यूनाः जनाः अपि अमेरिकादेशस्य शासनात् उत्पादनाय एवं च अन्येभ्यः देशेभ्यः निर्यातं कर्तुं बह्वधिकं धनराशिं प्राप्नुवन्ति। अस्य प्रचुरधनराशेः कारणात् अमेरिकादेशीयकृषकाः स्वीयकृष्युत्पादान् असाधारणरूपेण अल्पमूल्येन विक्रेतुं शक्नुवन्ति। अधिशेषकृष्युत्पादाः अन्येषां देशानाम् आपणेषु अल्पमूल्ये विक्रीयन्ते। अनेन एतेषां देशानां कृषकाः दुष्प्रभाविताः भवन्ति।

एतद् एव कारणम् अस्ति यत् विकासशीलदेशाः विकसितदेशानां शासनानि पृच्छन्तः सन्ति यत् अस्माभिः विश्वव्यापारसंघटनस्य नियमानाम् अनुसारं व्यापारावरोधकाः न्यूनीकृताः सन्ति परन्तु युष्माभिः विश्वव्यापारसंघटनस्य नियमाः उपेक्षिताः सन्ति एवं च निजकृषकेभ्यः प्रभूतधनराशिः निरन्तरतया दीयमानः अस्ति। युष्माभिः अस्माकं शासनानि उक्तानि यत् तैः निजकृषकाणां साहाय्यं न करणीयं परन्तु भवन्तः स्वयम् एतद् एव कार्यं कुर्वन्तः सन्ति। **किम् अयं मुक्तः एवं च न्यायसंगतः व्यापारः अस्ति?**

संयुक्तराज्यामेरिकादेशे एकम् आदर्शकार्पासक्षेत्रम् यस्मिन् सहस्रैकरमिता भूमिः अस्ति एवं च यस्य स्वामित्वं विशालनिगमसमवायस्य पार्श्वे अस्ति।

आगच्छन्तु एतेषां विषये विचारं कुर्याम ----

1. रिक्तस्थानानां पूर्तिं कुर्वन्तु ----
   विश्वव्यापारसंघटनं ..... देशानां प्रसङ्गे प्रारब्धम्। विश्वव्यापारसंघटनस्य उद्देश्यं ..... अस्ति। विश्वव्यापारसंघटनं सर्वेषां देशानां कृते ..... सम्बद्धान् नियमान् रचयति एवं च पश्यति यत् ..... व्यवहारे देशानां मध्ये व्यापारः ..... नास्ति । भारतसदृशः विकासशीलदेशः ..... अस्ति अपरञ्च अधिकांशस्थितिषु विकसितदेशाः स्वीयोत्पादकेभ्यः निरन्तरतया संरक्षणं दीयमानम् अस्ति।
2. भवतां मतेन विभिन्नदेशानां मध्ये अधिकाधिकं न्यायसंगतः व्यापारः भवेत् इति एतदर्थं किं कर्तुं शक्यते ?
3. उपर्युक्ते उदाहरणे अस्माभिः दृष्टं यत् अमेरिकादेशस्य सर्वकारः कृषकेभ्यः उत्पादनाय प्रचुरं धनराशिं प्रददाति । यदा कदाचित् सर्वकारः पर्यावरणानुकूलानां केषाञ्चन विशेषवस्तूनाम् उत्पादनवर्धनाय साहाय्यं ददाति । एतत् न्यायसंगतम् अस्ति न वा इति अस्मिन् विषये चर्चां कुर्वन्तु।

भारते वैश्वीकरणस्य प्रभावः

विगतेषु 20 वर्षेषु भारतीयार्थव्यवस्थायाः वैश्वीकरणस्य काचित् सुदीर्घयात्रा अस्ति । अस्य जनानां जीवने कः प्रभावः लक्षितः अस्ति ? वयं कानिचन प्रमाणानि पश्यामः।

वैश्वीकरणेन एवं च उभयोः स्थानीय-वैदेशिकोपभोक्त्रोः मध्ये बृहत्तरप्रतिस्पर्धया उपभोक्तृभ्यः विशेषेण नगरीयक्षेत्रेषु धनिवर्गस्य उपभोक्तृभ्यः लाभः जातः अस्ति । एतेषाम् उपभोक्तृणां समक्षं पूर्वापेक्षया अधिकाः विकल्पाः सन्ति एवं च अधुना ते अनेकोत्पादानाम् उत्कृष्टगुणवत्तया एवं च अल्पमूल्येन लाभान्विताः जायमानाः सन्ति। परिणामतः एते जनाः पूर्वापेक्षया अद्य अपेक्षाकृतम् उच्चतरजीवनस्तरस्य आनन्दं स्वीकुर्वन्तः सन्ति।

उत्पादकाः श्रमिकाः च वैश्वीकरणेन समानरूपेण प्रभाविताः न अभवन्।

प्रथमं विगतेषु 20वर्षेषु बहुराष्ट्रियसमवायैः भारते निजनिवेशे वृद्धिः कृता अस्ति यस्य अर्थः अस्ति भारते निवेशः तेषां कृते लाभाय सिद्धः। बहुराष्ट्रियसमवायैः नगरीयक्षेत्राणां सेलफोन मोटरयानं वैद्युतोत्पादाः शीतपेयपदार्थाः एवं च जङ्कखाद्यपदार्थाः इति एतादृशानाम् उद्योगानाम् एवं च बैङ्किङ्गसेवानां निवेशे रुचिः प्रदर्शिता । एतेषाम् उत्पादानाम् अधिकतरक्रेतारः सम्पन्नवर्गेण सम्बद्धाः जनाः सन्ति। एतेषु उद्योगेषु सेवासु च नूतनाः आजीविकाः उत्पन्नाः सन्ति । सममेव ते समवायाः समृद्धाः जाताः सन्ति ये एतेभ्यः उद्योगेभ्यः असंशोधितसामग्र्याः आपूर्तिं कुर्वन्ति।

अन्ततः वैश्विकजीवनशैली, यस्य भवता सदैव स्वप्नः दृष्टः अस्ति।

विदेशिनिवेशस्य आकर्षणाय उत्थापिताः पदक्षेपाः

सद्यस्तनेषु वर्षेषु भारतस्य राज्यशासनानि केन्द्रशासनानि च भारते निवेशार्थं विदेशिसमवायान् आकर्ष्टुं विशेषं प्रयासं कुर्वन्ति सन्ति । औद्योगिकक्षेत्राणि यानि विशेषार्थिक-क्षेत्रम् इति कथ्यन्ते तेषां स्थापना क्रियमाणा अस्ति । विशेषार्थिककक्षेत्रेषु विश्वस्तरीयसौविध्यानि यथा विद्युत्, जलं, मार्गः, परिवहनं, भण्डारणं, मनोरञ्जनं तथा च शैक्षिकसौविध्यानि उपलब्धानि भवेयुः । विशेषार्थिकक्षेत्रेषु तैः समवायैः आरम्भस्य पञ्चवर्षाणि यावत् करं न दातव्यं भवति यैः उत्पादनघटकानां स्थापना क्रियते ।

विदेशिनिवेशस्य आकर्षितः भवेत् इति एतदर्थं शासनेन श्रमविधिषु नमनीयताम् आनेतुम् अनुमतिः दत्ता अस्ति । भवद्भिः द्वितीये अध्याये दृष्टं यत् संघटितक्षेत्राणां समवायैः केषाञ्चन नियमानाम् अनुपालनं करणीयं भवति । यस्य उद्देश्यम् अस्ति श्रमिकाणाम् अधिकाराणां संरक्षणम् इति । सद्यस्तनेषु वर्षेषु शासनेन समवायानां कृते नियमेषु शिथिलतां कर्तुम् अनुमतिः दत्ता अस्ति। अधुना नियमिताधारेण श्रमिकेभ्यः आजीविकाप्रदानस्य स्थाने समवायेषु यदा कार्यस्य अधिकता भवति तदा नमनीयविधिना अल्पकालाय श्रमिकाः नियोज्यन्ते । समवायस्य श्रमविनियोगमूल्ये न्यूनता भवेत् इति एतदर्थम् एवं क्रियते । तथापि विदेशिसमवायाः अधुना अपि सन्तुष्टाः न सन्ति एवं च श्रमविधिषु अतोऽपि नमनीयतायाः याचनां कुर्वन्तः सन्ति ।

द्वितीयम्, अनेके **शीर्षस्थाः भारतीयसमवायाः** वर्धितप्रतिस्पर्धया लाभान्विताः जाताः सन्ति । एतैः समवायैः नवीनतमप्रौद्योगिक्याम् एवं च उत्पादनप्रणाल्यां निवेशः कृतः अस्ति परिणामतः स्वीयानि उत्पादनमानकानि उन्नतीकृतानि सन्ति । कैश्चित् समवायैः विदेशिसमवायैः सह सफलतापूर्वकं सहयोगं कृत्वा लाभः अर्जितः अस्ति ।

अस्माद् अपि अग्रे, वैश्वीकरणेन केचन विशालाः भारतीयाः समवायाः एतावन्तः योग्याः कृताः सन्ति यत् तेषां बहुराष्ट्रियसमवायानां रूपेण उदयः भवेत् । टाटामोटर्स (मोटरयानसम्बद्धा), इम्फोसिस (प्रौद्योगिकीसम्बद्धा), रैनबैक्सी (औषधसम्बद्धा), एशियनपेण्ट्स, सुन्दरम् फास्नर्स (नट-बोल्टसम्बद्धा) इति एते केचन एतादृशाः भारतीयाः समवायाः सन्ति ये विश्वस्तरे स्वीयकार्याणां प्रसारं कुर्वन्तः सन्ति ।

वैश्वीकरणेन सेवाप्रदातृभ्यः समवायेभ्यः विशेषेण सूचना-संचारप्रौद्योगिकीसम्बद्धेभ्यः समवायेभ्यः नूतनाः अवसराः रचिताः सन्ति । भारतीयसमवायेन लन्दनस्थिताय समवायाय पत्रिकायाः प्रकाशनम् एवं च कॉलसेण्टरः अस्य उदाहरणं स्तः । एतदतिरिक्तं विवरणप्रविष्टिः (डाटा-एण्ट्री), लेखाकरणं प्राशासनिककार्यम् अभियान्त्रिकी इति एतादृश्यः अनेकाः सेवाः भारतसदृशे देशे अधुना अल्पमूल्येन उपलब्धाः सन्ति अपि च विकसितदेशानां कृते निर्यातः क्रियते ।

आगच्छन्तु एतेषां विषये विचारं कुर्याम ----

1. प्रतिस्पर्धया भारतीयजनानां कृते कथं लाभः अभवत् ?
2. किम् अन्येषां भारतीयसमवायानां बहुराष्ट्रियसमवायानां रूपेण उदयः भवेत् ? अनेन देशस्य जनतायाः कृते कः लाभः भविष्यति ?
3. सर्वकाराः अधिकं विदेशिनिवेशस्य आकर्षणाय प्रयासं किमर्थं कुर्वन्ति ?
4. प्रथमे अध्याये अस्माभिः दृष्टं यत् कस्यचित् विकासः अपरस्मै कथं विध्वंसकः भवितुं शक्नोति । भारतस्य कैश्चित् जनैः विशेषार्थिकक्षेत्राणां (सेज) स्थापनायाः विरोधः कृतः अस्ति । ज्ञातुं प्रयासं कुर्वन्तु यत् एते जनाः के सन्ति एवं च एते जनाः अस्य विरोधं किमर्थं कुर्वन्तः सन्ति ?

लघूत्पादकाः प्रतिस्पर्धां कुर्वन्तु अथवा नष्टाः भवन्तु

वैश्वीकरणात् प्रभूतसंख्यायां लघूत्पादकानां श्रमिकाणां च पुरतः महाह्वानानि स्थापितानि सन्ति।

वर्धमाना प्रतियोगिता

रविः न अपेक्षते स्म यत् उद्योगपतेः रूपेण निजजीवनस्य अल्पावधौ एव तेन संकटं सम्मुखीकरणीयं भविष्यति। 1992तमे वर्षे रविः तमिलनाडोः होसुरनामकात् औद्योगिकनगरात् संधारित्राणां निर्मात्रीसमवायस्य प्रारम्भाय बैङ्कात् ऋणं स्वीकृतवान्। संधारित्राणां प्रयोगः दीपदण्ड-दूरदर्शनसहितेषु अनेकेषु गृहवैद्युतोपकरणेषु भवति। वर्षत्रयेण एव सः स्वीयोत्पादनस्य विस्तारं कर्तुं समर्थः अभवत् एवं च तस्य समवाये विंशतिः कर्मचारिणः कार्यं कर्तुम् आरब्धवन्तः।

स्वीयसमवायस्य चालने तदा संघर्षः आरब्धः यदा सर्वकारेण 2001तमे वर्षे विश्वव्यापारसंघटनस्य सन्धेः अनुसारं संधारित्राणाम् आयातात् प्रतिबन्धः अपसारितः आसीत्। तस्य मुख्यग्राहकेषु दूरदर्शनसमवायाः आसन्, ये दूरदर्शनसेटानां निर्माणार्थं संधारित्रसहितं विभिन्नपुर्जान् युगपत् क्रीणन्ति स्म एवं च दूरदर्शनसेटानां निर्माणं कुर्वन्ति स्म। परन्तु बहुराष्ट्रियसमवायानां ब्राण्डैः सह प्रतिस्पर्धया भारतीयदूरदर्शनसमवायाः बहुराष्ट्रियसमवायानां कृते संयोजनकार्याणि कर्तुं विवशीकृताः। तेषु केचन यदा संधारित्राणां क्रयणं कुर्वन्ति स्म तदा ते एतेषाम् आयातं कर्तुम् इच्छन्ति स्म यतो हि आयातितवस्तूनां मूल्यं रविसदृशजनानां द्वारा निर्धारितात् मूल्यात् अर्धं भवति स्म।

अधुना रविः 2000तमे वर्षे निर्मितानां संधारित्राणां प्रतिशतं 50मितात् अर्धात् अपि न्यूनानां संधारित्राणां निर्माणं करोति एवं च तस्य कृते केवलं सप्त श्रमिकाः कार्यं कुर्वन्तः सन्ति। चेन्नैनगरे हैदराबादनगरे च अस्मिन् एव व्यवसाये कार्यं कुर्वद्भिः रवेः अनेकैः मित्रैः स्वीयघटकाः पिहिताः सन्ति।

बैटरी संधारित्रं प्लास्टिकं क्रीडनकं टायरं दुग्धोत्पादः एवं च खाद्यतैलोद्योगः इति एतानि कानिचन एतादृशानि उदाहरणानि सन्ति यत्र प्रतिस्पर्धायाः कारणात् लघुविनिर्मातृणां कृते महान् संघर्षः उत्पन्नः। अनेके घटकाः पिहिताः यस्मात् कारणात् अनेके श्रमिकाः वृत्तिहीनाः अभवन्। भारते लघूद्योगेषु कृषेः अनन्तरं सर्वाधिकाः श्रमिकाः (द्विकोटिसंख्याकाः) नियोजिताः सन्ति।

आगच्छन्तु एतेषां विषये विचारं कुर्याम ----

1. रवेः लघूत्पादन-घटकाः वर्धमानप्रतिस्पर्धायाः कारणात् केन प्रकारेण प्रभाविताः ?
2. अन्येषां देशानाम् उत्पादकानां तुलनायाम् उत्पादनस्य विनियोगमूल्यम् अधिकम् अस्ति इति अस्मात् कारणात् किं रविसदृशैः उत्पादकैः उत्पादनं पिधातव्यम् ? भवन्तः किं चिन्तयन्ति ?
3. नविनतमैः अध्ययनैः संकेतः प्राप्तः यत् भारतस्य लघूत्पादकानां कृते आपणे उत्तमप्रतिस्पर्धायै त्रयः बिन्दवः आवश्यकाः सन्ति-(अ) उत्तममार्गाः विद्युत् जलम् असंशोधितवस्तु विपणनं सूचनातन्त्रं च (ब) प्रौद्योगिक्यां परिष्कारः एवं च आधुनिकीकरणम् (स) उचितकुसिदमित्या ऋणोद्ग्रहणपत्रस्य समयेन उपलब्धता।
    - किं भवन्तः व्याख्यां कर्तुं शक्नुवन्ति यत् एते त्रयः बिन्दवः भारतीयानाम् उत्पादकानां केन प्रकारेण साहाय्यं करिष्यन्ति ?
    - किं भवन्तः स्वीकुर्वन्ति यत् बहुराष्ट्रियसमवायाः एतेषु क्षेत्रेषु निवेशं कर्तुम् इच्छुकाः भविष्यन्ति ? किमर्थम् ?
    - किं भवन्तः स्वीकुर्वन्ति यत् एतानि सौविध्यानि सुलभायितुं सर्वकारस्य भूमिका अस्ति ? किमर्थम् ?
    - किं भवन्तः कञ्चन एतादृशम् उपायं ज्ञापयितुं शक्नुवन्ति यं सर्वकारः अङ्गीकर्तुं शक्नुयात् ? चर्चां कुर्वन्तु।

प्रतिस्पर्धा एवं च अनिश्चिता आजीविका

वैश्वीकरणात् एवं च प्रतिस्पर्धायाः कारणात् श्रमिकाणां जीवनं व्यापकरूपेण प्रभावितम् अस्ति । वर्धमानायाः प्रतिस्पर्धायाः कारणात् अधिकतरनियोक्तारः एतेषु दिवसेषु श्रमिकेभ्यः आजीविकाप्रदाने नमनीयताम् इच्छन्ति । अस्य अर्थः अस्ति यत् श्रमिकाणाम् आजीविका अधुना सुनिश्चिता नास्ति ।

अधुना वयं पश्यामः यत् भारते वस्त्रनिर्यातोद्योगाः प्रतिस्पर्धायाः प्रभावं कथं सम्मुखीकुर्वन्तः सन्ति ?

वस्त्रनिर्यातक-यन्त्रागारे महिलाश्रमिका - यद्यपि वैश्वीकरणं महिलाभ्यः कार्यकरणाय अवसरं प्रयच्छति, परन्तु उद्योगस्थितयः एतत् प्रदर्शयन्ति यत् महिलाः लाभे सहभागित्वं समुचितरूपेण न प्राप्नवत्यः ।

अमेरिकादेशे यूरोपे च वस्त्रोद्योगस्य विशालाः बहुराष्ट्रियसमवायाः भारतीयनिर्यातकेभ्यः वस्तूनाम् आपूर्त्यर्थम् आदेशं ददति । विश्वव्यापिना अन्तर्जालेन युक्ताः विशालाः बहुराष्ट्रियसमवायाः लाभम् अधिकतमं कर्तुं सर्वतः अल्पार्घवस्तूनाम् अन्वेषणं कुर्वन्ति । एतान् महतः आदेशान् प्राप्तुं भारतीयवस्त्रनिर्यातकाः स्वीयविनियोगमूल्यं न्यूनीकर्तुं बहुपरिश्रमं कुर्वन्ति । यतो हि असंशोधितवस्तु अस्ति चेत् विनियोगमूल्ये न्यूनता न कर्तुं शक्यते। अतः नियोक्तारः श्रम-विनियोगमूल्ये न्यूनतां कर्तुं प्रयासं कुर्वन्ति । यत्र पूर्वं शिल्पशाला श्रमिकेभ्यः स्थायिरूपेण आजीविकाः ददति स्म तत्र एव ते अधुना अस्थायिरूपेण आजीविकाः प्राप्नुवन्ति येन हि श्रमिकेभ्यः आवर्षं वेतनं न दातव्यं भवेत् । श्रमिकैः बहुकालं यावत् कार्यं करणीयं भवति एवं च अत्यधिकयाचनावधौ नियमितरूपेण रात्रौ अपि कार्यं करणीयं भवति । पारिश्रमिकं बहुन्यूनं भवति एवं च श्रमिकाः स्वीयाजीविकार्थम् अतिरिक्तसमये अपि कार्यं कर्तुं विवशाः भवन्ति ।

यद्यपि वस्त्रनिर्यातकानां मध्ये प्रतिस्पर्धायाः कारणात् बहुराष्ट्रियसमवायाः अधिकलाभार्जने साहाय्ये प्राप्तवन्तः सन्ति परन्तु वैश्वीकरणस्य कारणात् प्राप्ते लाभे श्रमिकेभ्यः न्यायसंगतः भागः न दत्तः अस्ति ।

वस्त्रश्रमिका

35वर्षीया सुशीला दिल्ल्याः कस्मिंश्चित् वस्त्रनिर्यातके उद्योगे श्रमिकरूपेण अनेकवर्षाणि यावत् कार्यं कृतवती । यदा सा स्थायिश्रमिकरूपेण नियुक्ता आसीत् तदा सा स्वास्थ्यबीमायै भविष्यनिधये एवं च अतिरिक्तसमये कार्यकरणार्थं द्विगुणितं पारिश्रमिकं प्राप्तुम् अधिकृता आसीत् । यदा 1990तमस्य दशकस्य अन्तिमेषु वर्षेषु सुशीलायाः शिल्पशाला पिहिता अभवत् तदा षड् मासान् यावत् आजीविकायाः अन्वेषणानन्तरम् अन्ततः सा निजगृहात् 30किलोमीटरदूरे एकाम् आजीविकां प्राप्तवती । अनेकानि वर्षाणि यावत् अस्यां शिल्पशालायां कार्ये कृते सत्यपि सा एका अस्थायिनी श्रमिका अस्ति अपि च पूर्वापेक्षया अर्धात् अपि न्यूनम् अर्जयति । सा सप्ताहस्य सप्त दिनानि प्रातः सार्धसप्तवादने गृहात् गच्छति एवं च सायं दशवादने प्रत्यागच्छति । एकं दिनं कार्यं न करोति चेत् तस्मिन् दिने पारिश्रमिकं न प्राप्नोति । अधुना सा अन्यं कमपि लाभं न प्राप्नोति यं लाभं सा पूर्वं प्राप्नोति स्म । तस्याः गृहस्य समीपवर्ति-शिल्पशालाभ्यः अत्यधिकम् अस्थिराः कार्यादेशाः प्राप्ताः भवन्ति अस्मात् एव कारणात् ताभ्यः शिल्पशालाभ्यः न्यूनं वेतनं प्राप्यते ।

उपर्युक्ताः कार्यपरिस्थितयः एवं च श्रमिकाणां कठिनताः अनेकेषु औद्योगिकघटकेषु सेवासु च सामान्यविषयत्वेन सन्ति। अद्य अधिकतरश्रमिकाः असंघटितक्षेत्रे नियोजिताः सन्ति। एतावत् एव न, संघटितक्षेत्रे क्रमशः कार्यपरिस्थितयः असंघटितक्षेत्रम् इव जायमानाः सन्ति। संघटितश्रेत्रकस्य श्रमिकाः यथा सुशीला अधुना किमपि संरक्षणम् अथवा लाभं न प्राप्नुवन्ति यस्य सा पूर्वम् उपभोगं करोति स्म।

आगच्छन्तु एतेषां विषये विचारं कुर्याम ----

1. वस्त्रोद्योगस्य श्रमिकाः भारतीयनिर्यातकाः एवं च विदेशिबहुराष्ट्रियसमवायाः प्रतिस्पर्धायाः कारणात् केन प्रकारेण प्रभाविताः सन्ति ?
2. वैश्वीकरणात् प्राप्तेषु लाभेषु श्रमिकाः न्यायसंगतम् अंशं प्राप्तुं शक्नुयुः इति एतदर्थं प्रत्येकं निम्नवर्गः किं कर्तुं शक्नोति ?
   (क) सर्वकारः
   (ख) निर्यातकशिल्पशालानां नियोक्तारः
   (ग) बहुराष्ट्रियसमवायाः
   (घ) श्रमिकाः
3. वर्तमानसमये भारते विवादः अस्ति यत् किं समवायैः आजीविका-नीतीनां सन्दर्भे नमनीयता अङ्गीकर्तव्या। अस्य अध्यायस्य आधारेण नियोक्तॄणां श्रमिकाणां च ये पक्षाः सन्ति तेषां पक्षाणां संक्षेपेण विवरणं ददतु।

न्यायसंगत-वैश्वीकरणार्थं संघर्षः

उपर्युक्तप्रमाणैः अयं संकेतः प्राप्यते यत् वैश्वीकरणं सर्वेषां कृते लाभप्रदं नास्ति इति। शिक्षितैः कुशलैः सम्पन्नजनैः च वैश्वीकरणात् प्राप्तानां नूतनानाम् अवसराणां सर्वोत्तमः उपयोगः कृतः अस्ति। अपरतः अनेकेः जनाः लाभात् अंशं न प्राप्तवन्तः।

यतो हि वैश्वीकरणम् अधुना काचित् सत्यता अस्ति अतः वैश्वीकरणम् अधिकं न्यायसंगतं कथं कर्तुं शक्यते ? न्यायसंगतं वैश्वीकरणं सर्वेभ्यः अवसरं प्रदास्यति अपि च एतदपि सुनिश्चितं करिष्यति यत् वैश्वीकरणस्य लाभेषु सर्वेषां समानतया सहभागिता भवेत् इति।

सर्वकारः एतत् सम्भवं कर्तुं महत्त्वपूर्णां भूमिकां निर्वोढुं शक्नोति। अस्य नीतयः एतादृश्यः भवेयुः यत् केवलं धनिनां तथा च प्रभावशालिनां जनानाम् एव हितानां संरक्षणं न भवेत् अपि तु देशस्य सर्वेषां जनानां हितानां संरक्षणं भवेत्। भवद्भिः सर्वकारद्वारा क्रियमाणानां केषाञ्चन उपायानां विषये पठितम् अस्ति। यथा सर्वकारः एतत् सुनिश्चेतुं शक्नोति यत् श्रमिकसम्बद्धानां विधीनाम् उचितं कार्यान्वयनं भवेत् अपि च श्रमिकाः स्वीयान् अधिकारान् प्राप्नुयुः। सर्वकारः लघूत्पादकानां कार्यनिष्पादने परिष्काराय तदा पर्यन्तं साहाय्यं कर्तुं शक्नोति यावत्पर्यन्तं ते प्रतिस्पर्धां कर्तुं सक्षमाः न भवन्ति। आवश्यकं भवति चेत् सर्वकारः व्यापारस्य एवं च निवेशावरोधकानाम् उपयोगं कर्तुं शक्नोति। सर्वकारः न्यायसंगतनियमानां कृते विश्वव्यापारसंघटनेन सह सन्धीन् अपि कर्तुं शक्नोति। विश्वव्यापारसंघटने विकसितदेशानां वर्चस्वं विरुद्ध्य समानहितसन्धारकैः विकासशीलदेशैः मिलित्वा संघर्षः करणीयः भविष्यति।

विगतैः कैश्चित् वर्षैः महताम् अभियानानां तथा च जनसंघटनानां प्रतिनिधीनां कारणात् विश्वव्यापारसंघटनस्य व्यापारेण एवं च निवेशेन सम्बद्धाः महत्त्वपूर्णाः निर्णयाः प्रभाविताः सन्ति। एतेन प्रदर्शितं भवति यत् जनाः अपि न्यायसंगत-वैश्वीकरणस्य संघर्षे महत्त्वपूर्णां भूमिकां निर्वोढुं शक्नोति।

हाङ्गकाङ्गे डब्लू.टी.ओ विरुद्ध्य प्रदर्शनम् - 2005

सारांशः

अस्मिन् अध्याये वयं वैश्वीकरणस्य वर्तमानावस्थायाः अध्ययनं कृतवन्तः। वैश्वीकरणं विभिन्नदेशानां मध्ये तीव्रैकीकरणस्य प्रक्रिया अस्ति । एतद् अधिकाधिकेन विदेशिनिवेशेन विदेशिव्यापारेण च सम्भवं जायमानम् अस्ति । बहुराष्ट्रियसमवायाः वैश्वीकरणस्य प्रक्रियायां मुख्यभूमिकायाः निर्वहणं कुर्वन्तः सन्ति । अधिकाधिकाः बहुराष्ट्रियसमवायाः विश्वस्य तेषां स्थानानाम् अन्वेषणं कुर्वन्तः सन्ति यानि तेषाम् उत्पादनाय अधिकम् अल्पमूल्यानि स्युः। परिणामतः उत्पादनकार्यं जटिलरीत्या संघटितं क्रियमाणम् अस्ति।

देशानां मध्ये उत्पादनं संघटयितुं प्रौद्योगिकी विशेषेण सूचनाप्रौद्योगिकी महतीं भूमिकां निर्व्यूढवती। सममेव व्यापारस्य निवेशस्य च उदारीकरणेन व्यापारस्य निवेशस्य च अवरोधकानि अपसार्य्य वैश्वीकरणं सुगमीकृतम् अस्ति। अन्ताराष्ट्रियस्तरे विश्वव्यापारसंघटनेन व्यापारस्य निवेशस्य च उदारीकरणार्थं विकासशीलदेशाः विवशीकृताः

अपरञ्च वैश्वीकरणेन धनिनः उपभोक्तारः एवं च कुशलिनः शिक्षिताः एवं च धनिनः उत्पादकाः एव लाभान्विताः जाताः सन्ति परन्तु वर्धमानायाः प्रतिस्पर्धायाः कारणात् अनेके लघूत्पादकाः श्रमिकाः च प्रभाविताः जाताः सन्ति। न्यायसंगतं वैश्वीकरणं सर्वेषां कृते अवसराणां सर्जनं करिष्यति अपि च एतद् अपि सुनिश्चितं करिष्यति यत् वैश्वीकरणस्य लाभेषु सर्वेषां भद्रतरा सहभागिता भवेत्।

अभ्यासः

1. वैश्वीकरणेन भवतां कः अभिप्रायः अस्ति ? स्वशब्दैः स्पष्टं कुर्वन्तु।
2. भारतशासनेन विदेशिव्यापारे विदेशिनिवेशे च अवरोधकानि किमर्थं स्थापितानि ? शासनम् एतानि अवरोधकानि किमर्थम् अपसारयितुम् इच्छति स्म ?
3. श्रमविधिषु नमनीयता समवायानां साहाय्यं केन प्रकारेण करिष्यति ?
4. अन्येषु देशेषु बहुराष्ट्रियसमवायाः केन प्रकारेण उत्पादने नियन्त्रणं स्थापयन्ति ?
5. विकसितदेशाः विकासशीलदेशान् तेषां व्यापारस्य निवेशस्य च उदारीकरणं किमर्थम् इच्छन्ति ? किं भवन्तः स्वीकुर्वन्ति यत् विकासशीलदेशैः अपि एतादृशी याचना करणीया ?
6. वैश्वीकरणस्य प्रभावः एकसमानः नास्ति इति अस्य कथनस्य स्वशब्दैः व्याख्यां कुर्वन्तु।
7. व्यापारः एवं च निवेशनीतीनाम् उदारीकरणं वैश्वीकरणप्रक्रियायाः कृते कथं साहाय्यभूते स्तः ?
8. विदेशिव्यापारः विभिन्नदेशानाम् आपणानाम् एकीकरणाय केन प्रकारेण साहाय्यभूतः अस्ति ? अत्र दत्तात् उदाहरणात् भिन्नेन उदाहरणेन सह व्याख्यां कुर्वन्तु।
9. वैश्वीकरणं भविष्ये भविष्यति। किं भवान् कल्पनां कर्तुं शक्नोति यत् अद्यतः विंशतिवर्षाणाम् अनन्तरं विश्वं कीदृशं भविष्यति ? कारणसहितम् उत्तरं ददतु।
10. चिन्तयन्तु भवन्तः द्वौ जनौ परस्परं तर्कं कुर्वन्तौ पश्यन्ति – तयोः एकः कथयन् अस्ति यत् वैश्वीकरणात् अस्माकं देशस्य विकासः न अभवत् अन्यः कथयन् अस्ति यत् वैश्वीककणात् भारतस्य विकासः अभवत्। एताभ्यां जनाभ्यां भवन्तः कथम् उत्तरं दास्यन्ति ?
11. रिक्तस्थानानां पूर्तिं कुर्वन्तु ---

    दशकद्वयस्य तुलनायां भारतीयक्रेतृणां पार्श्वे वस्तूनाम् अधिकाः विकल्पाः सन्ति। एतत् ..... प्रक्रियया सह निकटतया सम्बद्धम् अस्ति। अनेकेषु अन्येषु देशेषु उत्पादितानां वस्तूनां भारतस्य आपणेषु विक्रयणं क्रियमाणम् अस्ति। अस्य अर्थः अस्ति यत् अन्यैः देशैः सह ..... वर्धमानम् अस्ति। अस्माद् अपि अग्रे भारते बहुराष्ट्रियसमवायानां द्वारा उत्पादितब्राण्डानां वर्धमानां संख्यां वयम् आपणेषु पश्यामः। बहुराष्ट्रियसमवायाः भारते निवेशं कुर्वन्तः सन्ति यतो हि .....। अपरञ्च आपणे उपभोक्तृणां कृते अधिकाः विकल्पाः एतदर्थं वर्धन्ते .....एवं च .....प्रभावः अर्थः अस्ति उत्पादकानां मध्ये अगिकतम.....।

12. निम्नलिखितानां सुमेलनं कुर्वन्तु।

    (क) बहुराष्ट्रियसमवायाः लघूत्पादकेभ्यः अल्पमूल्यैः क्रयणं कुर्वन्ति। (अ) मोटरयानानि

    (ख) आयाते करः एवं च कोटा इत्यस्य उपयोगः, व्यापारनियमनम् (ब) वस्त्रं, पादत्राणं, क्रीडासामग्रीकृते क्रियते।

    (ग) विदेशेषु निवेशं कुर्वन्तः भारतीयसमवायाः (स) कॉलसेण्टर इति

    (घ) आई.टी. इति अनेन सेवानाम् उत्पादनस्य प्रसारे साहाय्यं कृतम् अस्ति। (द) टाटामोटर्स, इम्फोसिस रैनबैक्सी

    (ङ) अनेकैः बहुराष्ट्रियसमवायैः उत्पादनार्थं निवेशः कृतः अस्ति। (य) व्यापारावरोधकाः

13. उचितविकल्पस्य चयनं कुर्वन्तु .....

    (अ) वैश्वीकरणस्य विगतदशकद्वये द्रुतः आयातः निर्यातः च दृष्टः अस्ति

(क) देशानां मध्ये वस्तूनां सेवानां जनानां च

(ख) देशानां मध्ये वस्तूनां सेवानां निवेशानां च

(ग) देशानां मध्ये वस्तूनां निवेशानां जनानां च

(आ) विश्वस्य देशेषु बहुराष्ट्रियसमवायानां द्वारा निवेशस्य सर्वाधिकः सामान्यमार्गः अस्ति

(क) नूतनशिल्पशालानां स्थापना

(ख) स्थानीयसमवायानां क्रयणम्

(ग) स्थानीयसमवायैः सह सहभागिता

(इ) वैश्वीकरणेन जीवनस्तरस्य परिष्कारे साहाय्यं कृतम् अस्ति।

(क) सर्वेषां जनानाम्

(ख) विकासशीलदेशानां जनानाम्

(ग) विकासशीलदेशानां श्रमिकाणाम्

(घ) उपर्युक्तेषु केषाञ्चन अपि न

अतिरिक्तपरियोजना / क्रियाविधिः

1. केषाञ्चन ब्राण्डेडोत्पादकानां चयनं कुर्वन्तु येषां वयं प्रतिदिनं प्रयोगं कुर्मः (फेनिलकम्, टूथपेस्ट, वैद्युतवस्तूनि इत्यादीनि)। परीक्षणं कुर्वन्तु यत् एतेषु कानि कानि वस्तूनि बहुराष्ट्रियसमवायानां द्वारा उत्पादितानि सन्ति ?
2. स्वीयम् इष्टं कमपि भारतीयम् उद्योगं स्वीकुर्वन्तु। उद्योगस्य निम्नलिखितपक्षान् उद्दिश्य जनानां साक्षात्कारेभ्यः वार्तापत्राणां पत्रिकाणां कर्तनेभ्यः पुस्तकेभ्यः दूरदर्शनात् एवं च अन्तर्जालात् सूचनाः छायाचित्राणि च संकलयन्तु।

(क) उद्योगे विविधाः उत्पादकाः / समवायाः

(ख) किम् उत्पादस्य अन्येभ्यः देशेभ्यः निर्यातः भवति ?

(ग) किम् उत्पादकानां मध्ये बहुराष्ट्रियसमवायाः सन्ति ?

(घ) उद्योगे प्रतिस्पर्धा

(ङ) उद्योगे कार्यपरिस्थितयः

(च) किं विगतैः पञ्चदशवर्षैः उद्योगे किमपि महत् परिवर्तनं जातम् अस्ति ?

(छ) उद्योगे कार्यरतानां जनानां समस्याः।

शिक्षकाणां कृते निर्देशाः

पञ्चमः अध्यायः उपभोक्तृणाम् अधिकाराः

अस्मिन् अध्याये वयम् अस्माकं देशे आपणस्य कार्यविधेः सन्दर्भे उपभोक्तृणाम् अधिकारविषयक-प्रकरणानि अधिकृत्य विचारं करिष्यामः। आपणे असमानस्थितीनां बहवः पक्षाः सन्ति तथा च नियमानां विधीनां च प्रवर्तनस्य स्थितिः असन्तोषप्रदा अस्ति। अतः नूतनाः उपभोक्तारः वास्तविकतया परिचिताः स्युः अपि च उपभोक्तृसम्बद्धे आन्दोलने भागं स्वीकुर्युः इति आवश्यकम् अस्ति (नूतनाः उपभोक्तारः उपभोक्तृरूपेण सावधानाः जागरूकाः च भवेयुः इत्यस्य निर्माणं करणीयम् अस्ति)। अयम् अध्यायः कासाञ्चन घटनानाम् उदाहरणानि प्रस्तौति यथा केन प्रकारेण वास्तविकजीवने केचन उपभोक्तारः शोषणस्य विषयाः जाताः अथ च केन प्रकारेण वैधसंस्थाभिः तेषाम् उपभोक्त्रधिकाराणां रक्षा कृता अपि च क्षतिपूर्तेः प्राप्तये तेषां साहाय्यं कृतम्। जीवनस्य अनुभवान् समीपवर्तिघटनाभिः सह संयोजने समर्थाः भवेयुः इति अस्मिन् विषये एतासां घटनानां विवरणं छात्रान् समर्थान् करिष्यति। छात्राः प्रबुद्धोपभोक्तृरूपेण जागरूकाः भूत्वा उपभोक्त्रान्दोलनाय नूतनां दिशां दद्युः अपि च स्वीयदीर्घकालिकसंघर्षाणां द्वारा जनानां सक्रियभागितां वर्धयेयुः इति धिया अस्माभिः छात्राः समर्थाः करणीयाः। अस्मात् अध्यायात् वयं केषाञ्चन एतादृशानां संघटनानां विषये अपि सूचनां प्राप्नुमः यानि विभिन्नप्रकारेण उपभोक्तृणां साहाय्यं कुर्वन्ति। अध्यायस्य अन्ते भारते उपभोक्त्रान्दोलनस्य कानिचन गम्भीरप्रकरणानि उक्तानि सन्ति।

शिक्षणस्य विधयः / सूचनायाः स्रोतांसि

अस्मिन् अध्याये प्रश्नाः सन्दर्भाध्यनानि एवं च क्रियाविधयः सम्मेलिताः सन्ति। एतेषां प्रकरणानां विषये छात्राणां समूहे विचारविमर्शं कुर्वन्ति चेत् भद्रतरं भविष्यति। एतेषु केषाञ्चन उत्तरं व्यक्तिगतरूपेण लिखित्वा दातुं शक्यते।

भवन्तः प्रत्येकं क्रियाविधेः आरम्भं तत्र गहनपरिचर्चासत्रेण सह कर्तुं शक्नुवन्ति। सममेव अस्मिन् अध्याये भवतां भूमिकायाः निर्धारणाय अनेकाः सम्भावनाः सन्ति। एताः सम्भावनाः प्रकरणानां गहनतया अवगमनस्य एवं च स्वीयानुभवानां जनेषु वितरणस्य समीचीनतरविधयः भवितुं शक्नुवन्ति। सम्मिलितरूपेण विज्ञापननिर्माणम् एतेषां प्रकरणानां विषये विचारं कर्तुं द्वितीयः विधिः अस्ति। अस्मिन् अध्याये अनेके क्रियाविधयः सम्मिलिताः सन्ति येषां पूर्त्यर्थं विभिन्नसंस्थाभिः सह सम्पर्कः आवश्यकः भविष्यति। यात्राणाम् आवश्यकता भविष्यति। एताः संस्थाः उपभोक्तृसंरक्षणपरिषद् उपभोक्तृसंस्थाः उपभोक्तृन्यायालयाः खुदरापणाः विपणयः इत्यादयः भवितुं शक्नुवन्ति। छात्राणाम् अधिकाधिकान् अनुभवान् प्राप्तुं सम्पर्काणाम् आयोजनं कुर्वन्तु। सम्पर्काणाम् उद्देश्यविषये तैः सह परिचर्चां कुर्वन्तु। कार्यात् प्राक्तनी सावधानता अन्यानि आवश्यकवस्तूनि एवं च कार्याणि (आख्या प्रस्तावः नियमावली सम्मानः इत्यादि) यानि तेषां कृते यात्रायाः अनन्तरं प्राप्तानि भविष्यन्ति चर्चनीयानि। अस्मिन् अध्याये छात्राः पत्रलेखने एवं वार्तालापे प्रतिभागं स्वीकर्तुं शक्नुवन्ति। अस्माभिः अस्य अध्यायस्य अभ्यासानां भाषां प्रति संवेदनात्मकैः भवितव्यं भविष्यति।

अस्मिन् अध्याये प्रामाणिकजालपुटानि पुस्तकानि वार्तापत्राणि एवं च पत्रिकाः इति एतेभ्यः सामग्री संकलिता अस्ति। उदाहरणार्थं http//www.mca.gov.in इति केन्द्रीयशासनस्य उपभोक्तृविषयाणां मन्त्रालयस्य जालपुटम् अस्ति। www.cuts-international.org इति द्वितीयं जालपुटम् अस्ति। एतत् जालपुटं भारते विंशतिवर्षेभ्यः अधिकात् समयात् कार्यं कुर्वद् उपभोक्तृसंघटनानां जालपुटम् अस्ति। एतत् भारते उपभोक्तॄन् जागरूकान् कर्तुं विविधाः सामग्रीः प्रकाशयति। छात्राणां मध्ये अस्य वितरणस्य आवश्यकता अस्ति येन ते अपि स्वीयक्रियाविधिषु सहभागरूपेण संकलनं कर्तुं शक्नुयुः। अतः ते क्रियाविधिभ्यः प्राप्तां सामग्रीम् अपि संकलितां कर्तुं शक्नुवन्ति। उदाहरणार्थं विभिन्नघटनानां सूचना वार्तापत्राणाम् अंशेभ्यः एवं च उपभोक्तृन्यायालयेषु संघर्षं कुर्वद्भ्यः उपभोक्तृभ्यः प्राप्तुं शक्यते। छात्राः उपभोक्तृसंरक्षणपरिषद् उपभोक्तृन्यायालयः एवं च अन्तर्जालः इति एतादृशेभ्यः विभिन्नस्रोतोभ्यः सामग्र्याः संकलनं कुर्युः एवं च तां पठेयुः।

पञ्चमः अध्यायः

उपभोक्तृणाम् अधिकाराः

उपर्युक्ताः संग्रहाः उपभोक्तृन्यायालयस्य निर्णयानां केषाञ्चन वार्तापत्राणां प्रतिकृतयः सन्ति । एतेषु प्रकरणेषु जनाः उपभोक्तृन्यायालयं किमर्थं गतवन्तः ? एते निर्णयाः एतदर्थं दत्ताः यतो हि केचन जनाः न्यायं प्राप्तुं दृढं संघर्षरताः अवर्तन्त । कथं ते न्यायकृते व्याकुलाः अवर्तन्त ? अस्मात् अपि अधिकं महत्त्वपूर्णम् एतद् अस्ति यत् यदा ते अनुभूतवन्तः यत् तैः सह अनुचितम् आचरितं तदा विक्रेतृभ्यः यथोचितं व्यवहारं प्राप्तुं ते स्वस्य उपभोक्त्रधिकारस्य प्रयोगं कथं कर्तुं शक्नुवन्ति ?

गरीबों को मिलेंगी सस्ती दालें

सहारा न्यूज ब्यूरो
नई दिल्ली, 19 फरवरी।

प्रदेश सरकार ने दिल्ली के गरीब परिवारों को बाजार मूल्य से 25 प्रतिशत कम दर पर दो सबसे अधिक इस्तेमाल की जाने वाली दालें मुहैया कराने का फैसला किया है। बेहद गरीब और झुग्गी झोपड़ियों व पुनर्वास कालोनियों में रह रहे लोगों को दालों में बढ़ोतरी के कारण हो रही कठिनाइयों को देखते हुए यह निर्णय लिया गया।

मुख्यमंत्री शीला दीक्षित की अध्यक्षता में हुई मंत्रिमंडल की बैठक में यह फैसला लिया गया।

बैठक में उक्त प्रस्ताव खाद्य मंत्री राजकुमार चौहान ने पेश किया जिससे एक-दो सदस्य सहमत नहीं थे लेकिन बाद में सर्वसम्मति से यह प्रस्ताव पारित हो गया। बैठक के बाद मुख्यमंत्री ने बताया कि

- मुख्यमंत्री की अध्यक्षता में हुई बैठक में लिया गया फैसला
- 25 प्रतिशत कम दर पर दो किस्म की दालें मिलेंगी
- बीपीएल, अंत्योदय व झुग्गियों में रहने वाले लोगों को राहत

अरहर और चना दाल सार्वजनिक वितरण प्रणाली के जरिए दी जाएगी। बीपीएल, अंत्योदय और झुग्गियों में रह रहे राशनकार्ड धारकों को चार किग्रा. दाल यानी दो किग्रा. चना और दो किग्रा. अरहर प्रतिमाह दी जाएगी। इससे 5,04,336 परिवारों को मदद मिलेगी। इनमें 3,78,947 बीपीएल परिवार, 57,336 अंत्योदय परिवार व 68,053 झुग्गी झोपड़ी परिवार शामिल हैं। ये दालें केंद्रीय भंडार या किसी सरकारी निर्धारित एजेंसी से खरीदी जाएंगी। उन्होंने बताया कि अरहर 24.75 रुपए व चना दाल 27.75 रुपए प्रति किग्रा. मिलेगी। इनकी बाजार दर क्रमशः 33 और 37 रुपए है। सरकार दालों पर सब्सिडी देने के लिए प्रतिमाह 1,76,51,760 रुपए जारी करेगी।

का ऋतुपर्णो घोष
नया बच्चन अ
अंजाम दे रही
बातचीत

फल्म

गलत दवा देने से महिला की मौत

सहारा न्यूज ब्यूरो
पश्चिमी दिल्ली, 15 फरवरी।

पश्चिम विहार थाना क्षेत्रांतर्गत ज्वालापुरी इलाके में एक महिला को एक झोला छाप डाक्टर के बेटे ने गलत दवा दे दी जिससे आज सुबह उसकी मौत हो गयी। पुलिस ने हत्या का मामला दर्ज कर शव को पोस्टमार्टम के लिए भेज दिया है। पुलिस के अनुसार कल रात ज्वालापुरी इलाके में रहने वाली सुनीता देवी (45) को बुखार की शिकायत थी। महिला अपने पति चंद्रशेखर के साथ पास में ही स्थित झोला छाप डाक्टर बच्चू सिंह के पास दवा लेने गयी। बच्चू सिंह के न होने पर उसके बेटे नवीन ने उसे दवा दे दी। रात को दवा खाकर वह सो गयी किन्तु सुबह उसकी तबीयत और बिगड़ गयी। जब तक महिला को अस्पताल ले जाया जाता उसकी मौत हो गयी। महिला के परिजनों ने इलाके में जमकर हंगामा किया। मामले की जानकारी मिलते ही पुलिस घटनास्थल पर पहुंच गयी और नवीन को हिरासत में ले लिया और शव पोस्टमार्टम के लिए भेज दिया। पोस्टमार्टम रिपोर्ट के आने के बाद ही पता चल पाएगा कि महिला की मौत किस कारण हुई।

नींद से जागी दीदीमी...

नीम-हकीमों के विज्ञापन पर सरकार को नोटिस

सहारा न्यूज ब्यूरो
नई दिल्ली, 21 फरवरी।

गुप्त रोगों व एड्स जैसी गंभीर बीमारियों के इलाज करने का दावा करने वाले विज्ञापनों पर दिल्ली हाईकोर्ट ने कड़ी नाराजगी जाहिर की है। हाईकोर्ट ने आज इस मामले में दिल्ली सरकार को नोटिस जारी करते हुए अपना रुख स्पष्ट करने को कहा है।

मुख्य न्यायाधीश एम. के. शर्मा व न्यायमूर्ति संजीव खन्ना की खंडपीठ ने एक जनहित याचिका पर सुनवाई के बाद यह नोटिस जारी किया। खंडपीठ ने टिप्पणी की कि यह दुर्भाग्य है कि कानून होने के बावजूद ऐसे विज्ञापन छप रहे हैं। खंडपीठ ने सभी अखबारों व टीवी चैनलों के संपादकों को सलाह दी कि ऐसे विज्ञापन छापने व दिखाने से पहले यह सोचना चाहिए कि इससे समाज पर क्या असर पड़ेगा। खंडपीठ ने याचिकाकर्ता की उस मांग को ठुकरा दिया जिसमें सभी अखबारों एवं टीवी चैनलों को प्रतिवादी बनाने की मांग की गई थी। सुनवाई के दौरान दिल्ली पुलिस ने कोर्ट को बताया कि अब तक ऐसे विज्ञापन देने वालों के खिलाफ चार प्राथमिकी दर्ज की गई हैं। खंडपीठ ने दिल्ली पुलिस को उचित कार्रवाई करने का निर्देश दिया है। याचिका में कहा गया है कि अखबारों व चैनलों में गुप्त रोग, एड्स, कैंसर जैसी गंभीर बीमारियों के पक्के इलाज का दावा करने वाले विज्ञापनों रोक लगाई जाए।

सुरक्षा की गारंटी के निहितार्थ

उपभोक्ताओं के विश्वास पर मा

नई दिल्ली, वि.: इंटर्टर और बिजली उपकरण बनाने वाली अग्रणी कंपनी माइक्रोटेक इंटरनेशनल प्राइवेट लिमिटेड ने लगातार चौथी बार 'ईएफवाई रीडर्स अवार्ड-2007' जीत कर एक बार फिर उपभोक्ताओं के विश्वास पर खरा उतरा है। कंपनी वर्ष 2004 से लगातार इस अवार्ड को जीत रही है।

आधुनिक तकनीक और प्रोफेशन टीम के द्वारा विकसित किए गए विभिन्न रेंज के माइक्रोटेक डिजिटल व साईनवेव इंवर्टर और यूपीएस में कई खूबियां है जो इसे बाजार में उपलब्ध इंवर्टरों के अलग करती है। कंपनी ने तीन से बीस केवीए का हाई रेंज इंवर्टर व यूपीएस भी बाजार में उतरा है। कंपनी को वर्ष 2005-2006 में 'इंडिया मोस्ट प्रेफर्ड ब्रांड' के लिए 'स्मार्ट लिविंग अवार्ड' भी दिया जा चुका है। कंपनी को

नई दिल्ली में सेफ प्राप्त करते एल के बेहतरीन सेवा ने 'आईएसओ-900

केलोनिवि

बिना डाक्टर शुरू हो गया अस्पताल

राकेश नाथ
बाहरी दिल्ली, 20 फरवरी।

संसाधनों की कमी के बावजूद लगभग तीन साल पूर्व प्रदेश सरकार ने बवाना में सत्यवादी राजा हरिश्चन्द्र

शुरू हुआ जब इसको लेकर राजनीतिक और सामाजिक संगठनों ने अस्पताल के गेट पर धरना-प्रदर्शन शुरू किया।

अस्पताल में एक सामान्य फिजिशियन तक नहीं है। अस्पताल

स्थित अम्बेडकर अस्पताल में रेफर कर दिया जाता है। वहां पर भी भीड़ का हाल किसी से छुपा नहीं है।

अस्पताल के चिकित्सा अधीक्षक डा. एनआर अग्रवाल के मुताबिक चिकित्सकों की कमी के

प्रदूषित पानी

हरियाणा ने फिर प्रदूषित पानी छोड़ा है जिससे राजधानी में पीने के पानी की समस्या हो गई है। लंगता है यमुना का बहाव दिल्ली की तरफ होने की सजा राजधानी को भुगतनी पड़ रही है। सोनीपत और पानीपत की औद्योगिक इकाइयो का प्रदूषित पानी बेरोकटोक नदी में बहा दिया जाता है और यह जानते हुए कि यहां से जाने वाला पानी दिल्ली में पीने के लिए शोधित किया जाता है। अमोनिया की मात्रा जितनी अधिक होती है, शोधन में उतनी ही दिक्कत आती है। इस तथ्य की जानकारी क्या वहां के प्रशासन को नहीं है? तमाम कायदों को ताक पर रख इन शहरो की इकाइयों ने अपने दूषित पानी के शोधन के लिए कॉमन एफ्लूएंट

विपणौ उपभोक्तारः

आपणे अस्माकं सहभागिता उत्पादकरूपेण एवं च उपभोक्तृरूपेण अर्थात् उभयरूपेण भवति। वस्तूनां सेवानां च उत्पादकरूपेण वयं प्रथमं वर्णितकृषिः उद्योगाः अथवा सेवाः इति एतेषां सदृशेषु क्षेत्रेषु कार्यरताः भवितुं शक्नुमः। उपभोक्तृणां सहभागिता आपणेषु तदा भवति यदा ते स्वीयावश्यकतानुसारं वस्तूनां सेवानां च क्रयणं कुर्वन्ति। उपभोक्तृरूपेण जनानां द्वारा उपभुज्यमानानि एतानि अन्तिमवस्तूनि भवन्ति।

विगतेषु अध्यायेषु अस्माभिः विकासस्य वर्धनाय आवश्यकनियमानाम् एवं च नियन्त्रणानाम् अथवा एतदर्थम् उत्थापितानां पदक्षेपाणाम् आवश्यकतायाः वर्णनं कृतम् अस्ति। एतेषां महत्त्वम् असंघटितक्षेत्रस्य श्रमिकाणां सुरक्षार्थं तेन एव प्रकारेण भवितुं शक्नोति येन प्रकारेण उत्तमर्णैः प्रवर्तितायाः उच्चकुसीदमितेः जनान् रक्षितुं नियमानां नियन्त्रणानाम् आवश्यकता भवति। अनेन एव प्रकारेण पर्यावरणस्य सुरक्षायै नियमानां एवं च विनियमानाम् आवश्यकता अस्ति।

उदाहरणार्थम् अनौपचारिकक्षेत्राणाम् उत्तमर्णाः येषां विषये भवन्तः पूर्ववर्तिनि तृतीये अध्याये पठितवन्तः सन्ति ते अधमर्णेषु बन्धनं कर्तुं विभिन्नाः उक्तीः अङ्गीकुर्वन्ति। सामयिकस्य ऋणस्य कारणात् ते उत्पादकान् निम्नमित्या उत्पादान् विक्रेतुं विवशीकर्तुं शक्नुवन्ति। ते स्वप्नासदृश्यै महिलायै ऋणं दातुं स्वीयभूमेः विक्रयणाय विवशीकर्तुं शक्नुवन्ति। अनेन एव प्रकारेण असंघटितक्षेत्रेषु कार्याणि कुर्वद्भिः बहुभिः जनैः निम्नवेतने कार्यं करणीयं भवति एवं च ताः परिस्थितयः सम्मुखीकरणीयाः भवन्ति याः न्यायोचिताः न भवन्ति अपि च प्रायः तेषां स्वास्थ्याय हानिकारिण्यः अपि भवन्ति। एतादृशं शोषणम् अवरोद्धुम् एवं च तेषां सुरक्षायै वयं नियमानाम् एवं च विनियमानां विषये वार्तां कृतवन्तः। एतादृश्यः अनेकाः संस्थाः सन्ति याभिः एतत् सुनिश्चेतुं दीर्घकालं संघर्षः कृतः अस्ति यत् एतेषां नियमानाम् अनुपालनं भवेत्।

आपणे अपि उपभोक्तृणां सुरक्षार्थं नियमानां विनियमानां च आवश्यकता भवति यतो हि एकाकी उपभोक्ता प्रायः आत्मानं निर्बलस्थितौ प्राप्नोति। क्रीतस्य वस्तुनः अथवा सेवायाः विषये यदापि किमपि दूषणम् आगच्छति तदा विक्रेता सर्वम् उत्तरदायित्वं क्रेतरि मण्डयितुं प्रयासं करोति। सामान्यरूपेण तेषां प्रतिक्रिया भवति "भवद्भिः यत् क्रीतं तत् न रोचते चेत् कुत्रचित् अन्यत्र गच्छन्तु।" चिन्तयन्तु यत् विक्रयानन्तरं विक्रेतुः किमपि उत्तरदायित्वं न भवति। उपभोक्त्रान्दोन्नलं यस्य विषये वयम् अग्रे चर्चां करिष्यामः, अस्याः स्थितेः परिवर्तनाय कश्चन प्रयासः अस्ति।

आपणेषु शोषणं बहुप्रकारेण भवति। उदाहरणार्थं यदा कदा व्यापारिणः अनुचितव्यापारं कर्तुम् आरभन्ते। यथा आपणिकाः उचितभारात् न्यूनभारं तोलयन्ति अथवा व्यापारिणः तानि शुल्कानि योजयन्ति येषां वर्णनं पूर्वं न कृतं भवति अथवा मिश्रणयुक्तानि दोषयुक्तानि वस्तूनि विक्रीयन्ते।

यदा उत्पादकाः न्यूनाः शक्तिशालिनः च भवन्ति एवं च उपभोक्तारः अल्पमात्रायां क्रयणं कुर्वन्ति विकीर्णाः च भवन्त तदा विपणिः उचितरीत्या कार्यं न करोति। विशेषतया इयं स्थितिः तदा भवति यदा एतेषां वस्तूनाम् उत्पादनं विशालसमवायैः क्रियमाणः भवति। अधिकपरिसम्पत्तिवन्तः शक्तिशालिनः एवं च समृद्धाः समवायाः विभिन्नप्रकारेण चतुरतया आपणं प्रभावयितुं शक्नुवन्ति। उपभोक्तृन् आकर्षयितुं ते समये समये जनसंचारमाध्यमेन अन्यस्रोतसां च माध्यमेन मिथ्या सूचनां यच्छन्ति। उदाहरणार्थं मातुः दुग्धस्य अपेक्षया अस्माकम्उत्पादः साधुतरः अस्ति इति प्रतिज्ञां कृत्वा केनचित् समवायेन सर्वाधिकवैज्ञानिकोत्पादस्य रूपेण शिशूनां कृते दुग्धचूर्णं सम्पूर्णविश्वे अनेकवर्षाणि यावत् विक्रीतम्। अनेकवर्षाणां निरन्तरसंघर्षस्य अनन्तरं समवायः एतत् स्वीकर्तुं विवशः अभवत् यत् स सततं मिथ्या उद्घोषणानि कुर्वन् आसीत्।

अनेन एव प्रकारेण सिगरेटोत्पादकाः एतत् मन्यन्तां यत् तेषाम् उत्पादकः कर्कटरोगस्य हेतुः भवितुं शक्नोति इति एतदर्थं न्यायालये दीर्घकालं यावत् संघर्षः कृतः । अतः उपभोक्तृणां सुरक्षां सुनिश्चेतुं नियमानां विनियमानाम् आवश्यकता अस्ति ।

आगच्छन्तु एतेषां विषये विचारं कुर्याम

१. के ते विभिन्नाः विधयः सन्ति येषां द्वारा आपणेषु जनानां शोषणं भवितुं शक्नोति ?
२. स्वीयानुभवेषु कस्यचित् एतादृशस्य उदाहरणस्य विषये विचारं कुर्वन्तु यत्र भवन्तः एतद् अनुभूतवन्तः स्युः यत् आपणे वञ्चनं क्रियमाणम् आसीत् । कक्षायाम् अस्य चर्चां कुर्वन्तु ।
३. भवतां मते उपभोक्तृणां सुरक्षायै शासनस्य का भूमिका भवेत् ?

उपभोक्त्रान्दोलनम्

उपभोक्त्रान्दोलनस्य प्रारम्भः उपभोक्तृणाम् असन्तोषस्य कारणात् अभवत् यतो हि विक्रेतारः बहुषु अनुचितेषु व्यावसायिकव्यवहारेषु सम्मिलिताः भवन्ति स्म । आपणेषु उपभोक्तॄन् शोषणात् रक्षितुं कापि वैधानिकव्यवस्था नासीत् । दीर्घकालं यावत् यदि कश्चन उपभोक्ता केनचित् विशिष्टोत्पादेन अथवा आपणेन सन्तुष्टः न भवति स्म तर्हि सामान्यतः स तस्य उत्पादस्य क्रयणात् विरमति स्म अथवा तस्मात् आपणात् अग्रे क्रयणं न करोति स्म । एतद् मन्यते स्म यत् एतद् उपभोक्तुः उत्तरदायित्वम् अस्ति यत् कस्यचित् वस्तुनः अथवा सेवायाः क्रयणसमये स सावधानः भवेत् । संस्थाभिः भारते समस्तविश्वे च जनेषु बहुभिः वर्षैः जागरूकता उत्पादिता । अस्मात् वस्तूनां सेवानां च गुणवत्तासुनिश्चयस्य उत्तरदायित्वं विक्रेतृषु स्थापितम् ।

भारते सामाजिकबलरूपेण उपभोक्त्रान्दोलनस्य जन्म अनैतिकेभ्यः एवं च अनुचितेभ्यः व्यवसायकार्येभ्यः उपभोक्तृणां हितानि रक्षितुम् एवं च प्रोत्साहनस्य आवश्यकतया सह अभवत् । अत्यधिका खाद्यन्यूनता अवैधसंचयः अवैधवाणिज्यं खाद्यपदार्थेषु एवं च खाद्यतैलेषु मिश्रणम् इति एतैः कारणैः १९६०तमे दशके व्यवस्थितरूपेण उपभोक्त्रान्दोलनस्य उदयः अभवत् । १९७०तमं दशकं यावत् उपभोक्तृसंस्थाः बृहत्स्तरे उपभोक्त्रधिकारैः सम्बद्धानाम् आलेखानां लेखनस्य एवं च प्रदर्शन्याः आयोजनकार्यं कर्तुम् आरब्धवत्यः । ताभिः मार्गयात्रिपरिवहने अत्यधिकजनसम्मर्दक्षेत्रेषु एवं च अन्नवितरणापणेषु जायमानानि अनुचितकार्याणि नियन्त्रयितुम् उपभोक्तृदलं विरचितम् । सद्यः एव भारते उपभोक्तृदलानां संख्या महता प्रमाणेन वर्धिता अस्ति ।

उपभोक्ता अन्ताराष्ट्रियः

१९८५तमे वर्षे संयुक्तराष्ट्रेण उपभोक्तृसुरक्षायै संयुक्तराष्ट्रस्य दिशानिर्देशाः अङ्गीकृताः । एतद् उपभोक्तृणां सुरक्षायै उपयुक्तविधीनाम् अङ्गीकरणस्य हेतोः राष्ट्राणां कृते एवं च एवं कर्तुं निजशासनानां सुदृढीकरणस्य हेतोः "उपभोक्तुः कृते अधिवादकर्ता समूहः" इत्यस्य कृते किञ्चन आयुधम् आसीत् । अन्ताराष्ट्रियस्तरे एतद् उपभोक्त्रान्दोलनस्य आधारः संजातः । अद्य उपभोक्ता अन्ताराष्ट्रियः ११५तः अपि अधिकानां देशानां २२०संस्थानां संरक्षकसंस्थारूपेण जातः अस्ति ।

एतेषां सर्वेषां प्रयासानां परिणामस्वरूपम् एतद् आन्दोलनं बृहत्स्तरे उपभोक्तृणां हितानां विरोधे एवं च अनुसूचितव्यवसायशैल्याः परिष्काराय व्यावसायिकसमवायानाम् अथ च शासनस्य उपरि प्रभावं स्थापयितुं सफलम् अभवत् । १९८६तमे वर्षे भारतशासनद्वारा कश्चन महान् पदक्षेपः उत्थापितः । एतद् उपभोक्तृसुरक्षाधिनियमः १९८६ इत्यस्य निर्माणम् आसीत् । अयम् अधिनियमः COPRA इति नाम्ना प्रसिद्धः अस्ति । भवन्तः COPRA इत्यस्य विषये अग्रे पठिष्यन्ति ।

आगच्छन्तु एतेषां विषये विचारं कुर्याम ---

१. उपभोक्तृदलानां द्वारा के के उपायाः अङ्गीकर्तुं शक्यन्ते ?

२. यद्यपि नियमाः एवं च विधयः सन्ति तथापि तेषाम् अनुपालनं किमर्थं न भवति ? विचारं विमर्शं च कुर्वन्तु ।

उपभोक्त्रधिकारः

सुरक्षा सर्वेषाम् अधिकारः अस्ति

रेजीमेथ्योः कष्टम्

रेजीमेथ्युः नामकः नवमकक्षायाः कश्चन स्वस्थबालकः केरलस्य कस्मिंश्चित् निजचिकित्सालये टॉन्सिलिनिष्कासनार्थं प्रविष्टः । केनचित् नेत्रनासिकाकण्ठचिकित्सकेन सामान्यमूर्च्छायाः औषधं दत्त्वा टॉन्सिलनिष्कासनाय शल्यचिकित्सा कृता । अनुचितमूर्च्छनात् रेजीमेथ्यौ मानसिकासामान्यतायाः लक्षणानि उत्पन्नानि यस्मात् कारणात् आजीवनं स विकलाङ्गः जातः ।

तस्य सेवाकाले चिकित्सायां त्रुटिः अनवधानता च कृता इति कारणात् राज्योपभोक्तृविवादनिवारणसमितौ ५००००० रूप्यकाणां क्षतपूर्तेः स्वामत्यम् अकरोत् । साक्ष्याणि पर्याप्तानि न सन्ति इति उक्त्वा राज्यसमित्याप्रकरणंप्रत्याख्यापितम्। रेजीमेथ्योः पितादिल्लीस्थितेराष्ट्रिय-उपभोक्तृविवादनिवारणसमितौ पुनः निवेदनम् अकरोत् । प्रकरणान्वीक्षणस्य पश्चात् राष्ट्रियसमित्या चिकित्सालयः चिकित्सायाम् अनवधानतायाः दोषी प्राप्तः अथ च अर्थपूर्तिं दातुं निर्दिष्टः ।

रेजीमेथ्योः व्यथा प्रमाणीकरोति यत् कथं कस्मिंश्चित् चिकित्सालये चिकित्सकानां कर्मचारिणां च द्वारा मूर्च्छने अनवधानता कृता इति कारणात् कश्चन छात्रः आजीवनं विकलाङ्गः जायते। यदा वयम् उपभोक्तृरूपेण बहूनां वस्तूनाम् एवं च सेवानाम् उपयोगं कुर्मः तदा अस्माकं पार्श्वे वस्तूनां विपणीकरणस्य एवं च सेवानां प्राप्तेः विरोधे सुरक्षिताः भवितुम् अधिकारः भवति । यतो हि एते जीवनाय अथ च सम्पत्तये संकटकराः भवन्ति । उत्पादकानां कृते आवश्यकम् अस्ति यत् ते सुरक्षायाः नियमानां विनियमानां च पालनं कुर्युः । एतादृशानि बहूनि वस्तूनि सेवाः च सन्ति येषां वयं क्रयणं कुर्मः चेत् सुरक्षादृष्ट्या विशेषम् अवधानम् आवश्यकं भवति । उदाहरणार्थं प्रेशरकूकर इति अस्मिन् सेफ्टीवॉल्व इति भवति । यदि एतद् विकृतं भवति तर्हि भयङ्करदुर्घटनायाः कारणं भवितुं शक्नोति ।'सुरक्षां छिद्रम्' (safty valve) यः निर्माति सः तस्य गुणवत्तां सुनिश्चित्तां कुर्यात्। भवन्तः सार्वजनिकीम् अथवा सर्वकारीयां कार्ययन्त्राणि दृष्ट्वा सुनिश्चितं कुर्वन्तु । यत्, गुणवत्तायाः पालनं कृतम् अथवा न तथापि विपण्यां निम्नगुणवत्तायुक्ताः उत्पादाः लभ्यन्ते, कारणम् एतेषां नियमानां पर्यवेक्षणम् उचितरूपेण न भवति, तथैव उपभोक्ता – आन्दोलनम् अपि समर्थं नास्ति।

आगच्छन्तु एतेषां विषये विचारं कुर्याम –

१. निम्नलिखितानाम् उत्पादानाम् अथवा सेवानां (भवन्तः सूचौ नूतनं नाम योजयितुं शक्नुवन्ति) विषये चर्चां कुर्वन्तु यत् एतेषु उत्पादकैः केषां सुरक्षानियमानां पालनं करणीयम् ?

(क) एल.पी.जी.वातिभाण्डम् (ख) चलचित्रगृहम् (ग) क्रीडामण्डलम् (सर्कस) (घ) औषधानि

(च) खाद्यतैलम् (छ) विवाहमण्डपम् (ज) उन्नतं भवनम् ।

२. स्वपरितः विद्यमानेषु स्थलेषु जनैः सह घटितायाः तादृशायाः दुर्घटनायाः अथवा उपेक्षायाः विषये अन्वेषणं कुर्वन्तु ,यस्याः घटनायाः दायित्वम् उत्पादकस्य अस्ति इति भवन्तः चिन्तयन्ति , विचारविमर्शं कुर्वन्तु ।

वस्तूनां सेवानां च विषये संज्ञानम्

यदा भवन्तः किञ्चित् वस्तु क्रेतुं गच्छन्ति, तदा तस्य वस्तुनः उपरि काश्चन सूचनाः लिखिताः भवन्ति। वस्तूनां घटकानि, मूल्यं, गणसङ्ख्या, निर्माणस्य दिनाङ्कः समाप्तेः दिनाङ्कः निर्मातुः सङ्केतः च इत्यादीनां विषये एताः सूचनाः भवन्ति ।उदाहरणाय यदा वयं किञ्चित् औषधं क्रीणीमः तदा, तस्य औषधस्य उपयोगः कथं करणीयः?, तस्य प्रयोगस्य प्रभावस्य तथा च हानेः विषये ज्ञानं प्राप्नुमः। एवमेव भवन्तः वस्त्रं क्रीणन्ति चेत् प्रक्षालनस्य निर्देशान् प्राप्नुवन्ति।

किमर्थम् एते नियमाः कृताः इति चेत् , वस्तूनाम् उत्पादकेन एताः सूचनाः दातव्याः भवन्ति। एवम् उच्यते यत् उपभोक्ता / ग्राहकः यानि वस्तूनि क्रीणाति तासां वस्तूनां सेवानां च विषये सूचनाः प्राप्तुं तस्य अधिकारः अस्ति, तदैव, उपभोक्ता वस्तु दूषितम् अथवा सदोषम् अस्ति चेत् आक्षेपं (शिकायत) कर्तुं शक्नोति। धनं प्रतिप्राप्तुं वस्तु परिवर्तयितुं वा अभियाचनां कर्तुं शक्नोति। एतत् अधिकतमेन न्यूनांशेन मूल्येन (MRP) निर्धारितम् अस्ति। वस्तुतः क्रेतारः विक्रेतारम् अधिकतमस्य अल्पांशस्य मूल्यस्य अपेक्षया न्यूनमूल्येन वस्तु ददातु इति अनुरोधं कर्तुं शक्नुवन्ति।

प्रदत्तानां विविधानां सेवानाम् उचितोपयोगाय सर्वकारेण ग्राहकानां सूचनाधिकाराः विस्तारिताः। पञ्चाधिकद्विसहस्रतमे वर्षे अक्टोबरमासे 'सूचनाधिकाराः' इति नाम्ना विधिः पारितः। येन विधिना नागरिकाः सर्वकारीयानां विभागानां कार्याणां सूचनाः प्राप्तुम् अधिकारिणः भवन्ति। "सूचनाधिकारः" इति विधेः प्रभावं वयं निम्नलिखिताभिः घटनाभिः अवगच्छामः ।

प्रतीक्षा

काचित् अभियन्तृस्नातिका युवतिः, नाम अमृता सा अभियन्तृवृत्तिं प्राप्तुं प्रमाणपत्राणि अपि च साक्षात्कारं दत्तवती तथापि सर्वकारपक्षतः कोऽपि परिणामः न प्राप्तः। सर्वकारस्य कर्मचारिभिः अपि सम्यक् उत्तरं न उक्तम् । तदा सा "सूचनाधिकाराः" इति विधेः प्रयोगेण एकं प्रार्थनापत्रं दत्तवती, 'योग्यसमये परिणामस्य सूचनां प्राप्तुं मम अधिकारः आसीत् येन भविष्यत्कालस्य योजनां कर्तुं शक्नुयाम्' इति तस्मिन् पत्रे लिखितम् । कैः कारणैः परिणामे विलम्बः जातः इति असूचयित्वा तस्यै नियुक्तिपत्रं प्रेषितम्, यतः सा उत्तमतया साक्षात्कारं दत्तवती आसीत्।

आगच्छन्तु एतेषां विषये विचारं कुर्याम ----

१. वस्तूनां क्रयणसमये कदाचित् वयं पश्यामः यत्, तस्य वस्तुनः पोटलिकायां मुद्रितस्य मूल्यस्य अपेक्षया न्यूनम् अथवा अधिकं मूल्यम् अस्मभ्यं स्वीक्रियते। एतस्मिन् विषये चर्चा करणीया, ग्राहकसङ्घटना अस्मिन् विषये यत् किञ्चित् कर्तुं शक्नोति किम्?

२. भवन्तः पिहितपोटलिकायां यानि वस्तूनि भवन्ति तानि, अपि च तेषु भवन्तः यानि क्रेतुम् इच्छन्ति तानि स्वीकृत्य, तेषाम् उपरि लिखितसूचनानां परीक्षणं कृत्वा ताः कथम् उपयोगिन्यः सन्ति इति विचारयन्तु। किं भवन्तः चिन्तयन्ति यत् तेषां वस्तूना विषये इतोऽपि अधिकाः सूचनाः भवेयुः याः तत्र न सन्ति? चर्चयन्तु।

३. नागरिकाणां समस्याः, यथा विस्खलिताः मार्गाः दूषितं जलं स्वास्थ्यसौकर्यं च इत्यादीनां समस्यानां विषये जनाः आक्षेपं कुर्वन्ति, किन्तु कोऽपि न शृणोति। इदानीं RTI सूचना – अधिकार – विधिः प्रश्नान् प्रष्टुम् अधिकारं ददाति। भवन्तः सहमताः वा? विचारं कुर्वन्तु।

चयनस्य अधिकारस्य उल्लङ्घनम्

धनं प्रतिदत्तम्

अंसारीनगरे अभिरामी इति अनया छात्रया देहल्यां पाठ्यक्रमं पठितुम् एकस्मिन् क्षेत्रीय – अध्यापन – संस्थाने नामाङ्कनं कृतम् । सा प्रवेशसमये एव वर्षद्वयार्थं ६१०२० रूप्यकाणि पूरितवती अल्पकाले एव सा अवगतवती यत् तत्रत्य पाठनस्य स्तरः नास्ति अतः सा प्रथमवर्षान्ते एव पाठ्यक्रमं त्यक्तुं निश्चितवती। अवशिष्टस्य वर्षस्य धनं याचितवती (प्रार्थितवती) च परन्तु संस्थानिकाः निराकृतवन्तः।

सा जिल्ला- उपभोक्ता- न्यायालये अभियोगं कृतवती। तदा न्यायालयेन २८००० रूप्यकाणि तस्यै प्रत्यार्पयितुंसंस्थायै आदेशः दत्तः। संस्थानेन अग्रे राज्यस्य उपभोक्ता आयोगे अभियोगः कृतः। राज्यस्य उपभोक्ता आयोगेन जिल्ला न्यायालयस्य निर्णयं सम्मानीकृत्य संस्थानस्य उपरि वृथा आक्षेपस्य निमित्तेन २५००० रूप्यकानां दण्डनं कृतम्, तथैव छात्रायै प्रतिदानम् अपि च याचिकायाः व्ययः ७००० रूप्यकाणि मिलित्वा दातुम् उक्तम्।

राज्यायोगेन छात्रेभ्यः अखिलाय वर्षाय धनम् अग्रिमं धनं (ad_ vance) च स्वीकर्तुं शैक्षणिकसंस्थाः व्यावसायिकसंस्थाः च निराकृताः।

आयोगानुसारम् एतस्य आदेशस्य उल्लङ्घनं कृतं चेत् दण्डनशुल्कं पूरणीयं भवेत्, तेन सह कारागृहम् अपि गन्तव्यं भवेत्।

यत्कोपि उपभोक्ता यः, यां कामपि सेवां प्राप्नोति सः वयोभेदं विना लिङ्गभेदं विना च सर्वदा यस्यां कस्यामपि सेवायां चयनाधिकारं प्राप्नुयात् इति अस्याः घटनायाः ज्ञायते। चिन्तयन्तु भवन्तः एकं दन्तधावनचूर्णम् इच्छन्ति किन्तु आपणिकः दन्तकूर्चेण सह एव दन्तधावनचूर्णं दीयते इति वदति।भवन्तः दन्तकूर्चं क्रेतुं न इच्छन्ति तर्हि भवतां **चयनस्य अधिकारस्य** उल्लङ्घन जातम् इति। एवमेव अन्यदेकम् उदाहरणं पश्यन्तु – भवन्तः यदा नूतनस्य अनिलकोषं स्वीकुर्वन्ति तदा तेन सह चुल्लिं क्रेतुम् अपि विक्रेता बाध्यं करोति। एतेन प्रकारेण बहुवारं यत् क्रेतुं वयं न इच्छामः तद् क्रेतुं बाध्याः भवामः। तदा भवतां समीपे चयनाय कोऽपि विकल्पः नभवति।

आगच्छन्तु एतेषां विषये विचारं कुर्याम --

अत्र अधः तेषां वस्तूनां विज्ञापनानि प्रलोभनाय दत्तानि सन्ति यानि वयं विपणितः क्रीणीमः। उपभोक्तारं लाभान्वितं कर्तुं सत्यमेव किमपि विज्ञापनम् अस्ति वा? इत्यस्मिन् विषये विमर्शात्मकीं चर्चां कुर्मः।

- प्रत्येकस्मिन् ५०० ग्राममितं बन्धे १५ ग्राममितम् अतिरिक्तं दीयते।
- वार्तापत्रिकायाः ग्राहकाः भवन्तु वर्षान्ते उपायनं प्राप्नुवन्तु च।
- अवघर्षणं कुर्वन्तु दशलक्षं प्राप्नुवन्तु च।
- ५०० ग्राममितस्य ग्लुकोज् करण्डके एकः क्षीरचाकलेहः।
- पोटलिकायाम् एकं स्वर्णनाणकम्।
- द्विसहस्ररूप्यकैः पादत्राणे क्रीणन्ति चेत् ५०० रूप्यकाणां पादत्राणे निःशुल्कं प्राप्येते।

एतैः ग्राहकैः न्यायार्थं कुत्र गन्तव्यम् ?

रैजी मैथ्यू अबिरामी च एतयोः घटनाः पुनः पठन्तु।एतानि तानि उदाहरणानि सन्ति येषु उपभोक्ता – अधिकाराणाम् अवहेलना कृता अस्ति। एतादृशाः घटनाः अस्माकं देशे सर्वदा घटन्ति एव। अस्यां स्थितौ न्यायार्थं कुत्र गन्तव्यम् ? अनुचितः क्रयविक्रयव्यवहारः शोषणं च एतयोः विरुद्धं क्षतिपूर्तिः अधिकारः उपभोक्तृणाम् अस्ति एव। यदि ग्राहकस्य क्षतिः भवति तर्हि क्षतेः परिमाणम् अनुसृत्य क्षतिपूर्तिं प्राप्तुं तस्य अधिकारः अस्ति। एतस्य कार्यस्य पूर्त्यर्थं काचित् सरला परिणामकारिणी च जनप्रणालिः आवश्यकी। उपभोक्ता स्वयम् उपयुक्त - उपभोक्ता - केन्द्रे अधिवक्त्रा सह अथवा अधिवक्तारं विना आक्षेपं कर्तुं शक्नोति। श्रीप्रकाशस्य उदाहरणेन वयं ज्ञातुम् शक्नुमः यत् कथं कश्चित् पीडितः क्षतिपूर्तिं प्राप्नुयात्। श्रीप्रकाशमहोदयः स्वस्य पुत्र्याः विवाहार्थं ग्रामं प्रति एकं धनादेशं प्रेषितवान्। यदा तस्य पुत्रै धनस्य आवश्यकता आसीत् तदा सा तत् न प्राप्तवती।बहूनां मासानाम् अनन्तरम् अपि धनं न प्राप्तम्।श्रीप्रकाशमहोदयः नव – देहल्याः जिल्लास्तरीयम् उपभोक्ता - न्यायालये अभियोगं कृतवान्।तेन तदर्थं यद् यद् कृतं तत् क्रमेण विस्तरेण च अधः लिखितमस्ति।

१. स्वपुत्र्यै धनादेशं प्रेषयितुं पत्रालयं गतवान्।

२. पुत्री धनं न प्राप्तवती इति सः ज्ञातवान्।

3. पत्रालये प्रकाशः धनादेशस्य विषये विचारितवान्।

मनीआर्डर, पोस्टल आर्डर, रजिस्टी, वी पी सी पत्र, पार्सल, स्पी
MONEY ORDER, POSTAL ORDER, REGISTRATION, UPCLE
भारतीय डाक
हर ज़रूरत के लिए
INDIA POST
Money Personal Loan
Yes To Smiles

4. पत्रालये तस्य प्रश्नानां सन्तोषजनकम् उत्तरं न प्राप्तम्।

5. प्रकाशमहोदयः विमर्शार्थं क्षेत्रीय - उपभोक्ता - संरक्षण - परिषदं गच्छति।

6. प्रकाशमहोदयः समीपस्थम् उपभोक्ता न्यायालयम् अभियोगं लेखयितुं गच्छति कार्यालयात् पञ्जीकरणाय आवेदनपत्रं स्वीकरोति च। न्यायालयः अन्यं पक्षं प्रति सूचनां / व्यपदेशं प्रेषयति।


CONSUMER DISPUTES REDRESSAL FORUM II
GOVERNMENT OF DELHI
Udyog Sadan, C-22 & 23 Institutional Area,
Behind Qutab Hotel,
New Delhi-110016

REGISTERATION NO. 53/06 DATED:- 30.1.2006

Name of Complainant VED PRAKASH PANDEY, IGNOU, MAIDAN GARHI, NEW DELHI

Name of respondent (1) POST OFFICE, IGNOU, MAIDAN GARHI, NEW DELHI

(2)

(3)

Police Station MEHRAULI, NEW DELHI

Value Rs.4000/-

Subject DEFICIENCY IN SERVICE.

(Signature of complainant)

7. प्रकाशमहोदयः न्यायालये स्वयं तर्कवितर्कं करोति।

8. न्यायालयस्य न्यायाधीशः प्रमाणपत्राणां सत्यप्रमाणं करोति तथा च पीडितपक्षस्य विपक्षस्य च वितर्कं शृणोति।

9. न्यायाधीशः अन्तिमं निर्णयं श्रावयति।

भारते उपभोक्ता – आन्दोलनेन विभिन्नानि सङ्घटनानि जातानि। उपभोक्ता न्यायालयः अथवा उपभोक्ता संरक्षण – परिषद् इति नामभिः तानि प्रसिद्धानि न्यायालये अभियोगः कथं करणीयः? इत्यस्मिन् प्राप्नुवन्ति विषये तानि सङ्घटनानि मार्गदर्शनं कुर्वन्ति एतादृशानि स्वयंसेविनि सङ्घटनानि जनतायां जागरूकताम् उत्पादयितुं सर्वकारात् अधिकं साहाय्यं प्राप्नुवन्ति।

आवासीये सहनिवासे (उपनिवेशे) ये वसन्ति ते जानन्ति यत् तत्र 'निवासि - कल्याण - सङ्घम्' इति एकं फलकं भवति। यदि तेषां सदस्येषु कस्मिंश्चित् सदस्ये अनुचितः आक्षेपः भवति तर्हि सा संस्था तस्य निर्वहणं करोति।

'कोपरा' इति विधेः अन्तर्गतम् उपभोक्ता वादविवादानां न्यायार्थं जिल्लास्तरे राज्यस्तरे राष्ट्रस्तरे च एका त्रिस्तरीया न्यायिकयन्त्रणा संस्थापिता अस्ति। २० लक्षपर्यन्तं क्षतिपूर्तिराशिसम्बन्धितान् अभियोगान् जिल्लास्तरीयः न्यायालयः निर्वहति। राज्यस्तरीयः न्यायालयः यः 'राज्य - आयोगः' इति नाम्ना अपि ख्यातः अस्ति। सः २० लक्षतः एककोटिपर्यन्तं क्षतिपूर्तिराशिविषयकान् अभियोगान् निर्वहति। राष्ट्रिय-न्यायालयःअथवा राष्ट्रिय – आयोगः एकलक्षस्य उपरि क्षतिपूर्तिराशिसम्बन्धितान् अभियोगान् पश्यति।

यदा कश्चित् अभियोगःजिल्लास्तरीये न्यायालये अयोग्यः इति मन्यते तदा उपभोक्ता राज्यस्तरीयन्यायालये तदनन्तरं राष्ट्रस्तरीये न्यायालये पुनरावेदनं कर्तुं शक्नोति।

एवं प्रकारेण एतेन अधिनियमेन उपभोक्तारूपेण उपभोक्ता न्यायालये प्रतिनिधित्वस्य अधिकारं दत्त्वा वयं समर्थाः कृताः।

आगच्छन्तु एतेषां विषये विचारं कुर्याम ----

निम्नलिखितान् बिन्दुन् उचितक्रमेण लिखन्तु -

(क) अरिता जिल्ला – उपभोक्ता- न्यायालये अभियोगं करोति।

(ख) सा आक्षेपं कर्तुं तत् सम्बन्धितव्यक्तिना मिलति।

(ग) आपणिकेन दोषयुक्ता सामग्री तस्यै दत्ता इति सा अवगच्छति।

(घ) सा न्यायालयीनेषु कार्येषु भागं गृह्णाति।

(ङ) सा शाखाकार्यालयं गत्वा विक्रेतुः विरुद्धम् आक्षेपपत्रं लेखयति।
किन्तु कोऽपि उपयोगः न अभवत्।

(च) न्यायालयस्य सम्मुखे देयकं (bill) प्रमाणत्वं (warranty) प्रस्तौतुं सा उक्ता।

(छ) सा अल्पांशविक्रेतुः (खुदरा विक्रेता) एकां भित्तिघटीं क्रीतवती।

(ज) केषुचित् मासेषु न्यायालयेन विक्रेत्रे आदेशः दत्तः यत् तस्याः पुरातनघट्याः स्थले अतिरिक्तस्य मूल्यस्य स्वीकृतिं विना नूतना घटी दीयेत।

जागरूक – उपभोक्ता भवितुम् आवश्यकानि कार्याणि

यदा वयं वस्तूनां सेवानां च क्रयणसमये उपभोक्तारूपेण स्वाधिकारान् प्रति जागृताः भवामः (भविष्यामः) तदा एव उत्तमानुत्तमयोः भेदं कर्तुम् अपि च श्रेष्ठस्य चयनं कर्तुं सक्षमाः भविष्यामः। निपुणता ज्ञानं च अस्ति चेत् एका व्यक्तिः जागरूकः उपभोक्ता भवति। वयं स्वस्य अधिकाराणां विषये सतर्काः कथं भवेम? निम्नलिखितं पृष्ठं पूर्वतनानानां पृष्ठानां विज्ञापनानि पश्यन्तु भवन्तः किं चिन्तयन्ति?

कोप्रा (COPRA) (उपभोक्ता संरक्षणं विधिः)अधिनियमेन केन्द्रे राज्यसर्वकारेषु च उपभोक्ताविषयकानां घटनानां कृते पृथक् पृथक् विभागानां स्थापनार्थं मुख्यभूमिकायाः वहनं कृतम् अस्ति।

यद् विज्ञापनं वयं दृष्टवन्तः तद् एकम् उदाहरणम् अस्ति, येन सर्वकारः विधिप्रक्रियायाः विषये नागरिकान् अवगमयति यस्य विधेः प्रक्रियायाः ते उपयोगं कर्तुं शक्नुयः। भवन्तः दूरदर्शने अपि एतादृशानि उदाहरणानि दृष्टवन्तः स्युः।

आय्.एम्.आय्.एग्मार्क् च

वस्तूनां क्रयणसमये पोटलिकायां लिखितानि आय्. एस्. आय् एग्मार्क होल्मार्क् इत्यादीनां 'शब्दचिह्नम्' दृष्टवन्तः स्युः। यदा कश्चित् उपभोक्ता वस्तूनि अथवा सेवाः क्रीणाति। ताः एतानि शब्दचिह्नानि प्रमाणकचिह्नानि च वस्तूनां गुणवत्तायाः विश्वासम् उत्पादयितुं साहाय्यं कुर्वन्ति। यानि सङ्घटनानि अनुवीक्षणम् अपि च प्रमाणपत्राणि यच्छन्ति तानि सङ्घटनानि उत्पादकान् श्रेष्ठायाः गुणवत्तायाः पालनार्थं एतेषां शब्दचिह्नानां प्रयोगाय अनुमतिं यच्छति।

यद्यपि एतानि सङ्घटनानि बहूनाम् उत्पादनानां कृते मानदण्डं विकासयति तथापि सर्वैः उत्पादकैः एतेषां मानदण्डानां पालनम् अनिवार्यं नास्ति। एल्. पि.जि.अनिल्कोषाः खाद्यवर्णाः अपि च तेषु प्रयुक्ता सामग्री वज्रचूर्णं (ce_ment) पिहितकूपीषु पेयजलम् इत्यादीनि उत्पादनानि उपभोक्तृणां सुरक्षा तथा च स्वास्थ्यसम्बन्धितानि न केवलं तावत् अपि तु एतेषाम् उपयोगः महता प्रमाणेन क्रियते। अतः उत्पादकाः अनिवार्यतया एतेषां वस्तूनां कृते सेवानां कृते च सङ्घटनेभ्यः प्रमाणपत्रं प्राप्नुयुः।



आगच्छन्तु एतेषां विषये विचारं कुर्याम ----

१. अस्मिन् अध्याये विद्यमानेषु लिखितानि व्यङ्ग्यचित्राणि पश्यन्तु । भवान् एकः उपभोक्ता इति दृष्टिकोणेन किञ्चित् वस्तुसम्बन्धितं विभिन्नान् विषयान् अधिकृत्य चर्चां कुर्वन्तु। तत् सम्बन्धितम् एकं भित्तिफलकं च निर्मान्तु ।

२. स्वस्य स्थलस्य समीपस्थस्य न्यायालयस्य विषये अवगच्छन्तु ।

३. उपभोक्ता संरक्षण – परिषद् उपभोक्ता- न्यायालयः च एतयोः मध्ये कः भेदः अस्ति ।

४. १९८६ तमे वर्षे पारितः उपभोक्ता सुरक्षा अधिनियमः एकस्य उपभोक्तुः कृते निम्नलिखितान् अधिकारान् प्रददाति ।

(क) चयनस्य अधिकारः
(ख) सूचनायाः अधिकारः
(ग) निवारणस्य अधिकारः
(घ) प्रतिनिधित्वस्य अधिकारः
(च) सुरक्षायाः अधिकारः
(छ) उपभोक्त्रे शिक्षणस्य अधिकारः (उपभोक्ता शिक्षणाधिकारः)

निम्नलिखिताः घटनाः तेषां पुरतः विद्यमानेषु आवरणेषु भिन्नं भिन्नं शीर्षकं चिह्नं च लिखित्वा श्रेणीबद्धं कुर्वन्तु ।

(क) नूतनतया क्रीतेन समीकरणयन्त्रेण लता विद्युताघातं प्राप्तवती सा तत्क्षणे आपणं गत्वा आपणिकम् आक्षेपम् उक्तवती ।

(ख) गतेभ्यः केभ्यश्चित् मासेभ्यः जोन् एम्. टि.एन्.एल्./बि.एस्.एन्.एल्./टाटा इण्डिकाम् इत्यादिभिः संस्थाभिः दत्तसेवाभिः असन्तुष्टः अस्ति सः 'जिल्लास्तरीये उपभोक्ता वाक्पीठे(फ़ोरुम्)' अभियोगं कृतवान् ।

(ग) भवता मित्रेण एकम् औषधं क्रीतम् यस्य समाप्तिदिनाङ्कः अतीतः अभियोगं कर्तुं भवता सः प्रेरितः (उपदिष्टः)।

(घ) इक्बाल् यस्य कस्यापि वस्तुनः क्रयणात् पूर्वं तस्य वस्तुनः उपरि विद्यमानाः सूचनाः परीक्षते / परिशीलयति।

(च) भवन्तः भवतां क्षेत्रे केबल् ओपरेटर् द्वारा दत्तसेवाभिः असन्तुष्टः सन्ति किन्तु भवतां समीपे कोऽपि विकल्पः नास्ति ।

(छ) आपणिकेन दोषयुक्ता छायाचित्रग्राहिणी दत्ता इति भवन्तः मन्यन्ते तदर्थं भवन्तः मुख्यकार्यालये तीव्रतया (दृढतया) आक्षेपं कर्तुं शक्नुवन्ति ।

५. यदि मानकं वस्तूनां गुणवत्तायाः निश्चयं करोति तर्हि किमर्थं आय्. एस्. आय्. अथवा एग्मार्क प्रमाणनं विना विपण्यां बहूनि वस्तूनि उपलभ्यन्ते?

६. होल्मार्क् अथवा आय्.एस्.आय्. इति एतेषां प्रमाणानं ये उपलब्धं कारयन्ति तेषां विषये संज्ञानं प्राप्नुवन्तु ।

उपभोक्ता आन्दोलनम् अग्रे नेतुम्

डिसेम्बर् मासस्य २४ दिनाङ्कः राष्ट्रिय – उपभोक्ता दिनम् इति आचर्यते। १९८६ तमे वर्षे अस्मिन् दिने एव भारतस्य संसदि 'उपभोक्ता-संरक्षण-अधिनियमः' पारितः। येषु देशेषु उपभोक्तासम्बन्धितानां समस्यानां निवारणाय विशिष्टः न्यायालयः अस्ति तेषु भारतम् अपि एकः देशः अस्ति। भारते उपभोक्ता आन्दोलनेन

सङ्घटितसमूहानानां सङ्ख्या अपि च तेषां कार्यप्रक्रियानां विषये किञ्चित् विकासः जातः अस्ति। अद्य देशे सप्तशताधिकानि उपभोक्ता- सङ्घटनानि सन्ति। तेषु २०-२५ स्वकार्याय पूर्णसङ्घटितानि मान्यताप्राप्तानि च सन्ति तथापि, उपभोक्ता निवारण प्रक्रिया जटिला व्ययकारिणी दीर्घकालिकी च दृश्यते। बहुधा उपभोक्तृभिः अधिवक्तृणाम् अवलम्बनं करणीयं भवति ।



न्यायालयीनप्रक्रियाम् अभियोगानाम् अन्तर्भावं भूत्वा तेषाम् अग्रे गमनाय विलम्बः भवति । बहुशः क्रयणसमये देयकम् अथवा प्राप्तिपत्रं न दीयते तस्यां स्थितौ प्रमाणानां सङ्ग्रहणं कठिनं भवति। एतत् विहाय बहवः क्रेतारः पादपथात् अथवा लघुभ्यः आपणेभ्यः क्रयणं कुर्वन्ति।

दोषयुक्तैः उत्पादनैः पीडितानां कृते दातव्यायाः क्षतिपूर्तेः विषये इदानीन्तनः विधिः अस्पष्टः अस्ति। 'कोप्रा' अधिनियमस्य २५ वर्षाणाम् अनन्तरमपि भारते उपभोक्ता ज्ञानं मन्दं मन्दं प्रसरत् अस्ति।

श्रमिकानां हितानां रक्षणाय विधयः सन्ति चेदपि सामान्यतः असङ्घटितक्षेत्रेषु ते दुर्बलाः सन्ति।
एवमेव विपणिषु कार्यं कर्तुमपि नियमानां विनियमानां वा पालनं न भवति ।

तथापि स्वस्य भूमिकां महत्त्वं च उपभोक्तारः अवगच्छेयुः उपभोक्तृणाम् आन्दोलने सक्रियः सहभागः उपभोक्ता - आन्दोलनं सक्रियं करोति इति सर्वदा उच्यते। एतदर्थं स्वेच्छा प्रयत्नः सर्वेषां सहभागयुक्तस्य सङ्घर्षस्य च आवश्यकता अस्ति ।

अभ्यासः

१. किमर्थं विपण्यां नियमानां विनियमानां च आवश्यकता अस्ति ? उदाहरणैः स्पष्टीकुर्वन्तु ।
२. भारते कैः कारणैः उपभोक्ता आन्दोलनस्य आरम्भः जातः एतस्य विकासस्य विषये अन्वेषणं कुर्वन्तु ।
३. उपभोक्तुः जागरणस्य आवश्यकताम् उदाहरणद्वयेन वर्णयन्तु ।
४. उपभोक्तृणां शोषणाय कारणीभूतानां कारकानां (कार्यं करोति इति)विषये चर्चां कुर्वन्तु ।
५. १९८६ तमे वर्षे उपभोक्ता-सुरक्षा-अधिनियमस्य निर्माणस्य आवश्यकता किमर्थम् आपतिता?
६. यदा उपभोक्ता स्वक्षेत्रस्य विपणिं गच्छति तदा केषां कर्तव्यानां पालनं कुर्यात्? वर्णयन्तु।
७. भवन्तः मधुनः एकां कूपीं सुपिष्टस्य एकं पुटकं च क्रीणन्ति इति चिन्तयन्तु क्रयणसमये भवन्तः किं शब्दचिह्नम् अथवा प्रमाणनं पश्येयुः? किमर्थम्?
८. भारत्ते उपभोक्तॄन् समर्थान् कर्तुं सर्वकारपक्षतः के विधेः मानदण्डाः अनुसरणीयाः?
९. उपभोक्तृणां कांश्चन अधिकारान् उक्त्वा प्रत्येकम् अधिकारम् अधिकृत्य कानिचन वाक्यानि लिखन्तु ।
१०. उपभोक्तारः तेषां एकतायाः प्रदर्शनं कथं कर्तुं शक्नुवन्ति?
११. भारते उपभोक्ता – आन्दोलनस्य प्रगतेः समीक्षां कुर्वन्तु
१२. निम्नलिखितान् बिन्दुन् सुयोजितं कुर्वन्तु।

(1) एकस्य उत्पादनस्य घटकानां विवरणम्	(क) सुरक्षायाः अधिकारः
(2) एग्मार्क्	(ख) उपभोक्ता – आक्षेपानां सम्बन्धः
(3) स्कुटर्याने दोषयुक्तस्य यन्त्रस्य कारणेन दुर्घटना	(ग) धान्यानां खाद्यतैलानां च प्रमाणम्
(4) जिल्ला उपभोक्ता न्यायालयं विकसितं करोति अन्तर्राष्ट्रियसंस्था इति अभिकर्तृप्रदेशः (agency)	(घ) उपभोक्ता कल्याणसङ्घटनानां
(5) उपभोक्ता अन्तर्राष्ट्रियम्	(ङ) सूचनानाम् अधिकारः
(6) भारतीयः मानकविभागः (ब्युरो)	(च) वस्तूनां कृते सेवानां कृते च मानकम्

१३. उचितम् अथवा अनुचितम् इति लिखन्तु।

(क) कोप्रा नियमः केवलं वस्तूनां विषये युज्यते।

(ख) विश्वे येषु देशेषु उपभोक्तॄणां समस्यानां निवारणाय न्यायालयः अस्ति तेषु भारतमपि एकम् अस्ति।

(ग) तस्य शोषणम् अभवत् इति उपभोक्ता यदा मन्यते तदा सः निश्चयेन जिल्ला उपभोक्ता न्यायालये अभियोगं कुर्यात्।

(घ) यदा आधिका आर्थिकी हानिः भवेत् तदा एव जिल्ला उपभोक्ता न्यायालयं प्रति गमनं लाभप्रदं भवेत्।

(ङ) होल्मार्क् आभूषणानां गुणवत्तां संरक्षितुं प्रमाणम् अस्ति।

(च) उपभोक्ता – समस्यानां निवारणप्रक्रिया सरला वेगयुक्ता च अस्ति।

(छ) उपभोक्ता क्षतिपूर्तिराशिं प्राप्तुम् अधिकारी अस्ति सा राशिः क्षतेः परिमाणे निर्भरा अस्ति।

अतिरिक्ताः परियोजनाः/कार्यकलापाः

१. भवतां विद्यालयः उपभोक्ता जागरूकता सप्ताहम् आयोजयति उपभोक्ता जागरूकता वाक्पीठम् इत्यस्य सचिवरूपेण सर्वेषाम् उपभोक्ताधिकाराणां बिन्दुनाम् अन्तर्भावं कृत्वा फलकं निर्मान्तु। एतदर्थं चतुरशीतितमे पञ्चाशीतितमे पुटे च दत्तेषु विज्ञापनेषु विचारान् सङ्केतान् च भवन्तः उपयोक्तुं शक्नुवन्ति। एतत् कार्यम् आङ्लशिक्षकस्य साहाय्येन कुर्वन्तु।

२. श्रीमती कृष्णा एकं वर्णदूरदर्शनं क्रीतवती। तस्य प्रमाणत्वं (warranty) षण्मासात्मकम् आसीत्।किन्तु मासत्रये एव दूरदर्शनं निष्क्रियं जातम् यदा तस्मिन् आपणे आक्षेपः कृतः तदा दूरदर्शनं सम्यक् कर्तुम् आपणिकः एकम् अभियन्तारं प्रेषितवान्। दूरदर्शनं मुहुर्मुहुः निष्क्रियं भवति स्म। कृष्णायाः आपणे कृतस्य आक्षेपानाम् अपि उत्तरं न प्राप्यते स्म। अतः सा निर्णयं कृतवती यत् तस्य क्षेत्रस्य उपभोक्ता वाक्पीठे आक्षेपं करोमि इति। भवन्तः तां प्रति एकं पत्रं लिखन्तु लेखनात् पूर्वं भवन्तः सहयोगिभिः अथवा समूह सदस्यैः सह चर्चां कर्तुं शक्नुवन्ति।

३. स्वविद्यालये उपभोक्तागोष्ठ्याः आयोजनं कुर्वन्तु अनुकृता (बनावटी) उपभोक्ता जागरूकता कार्यशाला आयोजनीया। तस्यां कार्यशालायां विद्यालयस्य क्षेत्रे विद्यमानानां पुस्तककेन्द्राणां भोजनालयानां आपणानां च नियन्त्रणम् एतादृशान् प्रस्तावान् अन्तर्भावयन्तु।

४. आकर्षकघोषणायुक्तविज्ञापनानां निर्माणं कुर्वन्तु।

- जागरूकः उपभोक्ता एव सुरक्षितः उपभोक्ता भवति।
- ग्राहक! जागरूको भव।
- सचेतः उपभोक्ता।
- स्वाधिकारान् अभिजानन्तु /अवगच्छन्तु।
- उत्तिष्ठत! जाग्रत! अपि च तावत् पर्यन्तं स्थगनं मास्तु ----------(पूरयन्तु)

५. स्वस्य परितः विद्यमानानां चतुर्पञ्चजनानां साक्षात्कारं कुर्वन्तु यत् ते कथं शोषिताः जाताः? इति तेषां प्रतिक्रियाः अनुभवान् च सङ्गृह्णन्तु ।

६. निम्नलिखितायाः प्रश्नावलेः वितरणं कृत्वा स्वक्षेत्रस्य सर्वेक्षणं कुर्वन्तु जानन्तु च यत् जनाः उपभोक्तारूपेण कियता प्रमाणेन जागरूकाः सन्ति इति।

प्रत्येकं प्रश्नस्य कृते कस्यचित् एकस्य पर्यायस्य चिह्नाङ्कनं कुर्वन्तु ।

१. यदा भवन्तः किञ्चित् वस्तु क्रीतवन्तः तदा प्राप्तिपत्रस्य अथवा देयकस्य याचनां कृतवन्तः वा?

२. प्राप्तिपत्रं सुरक्षितं स्थापितं वा?

३. यदा भवन्तः आपणिकेभ्यः वञ्चिताः जाताः तदा आक्षेपं कृतवन्तः वा?

४. भवन्तः वञ्चिताः जाताः इति ज्ञापयितुं भवन्तः सफलाः जाताः वा?

५. किं भवन्तः आत्मानम् एवं बोधयित्वा सन्तुष्टाः भवन्ति यत् 'अहं मम दौर्भाग्येण एव वञ्चितः भवामि अत्र नूतनं किमपि नास्ति' ? इति।

६. भवन्तः आय्.एस्.आय्.,चिह्नं ,समाप्तिदिनाङ्कः इत्यादीनां परिशीलनं कुर्वन्ति ?

७. यदि समाप्तिदिनाङ्कः केवलम् एकस्य मासस्य अन्तरेण अस्ति अथवा तस्य समीपे अस्ति , तर्हि नूतनस्य वस्तुनः याचनां कुर्वन्ति अथवा न?

८. किं नूतनस्य अनिलकोषस्य वार्तापत्रिकानां वा क्रयण – विक्रयणसमये भारस्य परिशीलनं कुर्वन्ति ?

९. यदा शाकविक्रेता वास्तविकस्य भारमानकानां स्थाने शिलाखण्डानाम् उपयोगं करोति तदा भवन्तः विरोधं कुर्वन्ति वा ?

१०. किम् अत्यधिकं प्रकाशमानवर्णयुक्तानां शाकानां विषये सन्देहः भवति ?

११. अङ्गलक्षणानाम् अथवा चिह्नानां ज्ञानं भवताम् अस्ति वा ?

१२. अधिकं मूल्यम् उच्चगुणवत्तायाः मानकम् इति भवन्तः मन्यन्ते ?(एतेन कारणेन भवन्तः चिन्तयन्ति यत् भवन्तः अतिरिक्तं मूल्यं न दत्तवन्तः?)

१३. भवन्तः आकर्षकप्रस्तावेषु निःसङ्कोचं प्रतिक्रियां कुर्वन्ति वा?

१४. भवन्तः कस्यचित् वस्तुनः क्रयणार्थं यत् मूल्यं दत्तवन्तः। तस्य तुलनाम् अन्यैः दत्तेन मूल्येन सह कुर्वन्ति ?

१५. भवताम् आपणिकः भवादृशान् स्थायिनः ग्राहकान् कदापि न वञ्चयते इति भवन्तः विश्वसिन्ति वा?

१६. किं भवन्तः उचितभारादिन् शङ्काः विना उक्तसामग्रीणां गृहप्रापणस्य (home dilevary) समर्थनं कुर्वन्ति?

१७. आटोयानेन गमनसमये भवन्तः 'मीटर्' इति मानकेन गन्तुं प्रार्थयन्ते ?

टिप्पणी

(क) यदि ५,१२,१३,१५,१६ च एतेषां प्रश्नानाम् उत्तरं 'ग'तथा शेषाणाम् उत्तरं 'क' इति अस्ति, तर्हि भवन्तः जागरूकाः उपभोक्तारः इति वक्तुं शक्यते।

(ख) यदि ५,१२,१३,१५,१६ च इत्येषां प्रश्नानाम् उत्तरं 'क' अवशिष्टानां च 'ग' इति अस्ति तर्हि भवन्तः उपभोक्तृणाम् अधिकारविषये इतोऽपि जागरूकाः भवन्तु इति उच्यते ।

(ग) यदि सर्वेषां प्रश्नानां कृते भवताम् उत्तरं 'ख' इति अस्ति तर्हि भवन्तः आंशिकरूपेण जागरूकाः सन्ति इति।

परिशिष्टतालिका : किशोरबालिकानां (प्रथमः अध्यायः, तृतीया क्रिया, पृष्ठसंख्या – 13 शरीरस्य द्रव्यमानसूचक-तालिका

वर्षम्	मासः	कुपोषिता दुर्बला	सामान्या	कुपोषिता स्थूला
14	0	15.4 तः न्यूनम्	15.4 त:27.3	27.3 तः अधकिम्
14	1	15.5 तः न्यूनम्	15.5 त:27.4	27.4 तः अधकिम्
14	2	15.5 तः न्यूनम्	15.5 त:27.5	27.5 तः अधकिम्
14	3	15.6 तः न्यूनम्	15.6 त:27.6	27.6 तः अधकिम्
14	4	15.6 तः न्यूनम्	15.6 त:27.7	27.7 तः अधकिम्
14	5	15.6 तः न्यूनम्	15.6 त:27.7	27.7 तः अधकिम्
14	6	15.7 तः न्यूनम्	15.7 त:27.8	27.8 तः अधकिम्
14	7	15.7 तः न्यूनम्	15.7 त:27.9	27.9 तः अधकिम्
14	8	15.7 तः न्यूनम्	15.7 त:28.0	28.0 तः अधकिम्
14	9	15.8 तः न्यूनम्	15.8 त:28.0	28.0 तः अधकिम्
14	10	15.8 तः न्यूनम्	15.8 त:28.1	28.1 तः अधकिम्
14	11	15.8 तः न्यूनम्	15.8 त:28.2	28.2 तः अधकिम्
15	0	15.9 तः न्यूनम्	15.9 त:28.2	28.2 तः अधकिम्
15	1	15.9 तः न्यूनम्	15.9 त:28.3	28.3 तः अधकिम्
15	2	15.9 तः न्यूनम्	15.9 त:28.4	28.4 तः अधकिम्
15	3	16.0 तः न्यूनम्	16.0 त:28.4	28.4 तः अधकिम्
15	4	16.0 तः न्यूनम्	16.0 त:28.5	28.5 तः अधकिम्
15	5	16.0 तः न्यूनम्	16.0 त:28.5	28.5 तः अधकिम्
15	6	16.0 तः न्यूनम्	16.0 त:28.6	28.6 तः अधकिम्
15	7	16.1 तः न्यूनम्	16.1 त:28.6	28.6 तः अधकिम्
15	8	16.1 तः न्यूनम्	16.1 त:28.7	28.7 तः अधकिम्
15	9	16.1 तः न्यूनम्	16.1 त:28.7	28.7 तः अधकिम्
15	10	16.1 तः न्यूनम्	16.1 त:28.8	28.8 तः अधकिम्
15	11	16.2 तः न्यूनम्	16.2 त:28.8	28.8 तः अधकिम्
16	0	16.2 तः न्यूनम्	16.2 त:28.9	28.9 तः अधकिम्
16	1	16.2 तः न्यूनम्	16.2 त:28.9	28.9 तः अधकिम्
16	2	16.2 तः न्यूनम्	16.2 त:29.0	29.0 तः अधकिम्
16	3	16.2 तः न्यूनम्	16.2 त:29.0	29.0 तः अधकिम्
16	4	16.2 तः न्यूनम्	16.2 त:29.0	29.0 तः अधकिम्
16	5	16.3 तः न्यूनम्	16.3 त:29.1	29.1 तः अधकिम्
16	6	16.3 तः न्यूनम्	16.3 त:29.1	29.1 तः अधकिम्
16	7	16.3 तः न्यूनम्	16.3 त:29.1	29.1 तः अधकिम्
16	8	16.3 तः न्यूनम्	16.3 त:29.2	29.2 तः अधकिम्
16	9	16.3 तः न्यूनम्	16.3 त:29.2	29.2 तः अधकिम्
16	10	16.3 तः न्यूनम्	16.3 त:29.2	29.2 तः अधकिम्
16	11	16.3 तः न्यूनम्	16.3 त:29.3	29.3 तः अधकिम्
17	0	16.3 तः न्यूनम्	16.4 त:29.3	29.3 तः अधकिम्
17	1	16.4 तः न्यूनम्	16.4 त:29.3	29.3 तः अधकिम्
17	2	16.4 तः न्यूनम्	16.4 त:29.3	29.3 तः अधकिम्
17	3	16.4 तः न्यूनम्	16.4 त:29.4	29.4 तः अधकिम्
17	4	16.4 तः न्यूनम्	16.4 त:29.4	29.4 तः अधकिम्
17	5	16.4 तः न्यूनम्	16.4 त:29.4	29.4 तः अधकिम्
17	6	16.4 तः न्यूनम्	16.4 त:29.4	29.4 तः अधकिम्
17	7	16.4 तः न्यूनम्	16.4 त:29.4	29.4 तः अधकिम्
17	8	16.4 तः न्यूनम्	16.4 त:29.5	29.5 तः अधकिम्
17	9	16.4 तः न्यूनम्	16.4 त:29.5	29.5 तः अधकिम्
17	10	16.4 तः न्यूनम्	16.4 त:29.5	29.5 तः अधकिम्
17	11	16.4 तः न्यूनम्	16.4 त:29.5	29.5 तः अधकिम्
18	0	16.4 तः न्यूनम्	16.4 त:29.5	29.5 तः अधकिम्

परिशिष्टतालिका : कशिोरबालकानां (प्रथमः अध्यायः, तृतीया क्रयिा, पृष्ठसंख्या – 13 शरीरस्य द्रव्यमानसूचक-तालिका

वर्षम्	मासः	कुपोषतिः दुर्बलः	सामान्यः	कुपोषतिं स्थौल्यम्
14	0	15.5 तः न्यूनम	15.5 तः 25.9	25.9 तः अधकिम्
14	1	15.5 तः न्यूनम	15.5 तः 26.0	26.0 तः अधकिम्
14	2	15.6 तः न्यूनम्	15.6 तः 26.1	26.1 तः अधकिम्
14	3	15.6 तः न्यूनम्	15.6 तः 26.3	26.3 तः अधकिम्
14	4	15.7 तः न्यूनम	15.7 तः 26.2	26.2 तः अधकिम्
14	5	15.7 तः न्यूनम	15.7 तः 26.4	26.4 तः अधकिम्
14	6	15.7 तः न्यूनम	15.7 तः 26.5	26.5 तः अधकिम्
14	7	15.8 तः न्यूनम	15.8 तः 26.5	26.5 तः अधकिम्
14	8	15.8 तः न्यूनम	15.8 तः 26.6	26.6 तः अधकिम्
14	9	15.9 तः न्यूनम	15.9 तः 26.7	26.7 तः अधकिम्
14	10	15.9 तः न्यूनम	15.9 तः 26.8	26.8 तः अधकिम्
14	11	16.0 तः न्यूनम	16.0 तः 26.9	26.9 तः अधकिम्
15	0	16.0 तः न्यूनम	16.0 तः 27.0	27.0 तः अधकिम्
15	1	16.1 तः न्यूनम	16.1 तः 27.1	27.1 तः अधकिम्
15	2	16.1 तः न्यूनम	16.1 तः 27.1	27.1 तः अधकिम्
15	3	16.1 तः न्यूनम	16.1 तः 27.2	27.2 तः अधकिम्
15	4	16.2 तः न्यूनम	16.2 तः 27.3	27.3 तः अधकिम्
15	5	16.2 तः न्यूनम	16.2 तः 27.4	27.4 तः अधकिम्
15	6	16.3 तः न्यूनम	16.3 तः 27.4	27.4 तः अधकिम्
15	7	16.3 तः न्यूनम	16.3 तः 27.5	27.5 तः अधकिम्
15	8	16.3 तः न्यूनम	16.3 तः 27.6	27.6 तः अधकिम्
15	9	16.4 तः न्यूनम	16.4 तः 27.7	27.7 तः अधकिम्
15	10	16.4 तः न्यूनम	16.4 तः 27.7	27.7 तः अधकिम्
15	11	16.5 तः न्यूनम	16.5 तः 27.8	27.8 तः अधकिम्
16	0	16.5 तः न्यूनम	16.5 तः 27.9	27.9 तः अधकिम्
16	1	16.5 तः न्यूनम	16.5 तः 27.9	27.9 तः अधकिम्
16	2	16.6 तः न्यूनम	16.6 तः 28.0	28.0 तः अधकिम्
16	3	16.6 तः न्यूनम	16.6 तः 28.1	28.1 तः अधकिम्
16	4	16.7 तः न्यूनम	16.7 तः 28.1	28.1 तः अधकिम्
16	5	16.7 तः न्यूनम	16.7 तः 28.2	28.2 तः अधकिम्
16	6	16.7 तः न्यूनम	16.7 तः 28.3	28.3 तः अधकिम्
16	7	16.8 तः न्यूनम	16.8 तः 28.3	28.3 तः अधकिम्
16	8	16.8 तः न्यूनम	16.8 तः 28.4	28.4 तः अधकिम्
16	9	16.8 तः न्यूनम	16.8 तः 28.5	28.5 तः अधकिम्
16	10	16.9 तः न्यूनम	16.9 तः 28.5	28.5 तः अधकिम्
16	11	16.9 तः न्यूनम	16.9 तः 28.6	28.6 तः अधकिम्
17	0	16.9 तः न्यूनम	16.9 तः 28.6	28.6 तः अधकिम्
17	1	17.0 तः न्यूनम	17.0 तः 28.7	28.7 तः अधकिम्
17	2	17.0 तः न्यूनम	17.0 तः 28.7	28.7 तः अधकिम्
17	3	17.0 तः न्यूनम	17.0 तः 28.8	28.8 तः अधकिम्
17	4	17.1 तः न्यूनम	17.1 तः 28.9	28.9 तः अधकिम्
17	5	17.1 तः न्यूनम	17.1 तः 28.9	28.9 तः अधकिम्
17	6	17.1 तः न्यूनम	17.1 तः 29.0	29.0 तः अधकिम्
17	7	17.1 तः न्यूनम	17.1 तः 29.0	29.0 तः अधकिम्
17	8	17.2 तः न्यूनम	17.2 तः 29.1	29.1 तः अधकिम्
17	9	17.2 तः न्यूनम	17.2 तः 29.1	29.1 तः अधकिम्
17	10	17.2 तः न्यूनम	17.2 तः 29.2	29.2 तः अधकिम्
17	11	17.3 तः न्यूनम	17.3 तः 29.2	29.2 तः अधकिम्
18	0	17.3 तः न्यूनम	17.3 तः 29.2	29.2 तः अधकिम्

परामर्शात्मकाः पाठाः

कापुस्तनि

अमित-भादुरी, डेवलपमेण्ट विद डिग्निटी : द केस फार फुल इम्प्लायमेण्ट, नेशनल बुक ट्रस्ट, नवदेहली, 2005

अमित भादुरी, एण्ड दीपकः नायरः,इण्टेलिजेण्ट पर्सन्स गाइड टु लिबरलाइजेशन, पेङ्गुइन बुक्स, नवदेहली, 2005

अमितभादुरी, मैक्रोइकोनॉमिक्स- द डॉयमामिक्स ऑफ कमोडिटी प्रोडक्शन, मैकमिलन, लन्दनम्, 1986

अविजितविनायकः बनर्जी, रोलैण्ड-बेनाबो, दिलिपमुखर्जी (सं,)(2006), अण्डरस्टेण्डिङ्ग् पोवर्टी, ऑक्सफोर्ड यूनिवर्सिटी प्रेस, न्यूयार्कम्,2006।

बिमलजालानः(सं.), इण्डियनइकोनॉमी, पेङ्गुइनबुक्स, नवदेहली, 2002

सी.यू.टी.एस.,इज इट रियली सेफ, कञ्ज्यूमरयूनिटी ट्रस्टसोसायटी, जयपुरम्,2004

सी.यू.टी.एस.स्टेट ऑफ द इण्डियन कञ्ज्यूमर – एनालसिस ऑफ द इम्प्लीमेण्टेशन ऑफ द यूनाइटेड नेशन्स गाइडलाइंस फार कञ्ज्यूमर प्रोटेक्शन, 1985 इन इण्डिया, कञ्ज्यूमर यूनिटी ट्रस्ट सोसाइटीस,जयपुरम्,2001

इन्द्राणि मजूमदारः, वीमेन एण्ड ग्लोबलाइजेशन – द इम्पैक्ट आन वीमेन वर्कर्स इन द फार्मल सेक्टर्स इन इण्डिया, स्त्री, दिल्ली, 2007

जगदीशभगवती, इन डीफेन्स आफ ग्लोबलाइजेशन, आक्सफोर्ड यूनिवर्सिटी प्रेस, नवदेहली, 2004

जान ब्रेमनः, फूटलूस लेबर – वर्किङ्ग इन इण्डियाज इनफार्मल इकोनामी, कैम्ब्रिज यूनिवर्सिटी प्रेस, कैम्ब्रिजः, 1996

जॉन के.गालब्रेथः, मनी – ह्वेन्स इट केम, ह्वेन्स इट वेन्ट, इण्डियन बुक कम्पनी, नवदेहली, 1975

जीन द्रेज एण्ड अमर्त्य सेनः, इण्डिया – डेवलपमेण्ट एण्ड पार्टीसिपेशन, आक्सफोर्ड यूनिवर्सिटी प्रेस, नवदेहली, थर्ड इम्प्रेशन, 2007

जोसेफ स्टीगलिज, ग्लोबलाइजेशन एण्ड इट्स डिसकन्टेन्ट्स, पेङ्गुइन बुक्स इण्डिया, नवदेहली, 2003

नेशनल कञ्ज्यूमर डिस्प्यूट्स रिड्रेसल कमीशन, लैण्डमार्क जजमेण्ट्स आन कञ्ज्यूमर प्रोटेक्शन,यूनिवर्सल लॉ पब्लिशिङ्ग कं, दिल्ली, 2005

तीर्थकररायः, द इकोनामिक हिस्ट्री आफ इण्डिया, 1875-1947, आक्सफोर्ड यूनिवर्सिटी प्रेस, सेकेण्ड एडिशन, 2006

सर्वकारिप्रकाशनम्

वित्तमन्त्रालयः, आर्थिकसर्वेक्षणम्, भारतसर्वकारः

इत्यस्य रिजल्ट्स आफ इम्प्लायमेण्ट – अनइम्प्लायमेण्ट रावण्ड्स्, नेशनल सैम्पल सर्वे अर्गेनाइजेशन, मिनिस्ट्री आफ स्टैटिस्टिक्स एण्ड प्रोग्राम इम्प्लीमेण्टेशन, गवर्नमेण्ट आफ इण्डिया, नवदेहली।

राष्ट्रियमानवविकासप्रतिवेदनम् 2001 , योजना आयोगः, भारतसर्वकारः, नवदेहली।

अन्यप्रतिवेदनम् –

भारतीयरिजर्ववित्तकोशः, हैण्डबुक आफ स्टैटिस्टिक्स आन इण्डियन इकानमी, मुम्बयी,

यूएनडीपी मानवविकासप्रतिवेदनम्, 2014,यूनाइटेड नेशन्स डेवलपमेण्ट प्रोग्राम, जेनेवा

वर्ल्ड वित्तकोशः, वर्ल्ड डेवलपमेण्ट इण्डिकेटर्स, द वर्ल्ड वित्तकोशः, वाशिङ्गटनम्।

राष्ट्रियशैक्षिकानुसंधानप्रशिक्षणपरिषद्
NATIONAL COUNCIL OF EDUCATIONL RESEARCH AND TRAINING